


# भारतीयदर्शनपरिचयः

**COURSE CODE: B21SN01DE**

Discipline Specific Elective Course
Undergraduate Programme in
Sanskrit Language and Literature

SELF LEARNING MATERIAL

SREENARAYANAGURU
OPEN UNIVERSITY

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# भारतीयदर्शनपरिचयः

Course Code: B21SN01DE

Semester - IV

## Discipline Specific Elective Course
## Undergraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# भारतीयदर्शनपरिचयः

**Course Code: B21SN01DE**

**Semester - IV**

**Discipline Specific Elective Course**

**BA Sanskrit Language and Literature**

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-970303-0-7

9 788197 030307

# DOCUMENTATION

**Academic Committee**

Dr. C.T. Francis
Dr. Smitha Sabu
Dr. Jeena George
Dr. Thara K.V.
Dr. M. Harinarayanan Mankulathillath
Dr. Sreeja Priyadharshini
Dr. K. Ratheesh
Dr. R. Maniyappan
Dr. K. Retheesh
Dr. Susanth S.

**Development of the Content**

Satheesh Kumar Kondoth, Dr. Jothi Lekshmi M., Unnikrishnan Nair S., Dr. Vijayarajan K.U.

**Review**

Content : Dr. G. Sahadevan
Format : Dr. I. G. Shibi
Linguistics : Dr. G. Sahadevan

**Edit**

Dr. G. Sahadevan

**Scrutiny**

Chitra Bhaskar

**Co-ordination**

Dr. I.G. Shibi and Team SLM

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Production**

August 2024

**Copyright**

© Sreenarayanaguru Open University 2024

YouTube

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The university aims to offer you an engaging and thought-provoking educational journey. The undergraduate programme in Sanskrit Language and Literature is distinguished by its strong focus on grammar and comprehension components while still allocating sufficient attention to literary discussions within the curriculum. Sanskrit education, recognised for its high employability potential, necessitates a practical integration of both grammatical and literary aspects. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.

Warm regards.
Dr. Jagathy Raj V. P.

17-07-2024

# Contents


| | |
|---|---|
| **Block - 1** दार्शनिकसम्प्रदायः | **1** |
| **Unit - 1** दर्शनानाम् आविर्भावः | **2** |
| **Unit - 2** दर्शनभेदाः | **10** |
| **Unit - 3** आस्तिकदर्शनानां सामान्यपरिचयः | **26** |
| **Unit - 4** नास्तिकदर्शनानां परिचयः | **37** |
| **Block - 2** सांख्यं योगं च | **45** |
| **Unit - 1** सांख्यमते प्रमाणानि | **46** |
| **Unit - 2** पञ्चविंशतितत्त्वानि, सत्कार्यवादः, पुरुषश्च | **54** |
| **Unit - 3** योगलक्षणम्, पञ्चवृत्तयः, ईश्वरः | **66** |
| **Unit - 4** अष्टाङ्गमार्गः | **75** |
| **Block - 3** न्यायवैशेषिकौ | **84** |
| **Unit - 1** पदार्थविचारः | **85** |
| **Unit - 2** प्रामाण्यविचारः | **99** |
| **Unit - 3** प्रत्यक्षप्रमाणम् | **103** |
| **Block – 4** परोक्षप्रमाणानि | **110** |
| **Unit - 1** अनुमानप्रमाणम् | **111** |
| **Unit - 2** उपमानप्रमाणम् | **126** |
| **Unit - 3** शाब्दप्रमाणम् | **129** |
| **Block - 5** मीमांसा वेदान्तश्च | **136** |
| **Unit - 1** मीमांसादर्शनस्य मौलिकतत्त्वानि | **137** |
| **Unit - 2** ग्रन्थकाराः विशिष्टग्रन्थाश्च | **143** |

**Unit - 3** वेदान्तः, प्रस्थानत्रयं, ब्रह्मा, अविद्या च **150**

**Unit - 4** दर्शनकाराः **160**

**Block - 6 नास्तिकदर्शनानि** **167**

**Unit - 1** चार्वाकदर्शनम् **168**

**Unit - 2** जैनदर्शनम् **177**

**Unit - 3** बौद्धदर्शनम् **189**

**Set-1 Model question paper** **200**

**Set-2 Model question paper** **203**

BLOCK - 1

# दार्शनिकसम्प्रदायः

SGOU

# Unit – 1
# दर्शनानाम् आविर्भावः

## उद्देश्यानि (Learning Outcomes)

- भारतीयसंस्कृतेः सामान्यावबोधः ।
- भारतस्य प्राचीनग्रन्थानां सामान्यपरिचयः ।
- प्राचीनभारतस्य ऐतिहासिकं ज्ञानम् ।
- भारतीयदर्शनानां परिचयंप्राप्स्यति।
- दर्शनस्य प्राधान्यं ज्ञास्यति ।

## प्राग्व्यपेक्षाः(Prerequisites)

विदितं हि सर्वैः लोकेऽस्मिन् यत् प्राणिनः सर्वे सुखाय दुःखमोक्षाय च यतन्ते सर्वथा सर्वदा च इति। पण्डिताः सकलं जगत् सारहीनं मत्वा किं सत्यमिति विज्ञातुम् इच्छन्तः सन्तः जीवः जगद् ब्रह्म च अधिकृत्य विचारम् अनवरतमकुर्वन्। एवं जिज्ञासुभिः पण्डितः कृतेभ्यः प्रयत्नेभ्यः विवधदर्शनानाम् आविर्भावः।भारतस्य बौद्धिकविचारमण्डले तथा सामाजिकजीवनमण्डले च महत्वपूर्णं स्थानमावहन्ति भारतीयदर्शनानि ।

## मुख्यपदानि(Keywords)

दर्शनं, त्रिविधदुःखानि,आध्यात्मिकम्, आधिभौतिकं, आधिदैविकं,ब्रह्म, जगत्, जीवात्मा, परमात्मा, प्रकृतिः, ईश्वरः, पाश्चात्यदर्शनं, फिलोसफि

## Discussion

### 1.1 दर्शनानां आविर्भावः

भारतीयदर्शनस्य बीजं तु वेदसंहितास्वेव दृश्यते। तथैव ब्राह्मणसाहित्ये आरण्यक-साहित्ये च यद्किञ्चिद्बीजं दर्शनस्य लक्ष्यते । उपनिषद्साहित्यं तु दर्शनस्य योनिरेव । दृशिर् प्रेक्षणे इति धातेः ल्युट् प्रत्यये कृते निष्पन्नोऽयं दर्शनशब्दः। दृश्यते यथार्थतत्वं अनेन इति दर्शनं शास्त्रम् अर्थात् येनोपायेन सांसारिकाणां पदार्थानां वास्तविकं स्वरूपं ज्ञायते तदेव

दर्शनपदवाच्यम्। अस्य कथनस्य अयमाशयः अस्ति यद् दर्शनेनैव अस्मिन् जगति किं सत्यं किं वा असत्यमस्ति इदं सम्यक् समीक्ष्यते विविच्यते परीक्ष्यते च।येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, प्रकृतिश्च, याथातथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते विविच्यते च तद् दर्शनम्। अतः समग्रमपि आध्यात्मिकम् आधिभौतिकं च विवेचनं दर्शनशब्दान्तर्गतं भवति। किं ब्रह्म? तस्य किं स्वरूपम्? कः ईश्वरः? के तस्य प्राप्तेरुपायाः? अस्मिन् जगति किं शाश्वतं तत्त्वम् ? इयं सृष्टिः कुतः आबभूव ? जीवात्मनः किं स्वरूपम् ?कः पुनर्जायते?किं लिङ्गशरीरम्? जीवस्य कुतः उद्धृतिः? किं तस्य लक्ष्यम् ? कथं मोक्षावाप्तिः? आत्मा चेतनोऽचेतनो वा ? कः सृष्टेः कर्ता ? किं जीवनस्य कर्तव्यम् ? कश्च जीवनस्य साधिष्ठः पन्थाः? इत्यादयोऽनुयोगा यन्त्र सुसूक्ष्मेण रूपेण विविच्यन्ते तद् दर्शनम्। सूक्ष्मेक्षिकया तत्त्वार्थदर्शनमेव दर्शनम् इत्यवगन्तव्यम्। यथोच्यते:-

केनेषितं पतति प्रेषितं मनः, केन प्राणः प्रथमः प्रैति युक्तः ।

केनेषितां वाचमिमां वदन्ति, चक्षुः श्रोत्रं क उ देवो युनक्ति ।।(केन उप० १.१)

भारतीयदर्शनानि वैदिककालाद् आरभ्य अद्यावधि अविच्छिन्नरूपेण प्रवहन्ति। सेयं दर्शनधारा पुण्यसलिलाया भागीरथ्या धारेवाविच्छिन्ना भारते विराजते। पाश्चात्त्यदर्शनानाम् ईसवीयसंवत्सरात् सप्तमशताब्दीपूर्व प्रसूताऽपि धारा काले काले विच्छेदमाप, पुनरुद्भूता च।

भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। भारतीयेषु भारतीयसंस्कृतौच भारतीयदर्शनानां महान् प्रभावोऽस्ति। दर्शनस्य लक्ष्यं पारमार्थिक-तत्वान्वेषणमपि तस्यान्वेषणवेलायां मानवजीवनस्य समस्तमण्डलस्य विचारः मध्ये भवति। दर्शनेषु मानवः प्रपञ्चः ईश्वरः जननमरणे स्वर्गनरके धर्माधर्मौ वन्धमोक्षौ इत्यादि विषयाः विचारिताः भवन्ति। एतादृशविचारानन्तरमेव एतेषां सर्वेषां अधिष्ठानरूपं तत्वं किमितिअवबुद्ध्यते।

पाश्चात्यदर्शनेषु दर्शनशब्दरूपे 'फिलोसफि' शब्दः प्रचलितः। परन्तु तात्विकदृष्ट्या शब्दोऽयं न दर्शनस्य पर्यायः शब्दोऽयं द्वाभ्यां शब्दाभ्यां योगेन निष्पन्नः। अनुरागवाचकेन 'फिलोसफि' शब्दः निष्पद्यते इत्थम् अस्य अर्थः विद्यानुरागः अस्ति। ये धीमन्तः जीवजगत् ईश्वरादिविषयाणां सम्यक्ज्ञानप्राप्त्यर्थ ं प्रयतन्ते ते इति शब्देन अभिधीयन्ते । परन्तु अस्माकं देशे दर्शनविदः दार्शनिकशब्दाभिधानाः सन्ति। एते बुधाः जीवानां त्रिविधदुःखविनाशायैव सततमचिन्तयन् तेषां दर्शनोद्देश्यं केवलं ज्ञानं प्रति अनुरागमेव नः अपि तु येन केनचित् उपायेन जीवजगतः दुःखोन्मूलनमेवास्ति। वस्तुतः भारतीदर्शनानां मूलं विश्वस्मिन् विद्यमानानां त्रिविधदुःखात्यन्तिकनिवृत्तिरेवास्ति। दुःखानाम् आत्यन्तिकी निवृत्तिः अध्यात्मतत्वविज्ञानेनैव सम्भाव्यते ।

**भारतीयदर्शनानां वैशिष्ट्यम्-** भारतीयदर्शनानां चिन्तनपद्धतिरेव पाश्चात्त्यदर्शनेभ्यो भिन्ना। पाश्चात्यदर्शनषु दर्शनानाम् उद्भवविषये विविधा वादाः प्रस्तूयन्ते,तद्यथा-आश्चर्यजन्यावम्, सन्देहमूलकत्वम्, मानवव्यवहाराध्ययनमूलकत्वम्, लाभानुराममूलकत्वं च। परं भारतीयदर्शनानां मूलम् आश्चर्यादिकं नास्ति। तस्य मूलं त्रिविधदुःखात्यन्तनिवृत्तिरस्ति। त्रिविधदुःखात्यन्तनिवृत्तिश्च आध्यात्मिक प्रवृत्या वा भवतीति भारतीयविज्ञानां सम्मतम् ।

दुःखत्रयाभिधातात् जिज्ञासा तदपघातके हेत ौ।
दृष्टे साऽपार्था चेत् नैकान्तात्यन्ततोऽभावात् ॥ (सांख्यकारिका १)

सांख्यानुसारे च 'व्यक्ताव्यक्तज्ञविज्ञानाद ्' दुःखस्यात्यन्तनिवृत्तिः संजायते ।

पाश्चात्यदर्शनेषु धर्मदर्शनयो ः वैयधिकरण्यम्, न तु सामानाधिकरण्यम्, स्वीक्रियते। तत्र धर्मदर्शनयोः पन्थानौ विभिन्नौ, अनपेक्षित्वं चइतरेतरयोः। भारतीयदर्शनेषु तयोः सामानाधिकरण्यं परस्परापेक्षित्वं चाङ्गीक्रियते। यदेव दर्शनेन विविच्यते, तदेव धर्मेण व्यवह ्रियते। एकत्र धर्मतत्त्वसमीक्षा, अपरत्र धर्मतत्त्व- व्यवह ृतिः। दर्शने चिनातनं मुख्यम्, धर्मे च कर्मनिर्धारणम्। एवं परस्परानुबद्धे धर्मदर्शने भोगापवर्गयोः सोपानरूपे स्तः। एतदेव कणादेन पतञ्जलिना चोद्धोष्यतेः -

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। (वैशेषिक०)

भोगापवर्गार्थं दृश्यम्। (योगदर्शन २.१८)।

**दुःखत्रयविनाशनम् -** भारतीयदर्शनेषु आध्यात्मिक- आधिदैविक- आधिभौतिकेति त्रिविधदुःखानाम् आत्यन्तिकवारणाय दर्शनानां जनिरभूत्। एतदेव च दर्शनानां लक्ष्यम्। एतच्च पतञ्जलिना प्रकार-चतुष्टयेन स्फुटीक्रियते:- (क) हेयम्-दुःखं हेयं त्याज्यं वा। (ख) हेयहेतुः किमिति दुःखानि हेयानि? (ग) हानम्-दुःखानां शाश्वतिकोऽभावः। (घ) हानोपायः दुःखप्रणाशस्य के उपायाः? एवं विविच्य दुःखप्रणाशोपाया दर्शनैः प्रस्तूयन्ते।

**कर्मफलस्यानिवार्यत्वम् -** कृते क्रियमाणं करिष्यमाणं च कर्म फलभाग्भवति। कृतकर्मणां विपाकरूपेण विविधयोनिषु उच्चावचकुलादिषु च जन्म भवति। 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इति भारतीयदर्शनानां मतम्। अतः कर्मविशुद्धौ आचारशुद्धौ च बलम् आधीयते तज्ज्ञैः।

**स्वतन्त्रास्तित्वम्-** पाश्चात्त्यदर्शनानि राजनीति- धर्मशास्त्र- समाजशास्त्र- आचारशास्त्रादीनाम् अङ्गरूपेण समुद्भूतानि वर्तन्ते, परं भारतीयदर्शनानां समुदयो वैदिककालाद् आरभ्य स्वतन्त्रचिन्तनरूपेणाभवत्। अतोऽस्य स्वतन्त्रम् अस्तित्वं विद्यते। मुण्डकोपनिषदि ब्रह्मविद्या सर्वविद्याऽऽधारत्वेन परिगण्यते ।स ब्रह्मविद्यां सर्वविद्याप्रतिष्टाम् अथर्वाय ज्येष्ठपुत्राय प्राह। (मु०१.१)भारतीयदर्शनेषु विचारस्वातन्त्र्यं प्रतिपदम्उपलभ्यते। खण्डन मण्डनं वा स्यात्, हेयम् उपादेयं वा स्यात्, विरुद्धम् अविरुद्धं वा स्यात, यदि युक्तियुक्तं विचारपूर्ण वा किंचिद् उपस्थाप्यते तद् विदुषां विचारपथम् आरोहति। न पूर्वग्रहमात्रेण किंचित् तिरस्क्रियते।सत्यान्वेषणं दर्शनानां लक्ष्यम्। अतो न भारतीय- दर्शनेषु संकुचिता दृष्टिरुपलभ्यते। अस्वीकार्यमपि परपक्षं सयुक्तिकं समुपस्थाप्य युक्तिप्रमाणपुरःसरं तन्निराकरणं क्रियते।

**भारतीयदर्शनानां महत्त्वम्-** मोदावहम् एतद् यद् निखिलेऽपि भुवने पाश्चात्त्याः पौरस्त्याश्च विपश्चितो भारतीयदर्शनानां मुक्तकण्ठेन एकस्वरेण च महत्त्वं स्वीकुर्वते। सत्यपि मतभेदे,

सत्यपि राष्ट्रीयपक्षपाते, सत्यपि स्वोत्कर्षविचारे च भारतीयदर्शनानां महत्त्व-विषये न कस्यापि विदुषो विप्रतिपत्तिः। विश्ववाङ्मये भारतीयदर्शनानि ज्ञान- प्रभा- भास्वरेण चिन्तनेन, स्व-पर-पक्षालोचन-निपुणेन वैदुष्येण, तत्त्वार्थग्रहणैकप्रवणेन विवेकेन, अधृष्येण धीप्रकर्षेण, संकीर्णतादोषानवलिप्तेन विवेचनेन, पूर्वग्रहरहितेन विश्लेषणेन, मनोज्ञया विवेचनशैल्या, इद्धया भावाभिव्यक्त्या, रुचिरया पदावल्या च तरणिवत् तेजः-समुच्चयेन चकासति।

भारतीयदर्शनेषु अध्यात्मभावना अनुस्यूता ओता प्रोता च। आध्यात्मिकी भावनां परिहाय दर्शनानां स्थितिरेव न सम्भाव्यते। किम् आत्मतत्वम्?कथं च तदवाप्तिः?इति सर्वेषामेव दर्शनानां प्रमुखः चिन्तनविषयः। आत्मज्ञानम्, आत्मसाक्षात्कारः, ब्रह्मणा तादात्म्यानुभूतिः, तन्मूलके च सर्वज्ञत्वम्, इत्यादि विषया दर्शनानां विवेच्यत्वेनोपतिष्ठन्ते।
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्। (बृहदा० २.४.५)
जीवोऽज्ञानवशगो भूत्वा बन्धनम् आपद्यते। स भूयो- भूयो जायते म्रियते च। अज्ञाननाशम् अन्तरेण जन्म-मृत्यु-बन्धनाद् न हि मुच्यते जीवः। मोक्षो मुक्तिर्निर्वाणं वा जीवनस्य परमं लक्ष्यम्। मोक्षमधिगत्यैव जीवः स्वजीवनस्य चरमम् उद्देश्य विन्दति। ज्ञानाग्निना सर्वकर्मणां

विनाशे आत्मसाक्षात्कारे च मोक्षावाप्तिः संजायते।

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा। (गीता ४.३७)

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ (वेदान्तसारं)

चार्वाकव्यतिरिक्तानि भारतीयदर्शननानि कर्मफलानुसारं मानवस्य पुनर्जन्म स्वीकुर्वन्ति ।

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च। (गीता २.२७)

भारतीयदर्शनानि आचारमीमांसायां मानवस्य कर्तव्याकर्तव्यानां विशदं विवेचनं प्रस्तुवन्ति। किंकर्तव्यम्?किम् अकर्तव्यम् ?कथम् अभ्युदयः ?कथम् अवनतिः ?मानवजीवनस्य समस्यानां कथं निरोधः प्रतिकारो वा विधेयः इत्यादयो जीवनसंबद्धा अनुयोगा दर्शनैः समाधीयन्ते।

## पुनरावृत्तिः(Recap)

- दृश्यते यथार्थतत्वं अनेन इति दर्शनम् शास्त्रम् ।
- येनोपायेन सांसारिकाणां पदार्थानां वास्तविकस्वरुपज्ञानम् ।
- येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, प्रकृतिश्च, याथातथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते विविच्यते च तद् दर्शनम्।
- दुःखमोचनाय कृतेभ्यः प्रयत्नेभ्यः विविधदर्शनानाम् आविर्भावः।
- सर्वाणि शास्त्राणि दर्शनानुसारं सञ्जातानि। शास्त्रस्य प्रतिपादकं मार्गदर्शकं भवति दर्शनम्।
- भारतीयदर्शनेषु आध्यात्मिक-आधिदैविक-आधिभौतिकेति त्रिविधदुःखानाम् आत्यन्तिकवारणाय दर्शनानां जनिरभूत्।
- त्रिविधेभ्यः दुःखेभ्यः आत्यन्तिकीनिवृत्तिः भारतीयदर्शनानां मूलम् ।दुःखानाम् आत्यन्तिकी निवृत्तिः अध्यात्मतत्वविज्ञानेनैव सम्भाव्यते ।
- पाश्चात्यदर्शनेषु दर्शनशब्दरूपे 'फिलोसफि' शब्दः प्रचलितः।
- भारतीयदर्शनानां समुदयो वैदिककालाद् आरभ्य स्वतन्त्रचिन्तनरूपेणाभवत्। अतोऽस्य स्वतन्त्रम् अस्तित्वं विद्यते ।
- सत्यान्वेषणं दर्शनानां लक्ष्यम्।
- ज्ञानाग्निना सर्वकर्मणां विनाशे आत्मसाक्षात्कारे च मोक्षावाप्तिः संजायते।
- चार्वाकव्यतिरिक्तानि भारतीयदर्शननानि कर्म- फलानुसारं मानवस्य पुनर्जन्म स्वीकुर्वन्ति।
- भारतीयदर्शनानि आचारमीमांसायां मानवस्य कर्तव्याकर्तव्यानां विशदं विवेचनं प्रस्तुवन्ति।

## वस्तुनिष्ठप्रश्नाः(Objective type question)

1. कस्मात् धातोः दर्शनशब्दः निष्पन्नः?
2. किं नाम दर्शनम्?
3. पाश्चात्यचिन्तासु दर्शनशब्दः केन नाम्ना व्यवह्रियते?
4. भारतीयदर्शनानां मूलम् किम्?
5. भारतीयदर्शनानां द्वौ विभागौ कौ?
6. दुःखत्रयः कः?
7. दर्शनानां लक्ष्यं किं?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. भारतीयदर्शनानां वैशिष्ट्यं किम्?
2. पाश्चात्यदर्शने दर्शनशब्दः कथं व्यवह्रियते?
3. दुःखं कति विधम् ? कानि च तानि?

## एकैकया खण्डिकयाउत्तराणि लिखत ।

**(Answer the following questions in a paragraph)**

1. भारतीयदर्शनानां महत्वं प्रतिपादयत।
2. भारतीयदर्शनानां उत्पत्तिःविकासश्चलिखत।
3. पाश्चात्यदर्शने दर्शनपदस्य अर्थं लिखत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. दर्शनमधिकृत्य विशदयत ।
2. भारतीयदर्शनानां मध्ये पाश्चात्यदर्शनानां स्थानं निर्णीयत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. दृशिर् धातोः ।
2. दृश्यतेयथार्थतत्त्वम्अनेनइतिदर्शनम्।
3. फिलोसफिइति।
4. त्रिविधदुःखात्यन्तिकनिवृत्तिः।
5. आस्तिकदर्शनम्, नास्तिकदर्शनम्चेति।
6. आद्ध्यात्मिकं, आधिदैविकं, आधिभौतिकम् ।
7. सत्यान्वेषणम् ।

## सूचनाग्रन्थाः(References)


1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणि दाहलाः, चौखम्बा कृष्णदास् अकादमि वाराणसि, 1998
2. सर्वदर्शनसंग्रहः,श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः,चौखम्बा विद्याभवन्, वारणासि ।


## अधिकवाचनग्रन्थाः(Suggested Readings)


1. History of Indian Philosophy , Surendranath Das Guptha , Vol-III, MLBD, Varanasi
2. Indian Philosophy - Dr.S.Radhakrishnan, Vol- I & II, Varanasi, Delhi.
3. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal BanarsidassPublishers PrivateLimited, Delhi, 2000
4. Outlines of Indian Philosophy - Jadunath Sinha ,New Central Book agency, Culcutta, 1992.

# Unit - 2
# दर्शनभेदाः

## उद्देश्यानि(Learning Outcomes)

- दर्शनस्य प्राधान्यं ज्ञास्यति।
- दर्शनविषयान् ग्रहिष्यति।
- आस्तिकदर्शनानां परिचयं प्राप्स्यति।
- नास्तिकदर्शनानां परिचयं प्राप्स्यति।
- विविधदर्शनानां प्रमाणानि ज्ञास्यति ।

## प्राग्व्यपेक्षाः(Pre requisites)

भारतीयदर्शनेषु विवेचनात्मकतायाः प्राधान्यं लक्ष्यते। यदेव किंचित् प्रतिपाद्यं स्यात् तत् सयुक्तिकं सप्रमाणं परीक्ष्यैव हेयम् उपादेयं वा जायते, न प्रतिज्ञामात्रेण। अत एव भारतीयदर्शनानि दर्शनजगति रत्नवद् बहुमूल्यानि आकल्यन्ते । भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभाव्येत। अतएव अनेके दर्शनकाराः समाजसुधारकरूपेण प्रथिताः सन्ति ।

## मुख्यपदानि (Key words)

सांख्यं, योगं, न्यायं, वैशेषिकं, पूर्वमीमांसा, उत्तरमीमांसा, चार्वाकं, बौद्धं, जैनं, आस्तिकदर्शनं, नास्तिकदर्शनं, जीवात्मा, परमात्मा, कैवल्यं, भेदाभेदं, द्वैतं, विशिष्टाद्वैतं, द्वैताद्वैतं, शुद्धाद्वैतं।

## Discussion

### 1.1 दर्शनभेदाः

भारतीयदर्शनानि सामान्यतः आस्तिकदर्शनम् नास्तिकदर्शनम् इति द्विधा विभज्यन्ते। वेदाः खलु भारतीयचिन्ताः अत्यधिकं प्रभावितवन्तः । यानि दर्शनानि वेदानां परमप्रामाण्यम् अङ्गीकुर्वन्ति तानि आस्तिकदर्शनानि। यानि वेदानां प्रामाण्यं नाङ्गीकुर्वन्ति तानि नास्तिकदर्शनानि च । आस्तिकदर्शनानि षड् सन्ति । तानि च सांख्य- योग- न्याय- वैशेषिक- पूर्वमीमांसा- उत्तरमीमांसा (वेदान्तः) च । चार्वाक- बौद्ध- जैनानि नास्तिकदर्शनानि।

### 1.2 आस्तिकदर्शनानि

प्रधानतया आस्तिकदर्शनानि षट्। आस्तिकदर्शनानि वेदस्य प्रामाण्यमङ्गीकुर्वन्ति । अतः वैदिकदर्शनानि इति नामान्तरम्। प्रायेण वैदिकदर्शनानि ईश्वरस्य सद्भावमङ्गीकुर्वन्ति ।

१. सांख्यदर्शनम्- कपिलमहर्षिः ।

२. योगदर्शनम्- पतञ्जलिमहर्षिः ।

३. न्यायदर्शनम्- गौतममहर्षिः ।

४. वैशेषिकदर्शनम्- कणादमहर्षिः ।

५. पूर्वमीमांसादर्शनम्- जैमिनिमहर्षिः ।

६. वेदान्तदर्शनम् (उत्तरमीमांसादर्शनम्)- बादरायणः (व्यासमहर्षिः)।

एतदतिरिक्तानि अद्वैतदर्शनं, विशिष्टाद्वैतदर्शनम् इत्यादीनि सन्ति। तानि वेदान्तदर्शनस्य भेदाः।दर्शनानां प्रमाणानि प्रतिपाद्यन्ते-

चार्वाकास्तावदेकंद्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ ।
भासर्वज्ञश्चसाङ्ख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति ।।
प्राहुः प्राभाकराद्याः पञ्चकमपि वयं तेपि वेदान्तविज्ञाः ।
पौराणिकास्त्वष्टकमभिदधिरे सम्ववैतिह्ययोगात् ।।

**1.2.1 सांख्यदर्शनम् (कपिलाचार्यः)-** सङ्ख्यायते सम्यक् ज्ञायते तत्त्वं येनेति सांख्यम्। संख्याशब्दस्यगणना, प्रसिद्धिः इत्यर्थद्वयं वर्तते। पञ्चविंशतितत्त्वानां विशदीकरणम् आचार्येण

कपिलमुनिना प्रोक्तम्। एका मूलप्रकृतिः, मूलप्रकृतेः विकृतयः सप्त, केवला विकृतयः षोडश, एकः पुरुषश्च इति पञ्चविंशतिः तत्त्वानि। प्रकृतेः पुरुषस्य च महत्वप्रतिपादनरूपो बोधः इति। प्रत्यक्षम्, अनुमानम्, आगमः च इति त्रीणि प्रमाणानि। अतिपुरातनं दर्शनं भवति संख्यदर्शनम्।

**1.2.2 पतञ्जलिमहर्षेः योगदर्शनम् -** सेश्वरसांख्यदर्शनमेव योगदर्शनम्। युज्यते अनेन इति योगः। योगः चित्तवृत्तिनिरोधः। चित्तवृत्तिनिरोधेन चेतसः समाहितत्वम्। योगस्य अष्टौ अङ्गानि। तानि यम-नियम-आसन- प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिभेदाः। तत्र अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाःयमाः। यमः आत्मनियन्त्रणम्। विषयेभ्यो इन्द्रियाणां नियन्त्रणं यमः। जीवसन्धारणाय अनुष्ठातुं योग्याः नियमाः। शौच सन्तोष-तपः स्वाध्याय-ईश्वरप्रणिधानानि नियमाः। स्थिरसुखम् आसनम्। श्वासप्रश्वासनिरोधः प्राणायामः। शरीरायावश्यकम् ऊर्जदायकरूपेण श्वासोच्छ्वासक्रमः साध्यः। मनोऽकर्षकेभ्यः विषयेभ्यः इन्द्रियाणां नियन्त्रणं प्रत्याहारः। चित्तस्य एकाग्रता धारणा। मायातः जीवात्मनः मोक्षः समाधिः कैवल्यप्राप्तिः (मोक्षप्राप्तिः) एव सांख्यानुसारं जीवितलक्ष्यम्। अभ्यासेन वैराग्येण च योगसिद्धिः जायते ।योगदर्शनं प्रत्यक्षम्, अनुमानं, शब्दः (आगमः) इति प्रमाणत्रयं अङ्गीकरोति ।

**1.2.3 वैशेषिकदर्शनम् (काणाददर्शनम्)-** कणादमहर्षिः तपसा परमेश्वरं ध्यात्वा, सन्तुष्टेन परमेश्वरेण उलूकरूपं धृत्वा समुपदिष्टत्वात् अस्य वैशेषिकदर्शनस्य औलूक्यमिति नामान्तरमस्ति। विशेषसंज्ञकस्य पदार्थस्यापूर्वतया स्वीकारादस्य वैशेषिकमिति नाम। द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् पदार्थाः इति ते कथयन्ति। चत्वारि प्रमाणानि। प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः इति।

**1.2.4 गौतममहर्षेः न्यायदर्शनम्-** मानवस्य उत्कृष्टतमं दर्शनमेव न्यायदर्शनम्। प्रमाणैः अर्थपरीक्षणं न्यायः। नीयन्ते विवक्षितार्थः येनेति न्यायः। षोडशपदार्थज्ञानेन निश्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिकाः। प्रमाण- प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त– अवयव-

तर्क-निर्णय-वाद-जल्प-वितण्डा हेत्वाभास-च्छल- जाति-निग्रहस्थानानां तत्त्वज्ञानात् निश्रेयसाधिगमः। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।

**1.2.5 नव्यन्यायदर्शनम्-** भारते दशमे एकादशशतके च बौद्धदर्शनस्य प्राधान्यं प्रायेण विनष्टमभूत्। समाजिक-धार्मिकभेदाः दर्शनेषु व्यतियानाय प्रेरकाः अभवन्। यद्यपि न्याय-वैशेषिकदर्शने भिन्ने, तथापि कानिचन समानकार्याणि द्रष्टुं शक्यते। यथा-

१. कार्यकारणभावः तदनुकूला चिन्ताधारा।

२. लक्ष्ये समानता।

३. उभयोः प्रयोजनं मोक्षप्राप्तिरेव ।

वैशेषिकदर्शनं प्रमेये प्राधान्यं कल्पयति। न्यायदर्शनं तु प्रमाणेषु। तर्कस्य युक्तेः परीक्षायाः परीक्षानिरीक्षणस्य च प्राधान्यं न्यायदर्शने वर्तते। अतः उभयोः प्राधान्यं स्वीकृत्य नूतना काचन सरणिराविर्भूता। सा सरणिः भवति नव्यन्यायः अथवा कणादन्यायसिद्धान्तः। तर्कसिद्धान्तमिति अपरं नाम च लब्धम्।

अस्य सिद्धान्तस्य प्रवर्तकः आसीत् गङ्गेशोपाध्यायः। सः द्वादशे शतके तत्त्वचिन्तामणिः इति ग्रन्थं रचितवान्। तस्मिन् चत्वारः अध्यायाः सन्ति। प्रत्यक्षानुमानोपमानशब्दान् प्रमाणानि अस्मिन् विशदयति। द्वादशशतकादारभ्य इदम्पर्यन्तं नव्यन्यायदर्शने अनेके ग्रन्थाः संजाताः। बह्वयः टीकाः च जाताः। तेषु भेदाभेदउपकारप्रदः ग्रन्थः भवति 'तर्कसंग्रहः'। तस्य ग्रन्थस्य कर्ता आसीत् सप्तदशशतके आन्ध्राराज्ये आर्काप्रविश्यायां लब्धजन्मा अन्नम्भट्टमहाशयः। अयं ग्रन्थः न्यायवैशेषिकदर्शनयोः प्रामाणिकग्रन्थः । अस्य ग्रन्थस्य चतुर्त्रिंशत् टीकाः संस्कृते संजाताः।

**1.2.6 मीमांसादर्शनम्-** आस्तिकदर्शनेषु मीमांसादर्शनं नितरां प्राधान्यमर्हति। पूर्वमीमांसादर्शनम् इत्यपि अस्य नामान्तरम्। अस्य दर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव। मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। भगवता जैमिनिना द्वादशभिः अध्यायैः रचितः ग्रन्थः भवति द्वादशलक्षणी। पूर्वमीमांसादर्शने केरलदेशस्य योगदानं महदेव। केरले जातं शाबरभाष्यं महान् स्थानं वहति। शवरस्वामिना रचितं भाष्यमेव शाबरभाष्यम्। मीमांसादर्शनस्य प्रधानतया भागद्वयं वर्तते। कुमारिलभट्टस्य

भाट्टमतम्, तथा प्रभाकरस्य प्राभाकरमतञ्च । भाट्टमतानुसारं षट् प्रमाणानि सन्ति। तानि प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः, अर्थापत्तिः, अनुपलब्धिश्च। किन्तु प्राभाकरमते अनुपलब्धिः न प्रमाणम् ।

**1.2.7 वेदान्तदर्शनम्-** वेदस्योत्तरभागप्रतिपादनात् उत्तरमीमांसादर्शनमिति नाम वर्तते। वेदान्तो नाम वेदानामवसानभागः। अन्तशब्दस्य ज्ञानार्थमप्यस्ति। अतः वेदान्तो नाम वेदज्ञानार्थप्रतिपादकः। वेदान्ते प्रस्थानत्रयं प्रसिद्धमेव। प्रस्थानत्रये उपनिषदः, भगवद्गीता, ब्रह्मसूत्रं चान्तर्भवन्ति। ब्रह्मसूत्रप्रणेता बादरायणः पाराशरः वेदान्तदर्शनस्य उपज्ञाता भवति। ब्रह्मसूत्रे चत्वारो अध्यायाः। प्रत्यध्यायं चत्वारः पादाः। ब्रह्मसूत्रोऽयं ग्रन्थः चतुरध्यायी, चतुर्लक्षणी इत्यादिभिः नामभिः प्रख्यातः। वेदान्ते प्रधानतया पञ्च विभागाः सन्ति। ते अद्वैतः, विशिष्टाद्वैतः, द्वैतः, शुद्धाद्वैतः, द्वैताद्वैतश्च। वेदान्तिनः षट् प्रमाणानि अङ्गीकुर्वन्ति। तानि प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः, अर्थापत्तिः, अनुपलब्धिः च।

**1.2.8 भेदाभेदमतम्-** भास्कराचार्यः। मतेऽस्मिन् ब्रह्मणः सदा सगुणत्वमेव न तु निर्गुणत्वमपि। जीवात्मपरमात्मनोः स्वभावतस्त्वभेदत्वम्, तयोः केवलमुपाधिकारणेनैव भेदः। समुच्चिताभ्यां ज्ञानकर्मभ्यामेव अविद्यानिवृत्तिर्वतोऽपवर्गसिद्धिर्नान्यतरेण। तेनासौ भेदाभेदविचाराः ज्ञानकर्मसमुच्चयवाद एव।भास्कराचार्यस्तु विक्रमानन्तरं ८७७ मितवत्सरमभितः स्थितिवानित्यैतिहासिका वदन्ति।

**1.2.9 विशिष्टाद्वैतमतम्-** रामानुजाचार्यः।ईश्वरस्य चिदचिद्विशिष्टत्वे विश्वस्तमिदं मतं भोक्तृभोग्यनियामकभेदेन व्यवस्थितांस्त्रिविधान् पदार्थान् मन्यते। तत्र चितो जीवाः अचित्तु दृश्यं जगदिति। चित्संज्ञका जीवाः परमात्मनः सकाशाद्भिन्नाः नित्या अणुपरिणामाश्च । अचिच्छब्दवाच्यं दृश्यं जडं जगत् त्रिविधं भोग्य-भोगोपकरण-भोगायतनभेदात्। तस्य कर्तोपादानञ्चेश्वरः पुरुषोत्तमो वासुदेवादिपदवेदनीयः। स च परमकारुणिको भक्तवत्सलः स्वोपासकानुगुणतत्तत्फलप्रदानाय स्वलीलावशात् अर्चाविभवव्यूहसूक्ष्मान्तर्यामिभेदेन

पञ्चधाऽवतिष्ठते। तत्र पूर्वपूर्वमूर्त्युपासनया पुरुषार्थप्रतिपन्थिदुरितनिचयक्षये सति उत्तरोत्तरमूर्त्युपासनायामधिकारः सम्पद्यते।

उपासनञ्च पञ्चविधम् - अभिगमनमुपादानमिज्या स्वाध्यायो योग इति यत्राभिगमनं देवतास्थानमार्गादेः सम्मार्जनोपलेपनादि, उपादानं गन्धपुष्पादिपूजा साहित्यसम्पादनम्, इज्येति देवतापूजनं, स्वाध्यायो नाम सङ्कीर्तनतत्त्वप्रतिपादकशास्त्रजपः, देवताऽनुसन्धानं योग इति। एवं उपासनाकर्मसमुच्चितेन विज्ञानेन द्रष्टृदर्शने नष्टे उपासकस्य स्वयाथात्म्यानुगुण्यं वासुदेवः स्वपदं प्रयच्छति।

निरतिशयानन्दप्रिया नन्यप्रयोजनकसकलेतरवैतृष्ण्यवान् ज्ञानविशेष एव भक्तिः। तत्सिद्धिश्च विवेकादिभ्यः। आहारशुद्धेः सत्त्वशुद्धिः सत्त्वशुद्धे विमुक्तिरिति ।

प्रमाणं त्रिविधं प्रत्यक्षमनुमानं शब्दश्च। केनाऽपि प्रमाणेन परमाण्वादीनां जगत्कारणत्वं न सिध्यति। इच्छैवावताराणां हेतुः। फलञ्च तस्य साधुरक्षणदुष्टनाशनधर्मसंस्थापनानि। जीवब्रह्मणः विशेषणविशेष्यभावरूपः सम्बन्धः। तयोरंशांशिभावः।

अचित्खलु ज्ञानशून्यं विकारास्पदं तत्त्वम्। एतच्च नित्यम्। अपितु विविधं शुद्धसत्त्वं मिश्रसत्त्वं सत्त्वशून्यञ्चेति। जीवस्य दुःखत्रयपीडितत्वादीश्वरस्य तथाभावात्तयोर्भेद एव विशिष्टदशायामेव तयोरभेद इति विशिष्टाद्वैतसर्वस्वम् ।

विशिष्टाद्वैतस्य प्रथमो व्याख्याता रामानुजाचार्यः। स हि विक्रमानन्तरं १०९४ तमेवर्षे जात इति केचिदपरे तु तं तत्पूर्ववर्तिनमपि मन्यन्ते। बोधायनकृतब्रह्मसूत्रभाष्यं सङ्क्षिप्य स्वमतानुसारि श्रीभाष्यं ११५७ तमेवर्षे पूरितम्। तस्य च वेदान्तसार-वेदान्तदीप-वेदार्थसार-गद्यत्रय- गीताभाष्यादिग्रन्थाश्च प्रसिद्धाः।

**1.2.10 द्वैतमतम्-** द्वैतमतं हि जीवपरमेश्वरयोः सेवकसेव्यभावेन द्वैततां स्वीकरोति न तु अद्वैतताम् । मतेऽस्मिन् जीवः परमेश्वराद्भिन्नः। तयोः कदापि नैकत्वम्। तयोश्च सेवकसेव्यभावसम्बन्धः। अत्र हि प्रत्यक्षं शब्दश्चेति प्रमाणद्वयमेव मतम्। ब्रह्मणोऽपि प्रमाणविषयता सिध्यति। तस्यास्तित्वे शब्दः प्रमाणम्। माध्वमतस्य सारांशश्चेत्थम् ।

तत्र द्रव्य-गुण-कर्म-सामान्य-विशेष-विशिष्ट-अंशि-शक्ति-सादृश्य-अभावः पदार्थाः। तत्र द्रव्यं विंशतिधा परमात्म- लक्ष्मी जीव- अव्याकृताकाश- प्रकृति- गुणत्रय- महत्तत्त्व- अहङ्कारतत्त्व- बुद्धि- मनसिन्द्रिय- मात्रा- भूत- ब्रह्माण्ड अन्धकार- वासना-काल- प्रतिबिम्बाः इति। गुणाश्च चतुर्विंशतिव्यतिरिक्ताः शम- दम- कृपा- तितिक्षा- सौन्दर्यादयोऽपि। कर्म च विहित-निषिद्धो-दासीनभेदात् त्रिविधम्। तत्रोदासीनस्य उत्क्षेपणावक्षेपणाकुञ्चनप्रसारण गमनादिभेदाः। सामान्यं द्विविधं जात्युपाधिभेदेन नित्यानित्यभेदेन च। विशेषास्त्वनन्ता यतो भेदाभावेऽपि भेदव्यवहारनिर्वाहका विशेषा अनन्ता एव। विशेषसद्भावस्तु परमात्मन्यपि। सादृश्याभावौ वैशेषिकवदेव। शक्तिश्चतुर्विधाऽचिन्त्याधेय-सहज- पदभेदात्। तत्राचिन्त्यशक्तेराश्रयः केवलो विष्णुरेव। अन्याहितशक्तिराधेय- शक्तिः। कार्यानुकूल्येत स्वभावजा शक्तिरेव सहजशक्तिः।

विष्णुरेवेश्वरः। स हि सर्वस्य प्रभुः। जीवाज्जडप्रकृतेश्च स सर्वथा भिन्नो विलक्षणश्च। सा च परमात्मनोऽभिन्नापि सर्वथा भिन्ना। परमात्मिका तन्मात्राधीना हि सा। अत शक्तिशक्तिमतोर्नाभेदः। यथोक्तं-

द्वाविमौ नित्यमुक्तौ स्तः परमः प्रकृतिस्तथा ।
देशतः फालतश्चैव समव्याप्तावुभावजौ॥ इति।

जीवः संसारी कर्मानुसारसुखदुःखभोक्ता जन्ममरणधर्माच। सच त्रिविधः मुक्तियोग्यः नित्यसंसारी तमोयोग्यश्च। तत्र हि मुक्तियोग्यजीवा देवर्षिपितृ- सम्राडुत्तमाः पञ्च, सदैव संसरणयोग्या मध्यमा नित्यसंसारिणः। जीवश्च परमात्मनः सदा भिन्न एव मुक्तावस्थायामपि।

व्याकृताकाशो नित्यो भूताकाशाद्भिन्नः। परमात्मा हि जगतो नित्यकारणम् उपादानकारणत्तु प्रकृतिरेव। तत्र हि ईश्वरस्य जीवाद्भेदः, ईश्वरस्य जडाद् भेदः, जीवस्य जडाद्भेदः, जीवस्य जीवान्तराद्भेदः, जडस्य जडान्तराद्भेदः। एतादृशपञ्चविधभेदज्ञानमेव मुक्तिसाधकम्। उपासना च शास्त्राभ्यासाद् ध्यानाच्च भवति। तत्र विषयान्तरतिरस्कारपूर्वक भगवद्विषयिकाऽखण्डस्मृतिरेत्र ध्यानम्। भगवदनुग्रहमन्तरा जीवो न किञ्चिदपि कर्तुं प्रभवति। मुक्तिस्त्वनु- ग्रहविशेषमात्रलभ्या। ज्ञानेन भक्तिर्भक्त्याऽनुग्रहोऽनुग्रहान्मुक्तिः। सा च चतुर्विधा कर्मक्षयोत्क्रान्त्यर्चिरादिमार्गभोगभेदात् ।

**1.2.11 द्वैताद्वैतमतम्-** व्यवहारकाले जीवेश्वरयोर्द्रष्टृभोक्तृरूपेण द्वैविध्यं तच्च वास्तविकं पारमार्थिकदशायां तयोरैक्यं तच्चौपचारिकमिति विचारकं मतं द्वैताद्वैतत्वेन प्रसिद्धम्। मतस्यास्य बीजं तु श्रुतिष्वषु अपि उपलभ्यते। तत्र तत्र जीवेश्वरयोर्द्वैतात्वाद्वैतत्वे उभे एवं सम्मते। तदेवं सङ्गृह्य निम्बार्काचार्येण द्वैताद्वैतमतं प्रवर्तितम्। मतेऽस्मिन् कृष्ण एव परमेश्वरः। स एव ब्रह्म। एतन्मतानुसारेण जीव-ब्रह्मणोरवस्था विशेषेण भिन्नत्वाभिन्नत्वे। संसारदशायां नानात्मकस्य जीवस्य एकात्मब्रह्मणश्च नितान्तभेदेऽपि मुक्तदशायां चैतन्यात्मकतया जीवब्रह्मणोरभेद एव। तेन हि कारणात्मना जीवब्रह्मणोरैक्यं कार्यात्मना तयोर्भेदः। ईश्वरः चिदचिद्विशिष्टः, जीवस्तु चिल्लक्षणः इन्द्रियनिरपेक्षमेव तत्तज्ज्ञानाधिगम-समर्थः। तेनैवासौ प्रज्ञानघनः स्वयंज्योतिश्च। यथैव सूर्यः प्रकाशमयः प्रकाशाश्रयश्च तथैव जीवो ज्ञानमयो ज्ञानाश्रयश्च।जीवः कर्तृत्वे स्वतन्त्रो भोगे चेश्वराधीनः। अतो जीवब्रह्मणोश्चेतनत्वेन ज्ञानाश्रयत्वेन वा साम्येऽपि तस्य नियम्यत्वाद् ब्रह्मणश्च नियामकत्वाच्च ब्रह्मणो भिद्यते। मुक्त्यवस्थायामपि जीव ईश्वराश्रित एव न तु तल्लीन इति। जीवश्चाणुर्नानाभेदभिन्नश्च। यद्यपि ब्रह्मण एवांशस्तथापि सोंऽशः शक्तिरूपो न तु विभागपरः। भगवत्कृपयैव जीवस्य सत्यरूपावभासः। प्रकृतिस्त्वचिज्जडात्मिका च। सा हि प्रकृताप्रकृतकालभेदेन त्रिधा भिद्यते। तत्र प्राकृतिकं महत्तत्त्वादारभ्य महाभूत- पर्यन्तम्। अप्राकृतश्च निखिलचेतन्यात्मकं जगत्। कालश्च जगतः सकलपरिणामजनकः। जगन्नियामकोऽपि स ब्रह्मणस्तु नियम्य एव।

जगति यदपि दृश्यमदृश्यं वा तत्सर्वमेव ब्रह्मव्याप्यम्। प्रतिपत्त्या भगवत्साक्षात्कारस्ततश्च मुक्तिरिति द्वैताद्वैतवादिनां मतम्। अथ मतस्यास्य समर्थका आचार्यास्तत्कृतयश्चात्र सङ्क्षेपेणोपस्थाप्यन्ते। श्रुतौ दृष्टमपि द्वैताद्वैतबीजकतिपयै राचार्यैरुन्नीतम्। तेषु निम्बार्काचार्यः, श्रीनिवासः, केशवाचार्यः, पुरुषोत्तमाचार्यश्च सुप्रसिद्धाः।

निम्बार्काचार्यः - निम्बार्काचार्यस्य ब्रह्मसूत्रोपरि वेदान्तपरिजाताभिघभाष्यं सर्वत्र प्रसिद्धम्। स हि द्वैताद्वैतमतस्य प्रथमो उन्नायको व्यवस्थितरूपेण । अस्यैव रहस्यषोडशी, वेदान्तकामधेनुश्च प्रसिद्धो ग्रन्थौ। भाष्योपरि श्रीनिवासाचार्यस्य वेदान्तकौस्तुभाख्या व्याख्या प्रसिद्धा ।

श्रीनिवासाचार्यः- निम्बार्कभाष्यस्य व्याख्याता। अस्य द्वि वेदान्तकौस्तुभाख्यो ग्रन्थः प्रसिद्धः।

केशवाचार्यः–वेदान्तकौस्तुभस्य कौस्तुभप्रभाख्या टीका प्रसिद्धाऽस्ति।एवमेव पुरुषोत्तमाचार्यस्य श्रुत्यन्तसुरन्द्रुमः देवाचार्यस्य सिद्धान्तजाह्नवी मतस्यास्य प्रचारकाः।

### 1.2.12 शुद्धाद्वैतम्

शुद्धाद्वैतमतं हि मायावादविरहितमद्वैतमतमेव । मायावादरहितत्वं एवास्य शुद्धत्वे हेतुः। शुद्धाद्वैतस्याऽपि बीजं श्रुतिष्वेव लभ्यते 'यो देवानां नामधा एक एव', 'एकं सत् विप्रा बहुधा कल्पयन्ति' इत्यादिवाक्येषु किन्तु मतमिदं सिद्धान्तत्वेन प्रथमं श्रीमता विष्णुस्वामिना प्रपञ्चितं विलुप्तञ्च यद् वल्लभाचार्येण पुनरुन्नीतम्। पुष्टिमार्गसमर्थकं मतमिदं भक्तिरेव मोक्षसाधनं कृष्ण एव परमेश्वर इति वैशिष्ट्यं भजते। बल्लभमते फलरूपा साधनरूपा च द्विविधा सेवा यत्र श्रीकृष्णैकप्रवणतारूपा मानसी सेवा फलरूपा शरीरेण धनादिना वा निर्वर्त्यमाना साधनरूपा। वह्निविस्फुलिङ्गयोरिव शुद्धयोरेव जीवात्मपरमात्मनोरैक्यम्। सर्वधर्मविशिष्टं हि ब्रह्मात्मा एवं तस्य विरूद्धधर्माश्रयत्वम्। सर्वं हि जगद् ब्रह्ममयम्। कार्यस्य ब्रह्मरूपस्य ब्रह्मैव कारणं नेतरत्। ब्रह्म हि साकारं सर्वशक्त्यैकं सर्वज्ञं सर्वकर्तृ सच्चिदानन्दरूपं च। तस्मादेवेदं जगत् प्रवर्तते । ततश्च वह्नेर्विस्फुलिङ्गा इव जीवानामुद्भवः। जीवस्तु विसर्पिगुणवान् चेतन्यमयोऽणुश्च स च ब्रह्मणोंऽशो न तु विभागरूपः। मायासम्बन्धरहितं शुद्धं ब्रह्म तेन कार्यकारणरूपं शुद्धमेव ब्रह्म नतु मायिकम् । जीवब्रह्मणोः कार्यरूपेणैव भेदो न तु कारणात्मना ।

वल्लभमते ब्रह्मणि विरूद्धधर्माणामस्ति न मायोपाधिकमपितु नैसर्गिकमेव। जीवश्च तिरोहितानन्दादिगुणः स्वयमीश्वर एव। तस्मिन् हि ऐश्वर्यतिरोधानेन दैन्यं यशस्तिरोधानेन हीनता श्रीपतिरोधानेन सनद्धीनत्वं, ज्ञानतिरोधानेन नश्वरे देहे आत्मबुद्धिः। यस्मिन् हि भगवदनुग्रहस्तस्य सर्वं सम्भवति। जगद्विषये वल्लभाया हि अविकृतपरिणामवादम् अभ्युपगच्छन्ति न तु विवर्तवादम् ।

मतस्यास्याचार्याः वल्लभाचार्य-विदुलनाथ-कृष्णचन्द्र गिरिधराचार्य-हरि- दासाचार्य-व्रजनाथ-विज्ञानभिक्षुप्रभृतयः। उल्लेखनीयग्रन्याश्च वल्लभाचार्यस्य ब्रह्मसूत्रोपरि अणुभाष्यं, विठ्ठलनाथस्य विद्वन्मण्डनं, कृष्णचन्द्रस्य भावप्रकाशिका, पुरुषोत्तमस्य अमृततरङ्गिणी, गिरिधरस्य शुद्धाद्वैतमार्तण्डः, बालकृष्णस्य प्रमेबरत्नार्णवश्च ।

वल्लभाचार्यः - वैक्रमे १५३६ वर्षे जात इति सम्मतस्यास्य शुद्धाद्वैतमतप्रवर्तकस्य युगपुरुषस्य ब्रह्मसूत्रोपरि अणुभाष्ये, तत्त्वप्रदीपनिबन्धः, पूर्वमीमांसा- भाष्यं, सिद्धान्तमुक्तावली चेत्यादिग्रन्थाः प्रसिद्धाः।

## 1.3 नास्तिकदर्शनानि। (अवैदिकदर्शनानि)

नास्तिकाः वेदानां प्रामाण्यं नाङ्गीकुर्वन्ति। वेदाः मानवरचिताः अथवा मानवसृष्टारः इति ते विचारयन्ति। प्रधानतया नास्तिकदर्शनानि त्रिधा। तानि चार्वाकदर्शनं, बौद्धदर्शनं, जैनदर्शनं च भवन्ति ।

### 1.3.1 चार्वाकदर्शनम्

चारु वाकः चार्वाकः। चारु इत्यस्याकर्षकमित्यर्थः । वाक् इत्यस्य वाणी इत्यर्थः। अस्य दर्शनस्य सिद्धान्ताः आकर्षकाः तथा सन्तोषदायकाः च। अस्यापरं नाम भवति लोकायतदर्शनमिति ।जनानां मध्ये प्रचुरप्रचारत्त्वादेव एतन्नाम। लोकः जनः। आयतः इत्यस्य विस्तृतः इत्यर्थः। चार्वाकः कः इत्यस्मिन् कार्ये पण्डिताः भिन्नाभिप्रायान् प्रकटयन्ति। केचित् बृहस्पतिं मन्यन्ते। अन्ये केचन बृहस्पतेः शिष्यः इति मन्यन्ते।

सर्वेभ्यः दर्शनेभ्यः प्राचीनतममपि अस्य दर्शनस्य प्रामाणिको ग्रन्थः न दृश्यते। चार्वाकमते चत्त्वारि तत्त्वानि। तानि पृथिव्यप्तेजोवायुरूपाणि। कामः एवैकः पुरुषार्थः। मरणमेव मोक्षः। प्रत्यक्षमेव प्रमाणम्। धर्मचिन्ता न वर्तते। सुखं दुःखं च स्वभावेनैव भवतः। तत्र धर्माधर्मौ न कारणम्।

### 1.3.2 बौद्धदर्शनम्

बौद्धदर्शनस्योपज्ञाता भवति गौतमबुद्धः। सोऽयं क्रिस्तोः पूर्वं पञ्चमे शतके जीवितमधारयत्। सहस्रवर्षकालं भारते प्रचुरप्रचारस्य अस्य दर्शनस्य महती प्रसक्तिरवर्तत।

अस्य दर्शनस्य अनेके ग्रन्थाः सन्ति। किन्तु भगवता बुद्धेन रचितः ग्रन्थः न दृश्यते। बौद्धदर्शने दुःखं, दुःखसमुदायः, दुःखनिरोधः, दुःखनिरोधगामिनी प्रतिपत् चेति चत्वारि सत्यानि सन्ति। दुःखं तु सार्वत्रिकः क्लेशः। निखिलस्य दुःखस्य कारणमविद्यैव। अविद्यावशंगतः जीवः लोके अहर्निशं भ्रमति। बौद्धनये जीवः जगत् च अनित्यं तथा प्रतिक्षणं परिणामविधेये च। प्रत्यक्षम्, अनुमानम् इति प्रमाणद्वयं बौद्धेनाङ्गीकृतमेव।

### 1.3.4 जैनदर्शनम्

जैनदर्शनस्योपज्ञाता वर्धमानमहावीरः भवति। तस्यापरं नाम भवति जिनः इति। अस्य दर्शनस्य अपरं नाम आर्हतमतम् इति। बौद्धदर्शनमिव वेदानां प्रामाण्यं न स्वीकरोति। तथापि दर्शनस्यास्य बीजं वेदेष्वेवं दृश्यते। रत्नत्रयसम्पादनेन आत्मोन्नतिः जायते। सम्यग्दर्शनं, सम्यग्ज्ञानं, सम्यक् चारित्र्यं च रत्नत्रयम्। आचार्याणामुपदेशानुसरणं सम्यक् ज्ञानम्। आचार्यवचनेषु विश्वासः सम्यग्दर्शनम्। तदनुसारं जीवितवृत्तिकरणं सम्यक् चारित्र्यम्।जैनदर्शने त्रीणि प्रमाणानि प्रत्यक्षम्, अनुमानम्, आगमः चेति।

## पुनरावृत्तिः(Recap)

- सांख्य,योग,न्याय,वैशेषिक,पूर्वमीमांसा,उत्तरमीमांसाएते आस्तिकदर्शनानि(वेदप्रामाणिकाः)।
- एका मूलप्रकृतिः, मूलप्रकृतेः विकृतयः सप्त, केवला विकृतयः षोडश, एकः पुरुषश्च इति पञ्चविंशतिः तत्त्वानि ।
- योगस्य अष्टौ अङ्गानि। तानि यम-नियम-आसन- प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिभेदाः।
- द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् पदार्थाः इति वैशेषिकाः कथयन्ति। चत्वारि प्रमाणानि।
- उत्कृष्टतमं दर्शनमेव न्यायदर्शनम्। प्रमाणैः अर्थपरीक्षणं न्यायः।

- मीमांसादर्शनस्य प्रधानतया भागद्वयं वर्तते। कुमारिलभट्टस्य भाट्टमतम्, तथा प्रभाकरस्य प्राभाकरमतञ्च ।
- वेदान्तो नाम वेदज्ञानार्थप्रतिपादकः। ब्रह्मसूत्रप्रणेता बादरायणः वेदान्तदर्शनस्य उपज्ञाता भवति।
- द्वैतमतं हि जीवपरमेश्वरयोः सेवकसेव्यभावेन द्वैततां स्वीकरोति।
- व्यवहारकाले जीवेश्वरयोर्द्रष्टृभोक्तृरूपेण द्वैविध्यं तच्च वास्तविकं पारमार्थिकदशायां तयोरैक्यं तच्चौपचारिकमिति विचारकं मतं द्वैताद्वैतत्वेन प्रसिद्धम्।
- मायावादरहितत्वमेवास्य शुद्धत्वे हेतुः। मायासम्बन्धरहितं शुद्धं ब्रह्म तेन कार्यकारणरूपं शुद्धमेव ब्रह्म नतु मायिकम् । जीवब्रह्मणोः कार्यरूपेणेव भेदो न तु कारणात्मना ।
- व्यवहारकाले जीवेश्वरयोर्द्रष्टृभोक्तृरूपेण द्वैविध्यं तच्च वास्तविकं पारमार्थिकदशायां तयोरैक्यं तच्चौपचारिकमिति विचारकं मतं द्वैताद्वैतत्वेन प्रसिद्धम्।
- ईश्वरस्य चिदचिद्विशिष्टत्वे विश्वस्तमिदं मतं भोक्तृभोग्यनियामकभेदेन व्यवस्थितांस्त्रिविधान् पदार्थात् मन्यते।
- जीवात्मपरमात्मनोः स्वभावतस्त्वभेदत्वम्, तयोः केवलमुपाधिकारणेनैव भेदः।
- चार्वाक, जैन, बौद्ध एते नास्तिकदर्शनानि (वेदाप्रामाणिकाः)।
- बौद्धदर्शने दुःखं, दुःखसमुदायः, दुःखनिरोधः, दुःखनिरोधमार्गः प्रतिपत् चेति चत्वारि सत्यानि सन्ति।
- जैनदर्शनस्य अपरं नाम आर्हतमतम् इति। रत्नत्रयसम्पादनेन आत्मोन्नतिः जायते।
- चार्वाकदर्शनस्य सिद्धान्ताः आकर्षकाः तथा सन्तोषदायकाः च। अस्यापरं नामभवति लोकायतदर्शनमिति ।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. सांख्यशास्त्रे कति तत्त्वानि सन्ति?
2. सांख्यदर्शनस्य आचार्यः कः ?

3. पञ्चभूतानि कानि ?
4. योगदर्शनस्य अपरंनाम किम्?
5. योगदर्शने यमाः के?
6. प्राणायामः नाम किम्?
7. वैशेषिकदर्शनस्य प्रवक्ता कः ?
8. न्यायदर्शने पदार्थः कति विधम्?
9. मीमांसादर्शनस्य लक्ष्यं किम्?
10. मीमांसादर्शने कति भेदाः सन्ति ?के चते?
11. नव्यन्यायदर्शनस्य प्रवर्तकः कः?
12. पूर्वमीमांसादर्शनस्य कर्ता कः ?
13. पूर्वमीमांसायाः विषयः कः?
14. मीमांसादर्शने प्रसिद्धौ द्वौ सम्प्रदायौ कौ?
15. भाट्टमते कति प्रमाणानि सन्ति ?कानि च तानि?
16. प्राभाकरमते कति प्रमाणानि सन्ति ?कानि?
17. ब्रह्मसूत्रस्य कर्ता कः?
18. वेदान्तदर्शने कति प्रमाणानि सन्ति?
19. द्वैतवेदान्तस्य स्थापकः कः?
20. विशिष्टाद्वैतमतस्थापकःकः?
21. भेदाभेदमतस्य आचार्यः कः?
22. द्वैताद्वैतमतस्य आचार्यः कः?
23. शुद्धाद्वैतमतस्य आचार्यः कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
**(Aanswer the following questions in one or two sentences)**

1. सांख्यदर्शने कति प्रमाणानि सन्ति? कानि च तानि?
2. योगे कति अङ्गानि सन्ति? कानि च तानि?
3. न्यायमते कति गुणाः सन्ति? कानि च तानि?
4. वैशेषिकदर्शने पदार्थाः कति? कानि च तानि?
5. न्यायदर्शने प्रमेयं कति विधम्? कानि च तानि ?
6. मीमांसामतानुसारं पदार्थाः कति ? कानि च तानि ?

## एकैकया खण्डिकयाउत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. योगस्य अङ्गानि लिखत ।
2. सांख्यदर्शनस्य तत्वानि लिखत ।
3. प्रस्थानत्रयं लिखत ।
4. मीमांसादर्शनस्य भेदानि लिखत ।

## निर्दिष्टाभ्यासः **(Assignment)**

1. दर्शनमधिकृत्य विशदयत।
2. अद्वैतदर्शनस्य प्रमुखभेदाः के, विशदयत ।
3. भारतीयदर्शनानां प्रमाणानि विशदयत।
4. भारतीयदर्शनानां पदार्थाः विशदयत च निरूपयत ।
5. आस्तिकनास्तिकदर्शनयोः भेदाभादाः च ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि**(Answer to Objective type questions)**

1. पञ्चविंशतिः।

2. कपिलाचार्यः।
3. पृथिवि, अपः , तेजसः. वायुः, आकाशं ।
4. स्वेश्वरसांख्यम् ।
5. अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाः यमाः।
6. श्वासप्रश्वासनिरोधः प्राणायामः।
7. कणादमहर्षिः ।
8. सप्त ।
9. धर्मविषयप्रतिपादनम् ।
10. द्वे । भाट्टमतं, प्राभाकरमतम् ।
11. गङ्गेशोपाध्यायः ।
12. जैमिनिमहर्षिः ।
13. कर्मविषयप्रतिपादकं ।
14. भाट्टमतं, प्राभाकरमतम् ।
15. षट् ।
16. पञ्च ।
17. बादरायणः ।
18. षट् ।
19. मध्वाचार्यः ।
20. रामानुजाचार्यः ।
21. भास्कराचार्यः।
22. निम्बार्काचार्यः
23. वल्लभाचार्यः ।

## सूचनाग्रन्थाः (References)


1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणि दाहलाः, चौखम्बा कृष्णदास अकादमि वाराणसि,1998
2. सर्वदर्शनसंग्रहः,श्रीसायणमाधवाचार्यप्रणीतः,आनन्दाश्रमसंस्कृतग्रन्थावलिः, चौखम्बा विद्याभवन्, वाराणसि ।


## अधिकवाचनग्रन्थौ(Suggested Readings)


1. History of Indian Philosophy , Surendranath Das Guptha , Vol-III, MLBD, Varanasi
2. Indian Philosophy - Dr.S.Radhakrishnan, Vol- I & II, Varanasi, Delhi.
3. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal BanarsidassPublishers PrivateLimited, Delhi, 2000
4. Outlines of Indian Philosophy - Jadunath Sinha ,New Central Book agency, Culcutta, 1992.

# Unit – 3
# आस्तिकदर्शनानां सामान्यपरिचयः

## उद्देश्यानि(Learning Outcomes)

- भारतीय दर्शनानां परिचयः।
- विविधानां दर्शनानां अवबोधः।
- षटास्तिकदर्शनानां सामान्यज्ञानवबोधः।
- दार्शनिकानां प्रमाणतत्वविचारविषयावगमनम् ।

## प्राग्व्यपेक्षाः(Prerequisites)

पण्डिताः सकलं जगत् सारहीनं मत्वा किं सत्यमिति विज्ञातुम् इच्छन्तः सन्तः जीवं, जगद्, ब्रह्म च अधिकृत्य विचारम् अनवरतमकुर्वन्। एवं जिज्ञासुभिः पण्डितैः कृतेभ्यः प्रयत्नेभ्यः विविधदर्शनानाम् आविर्भावः। भारतीयदर्शनानि सामान्यतः आस्तिकदर्शनम्, नास्तिकदर्शनम् इति द्विधा विभज्यन्ते। वेदाः खलु भारतीयचिन्ताः अत्यधिकं प्रभावितवन्तः। यानि दर्शनानि वेदानां परमप्रामाण्यम् अङ्गीकुर्वन्ति तानि आस्तिकदर्शनानि, यानि च वेदानां प्रामाण्यं नाङ्गीकुर्वन्ति तानि नास्तिकदर्शनानि च। आस्तिकदर्शनानि षड् सन्ति। तानि च सांख्य-योग न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसा (वेदान्तः) दर्शनानि। चार्वाक-बौद्ध- जैनानि नास्तिकदर्शनानि ।सर्वाणि शास्त्राणि दर्शनानुसारं सञ्जातानि। शास्त्रस्य प्रतिपदाकं मार्गदर्शकं भवति दर्शनम्।

## मुख्यपदानि (Key words)

साख्यं- कपिलमहर्षिः, योगं- पतञ्जलिः, न्यायं- गौतममहर्षिः, वैशेषिकं- कणादः, पुर्वमीनांसा- जैमिनिः, उत्तरमीमांसा (वेदान्तः)- बादरायणः (वेदव्यासः), प्राभाकरमतं, भाट्टमतं, विशिष्टाद्वैतमतं, द्वैतमतम्।

## Discussion

### 1.3.1 सांख्यदर्शनम्

सांख्यदर्शनम् अतिप्राचीनतमं दर्शनमस्ति। वेदेषु यद्यपि स्पष्टरूपेण सांख्यस्य पारिभाषिकपदानाम् उपलब्धिर्न भवति तथापि बृहदारण्यक-कठोपनिषद् श्वेताश्वतरोपनिषद् प्रभृतिषु ग्रन्थेषु सांख्यतत्वानां स्पष्टं दर्शनं भवति। यद्यपि अस्त्येव उपनिषत्सु इतरदर्शनानां मूलबीजान्यपि उपलभ्यन्ते तथापि अनेन दर्शनानां वैदिकस्रोतसां समर्थनमेव भवति। कपिलमहर्षिः सांख्यदर्शनस्य प्रणेता इति मन्यते। कपिलविरचितेन सांख्यसूत्रेण विज्ञायते यत् सूत्रकाले एवं सांख्यतत्वानि पर्याप्तं प्रसूतानि आसन्, तेषां सुरक्षायै एवं चिन्तितो भूत्वा कपिलः तत्सन्दर्भितं सकलं ज्ञानं सूत्ररूपेण सङ्कलितवान्।

सांख्यशब्दस्य निष्पत्तिः सम् उपसर्गपूर्वकं संख्यात्र धातोः सञ्जाता। अस्य अर्थोऽस्ति सम्यग्विचाराणाम् उपस्थापकं शास्त्रम्। अस्मिन्नेव शास्त्रे सर्वप्रथमं तत्वानां संख्या परिभाषिता अस्ति। अतः एवं अस्य नाम सांख्यमित्यस्ति इत्यपि केचन प्रतिपादयन्ति। तथापि एषा व्युत्पतिः न स्वीकार्या। यतो हि एतद्विपरीत प्रकृतिपुरुषयोर्भेदरूपस्य विवेकस्य ज्ञापकं शास्त्रं सांख्यशास्त्रमस्ति। कपिलः, आसुरिः, पञ्चशिखाचार्यः, विज्ञानभिक्षुः, ईश्वरकृष्णः इत्येते सांख्यदर्शनेप्रसिद्धाः आचार्याः। एषु ईश्वरकृष्णेन विरचिता सांख्यकारिका अद्य सर्वप्रमाणतया स्वीक्रियतेआधिभौतिकाधिदैविकाध्यात्मिकम् इति दुःखत्रयात् मोचनं, प्रकृतिपुरुषविवेकपरिज्ञानात् सम्पद्यते। इदमेव कैवल्यपदेन व्यवह्रियते। प्रकृतिपुरुषादि पञ्चविंशतितत्वानि दर्शनेऽस्मिन् प्रतिपादितानि। प्रकृतिः, महत् अहङ्कारः, एकादशेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चभूतानि ,पुरुषः चेति चतुर्विंशति तत्वानि। एतैः चतुर्विंशतितत्वैः सह पुरुषोऽपि मिलित्वा आहत्य पञ्चविंशतितत्वानि सन्ति। तानि च तत्वानि एवं निर्दिशति।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकाराः न प्रकृतिर्न विकृतिः पुरुषः।। (सां. का 3)

सांख्यदर्शनानुसारं संपूर्णं विश्वं सत्वरजस्तमोगुणानां परिणामः अस्ति। एषां त्रयाणां गुणानां तारतम्येन जायते यत् वस्तुनः स्वरूपं उत्पद्यते विनश्यति च सांख्यमते कार्यकारणसम्बन्धः सत्कार्यवाद इति प्रसिद्धः। अयमेव परिणामवादः, विकारवादः इत्यादि नामभिः च व्यवह्रियते। उक्तं च-

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।

शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ।। (सां. का 9) ।

सत्वरजःतमोगुणानां साम्यावस्थाप्रकृतिः। सत्कार्यवादं, पुरुषास्तित्वं, पुरुषबहुत्वं एतानि विषयाणि अत्र प्रतिपादयति। प्रत्यक्षम्, अनुमानम्, शब्दः इति त्रीणि प्रमाणानि सांख्ये प्रसिद्धानि भवन्ति। अतिपुरातनं दर्शनं भवति संख्यदर्शनम्।

### 1.3.2 योगदर्शनम्

सेश्वरसांख्यदर्शनमेव योगदर्शनस्य प्रथम नामः। आस्तिकदर्शनक्रमे द्वितीयं स्थानम् योगदर्शनम्।पतञ्जलिमहर्षिप्रणीतं योगदर्शनं दर्शनेषु नितरां प्राधान्यमर्हति। योगो चित्तवृत्तिनिरोधः।चित्तवृतीनां सर्वतोभावेन निरोधः एव योगः। सांख्यप्रोक्तः पञ्चविंशतितत्वैः सहैव ईश्वरस्यापि प्रतिपादनात् दर्शनमिदम् सेश्वरसांख्यम् इत्यपि उच्यते। पतञ्जलिमहर्षिप्रणीतानि योगसूत्राणि अस्य प्रामाणिकं शास्त्रम्। योगसूत्राणामुपरि व्यासविरचितभाष्यमपि प्रधानमेव। श्रीवाचस्पतिमिश्रः योगभाष्योपरि तत्ववैशारदी इति नाम्नी टीका रचितवान्। अत्र भाष्यं अवश्यमेव विशदीकृतं समभूत्। योगश्चित्तवृत्तिनिरोधः (यो.सू. 1.2)इति योगलक्षणम्। चितवृत्तिं निरूप्य निरोधोपायः उच्यतेअभ्यासवैराग्याभ्यां तन्निरोधः इति। अभ्यासो नाम तत्र स्थितो यत्नः। दृष्टानुश्रविकविषयवितृष्णस्यवशीकारसंज्ञा वैराग्यम् इति वैराग्यलक्षणम्। (यो सू.1.15)अत्र उपायान्तरत्वेन ईश्वरप्रणिधानमपि निर्दिशति। ईश्वरप्रणिधानात्वाइति (यो.सू.।.23)। ईश्वरस्वरूपं उच्यते क्लेशकर्म-विपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः इति (यो.सू.1.24)।संसारानुभवः दृक्दृश्यसंयोगेन भवति दृक् इति पुरुषः, दृश्यं इति प्रधानादि जगत् च उच्यते। अनयोः संयोगेन अशुद्धिः

भवति इति तन्निराकर्तुं योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः (यो सू. 2.28)इतियोगाङ्गानां प्रस्तावः भवति ।

### 1.3.3 न्यायदर्शनम् ।

भारतीयदर्शनसाहित्यस्य प्रवेशनद्वारमिव भवति न्यायदर्शनम्। मानवस्य उत्कृष्टतमं दर्शनमेव न्यायदर्शनम्। प्रमाणैः अर्थपरीक्षणं न्यायः। नीयन्ते विवक्षितार्थः अनेनेति न्यायः। न्यायदर्शनस्य प्रयोजनं वेदविरोधि तर्कनिरसनोपयिकं वैदिकसिद्धान्तरक्षणोपयोगिप्रमाणादि प्रतिपादनमेव। इदं शास्त्रं प्रमाणशास्त्रं तर्कशास्त्रं च उच्यते।षोडशपदार्थतत्त्वज्ञानेन निश्श्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिकाः।सकलविद्याप्रदीपो हि न्यायः । शास्त्रमिदम् आन्वीक्षिकी, तर्कशास्त्रम्, प्रमाणशास्त्रम्, हेतुविद्या इत्यादिभिः आख्याभिः अपि प्रथते। विभिन्नप्रमाणानां साहाय्येन वस्तुतत्वस्य परीक्षणम् न्यायस्य अर्थः। उक्तञ्च वात्स्यानेन प्रमाणैरर्थपरीक्षणं न्यायः। प्रमाणान्याश्रित्य प्रमेयाणां विचारणं प्रमाणानां च सविस्तर उपपादनम् अस्य दर्शनस्य प्रधानमुद्ददेश्यम्। अपि च दर्शनान्तराणि इव इदमपि दुःखनिवर्तनोपायप्रदर्शनपुरस्सरं मोक्षमार्गं निर्दिशति। न्यायदर्शनस्यआधारभूतः ग्रन्थः गौतममहर्षिप्रणीतम् न्यायसूत्रम् भवति । दर्शनमिदम् अक्षपाददर्शनमित्यपि प्रसिद्धम्। प्रपञ्चेभवन्ति विद्यमानानि सर्वचराचराणि षोडशपदार्थेषु अन्तर्भवन्ति इति न्यायदर्शनम् उद्घोषयति। प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वा षोडशपदार्थाः। एषु पदार्थेषु प्रमाणस्य (यथार्थज्ञानोपाधिनः) एवं प्रामुख्यम्। न्यायदर्शस्यप्राचीननव्यभेदेन भेदद्वयं विद्यते। गौतमः, वात्स्यायनः, उद्द्योतकरः, वाचस्पतिमिश्रः, जयन्तभट्टः, भासर्वज्ञः, उदयनाचार्यः इत्येते सर्वे प्राचीननैय्यायिकाः भवन्ति गङ्गेशोपाध्यायः, रघुनाथशिरोमणिः, मथुराम तर्कवागीशः, जगदीशभट्टाचार्यः, गदाधरमट्टाचर्यः इत्येते नव्यनैय्यायिकाः उच्यन्ते। प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः इति चत्वारि प्रमाणानि अङ्गीक्रियन्ते।

### 1.3.4 वैशेषिकदर्शनम् ।

वैशेषिकदर्शनस्य उपज्ञाता महर्षिकणादः भवति। वैशेषिकसूत्राणि दर्शनस्यास्य प्रामाणिको ग्रन्थः। कणादमहर्षिः तपसा परमेश्वरं ध्यात्वा, सन्तुष्टेन परमेश्वरेण उलूकरूपं धृत्वा समुपदिष्टत्वात् अस्य वैशेषिकदर्शनस्य औलूक्यमिति नामान्तरमस्ति। विशेषसंज्ञकस्य पदार्थस्यापूर्वकतया स्वीकारादस्य वैशेषिकमिति नाम। एतस्मिन् दर्शने 'विशेषः' इत्याख्यः पदार्थः भगवता कणादेन स्वीकृतः। एतस्मात् कारणात्दर्शनमिदं वैशेषिकदर्शनम् इत्येतया संज्ञया अभिधीयते। कणादेन प्रोक्तत्वात् काणादमित्यपि उच्यते। एतन्मतानुसारं धर्मेण विशुद्धान्तकरणः पदार्थविज्ञानेन निःश्रेयसमधिगच्छति। अर्थात् दर्शनमिदं मुख्यतया पदार्थविद्याप्रतिपादकमस्ति प्रपञ्चे विद्यमानाः सर्वेऽपि पदार्थाः सप्तसु विभक्ताः। द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः। एतेषु आदिमाः षट् भावपदार्थाः, अन्तिमः अभावपदार्थश्चास्ति प्रपञ्चस्य उत्पत्तिः परमाणोः एवं अभवत् इति दर्शनमिदम् उद्घोषयति। प्रपञ्चघटकानां अध्ययनेनैव तदाधारभूतं तत्वम् अवगम्यते इति वैशेषिकसिद्धान्तः। वैशेषिकसूत्राण्यधिकृत्य प्रशस्तपादाचार्येण लिखित पदार्यधर्मसंग्रहाख्यं भाष्यम् अत्यन्तं महत्वपूर्ण भवति । प्रत्यक्षम्, अनुमानम्, इति द्वे प्रमाणे एते अङ्गीकुर्वन्ति।

### 1.3.5 पूर्वमीमांसादर्शनम्

मीमांसादर्शनं पूर्वमीमांसा, उत्तरमीमांसा चेति द्विधा विभज्यते । दर्शनशास्त्रे वेदस्य रूपद्वयं प्रसिद्धमस्ति कर्मकाण्डः, जानकाण्डश्चेति। जानकाण्डः उत्तरमीमासायाः विषयः अस्ति, यत्र वेदस्य ज्ञानपरकं विश्लेषणं कृतम् किन्तु कर्मकाण्डः पूर्वमीमांसायाः विषयो वर्तते। दर्शनमिदं वेदानां कर्मकाण्डमधिकृत्य प्रवर्तते।आस्तिकदर्शनेषु मीमांसादर्शनं नितरां प्राधान्यमर्हति। पूर्वमीमांसादर्शनम् इत्यपि अस्य नामान्तरम्। अस्य दर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव। मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। जैमिनिमहर्षिप्रणीतानि मीमांसासूत्राण्येव दर्शनस्यास्य मूलप्रमाणम् पञ्चशतोत्तरद्विसहस्रसूत्रः (2500)सहितः द्वादशाध्यायात्मकः च अयं ग्रन्थः वेदस्य अपौरुषेयत्वं पूर्वमीमांसायाः आधारः ग्रन्थो ऽयं द्वादशलक्षणी इत्यपि व्यवह्नियते। "अथातो धर्मजिज्ञासा" इति प्रथमं मीमांसासूत्रम्।

चोदनालक्षणोऽर्थौ धर्मः। चोदनाशब्दः वेदप्रतिपादकः। मीमांसासूत्राणाम् शबरस्वामिविरचितं भाष्यं सुप्रसिद्धमेव।

पूर्वमीमांसादर्शनस्य सर्वाधिकं महत्वपूर्णतत्वं धर्मविचारोऽस्ति। धर्मस्य आधारशिला कर्मकाण्डं अधिकृत्य तिष्ठति। मीमांसादर्शनानुसारं मृत्योरनन्तरमपि आत्मा स्वकीयानांशुभाशुभकर्मणां फलानि प्राप्नोति। मीमांसायां स्वर्ग नामकस्य स्वतन्त्रतत्वस्य परिकल्पना कृताऽस्ति। यतो हि वैदिककर्मकाण्डेषु प्रवृत्तेर्मूलाधारः स्वर्ग एवास्ति मृत्योरनन्तरं स्वर्गप्राप्तिः भवति एतत्कृते अपूर्व इति कल्पना मीमांसकैः कृता कर्मणा समुत्पन्नं धर्माधर्मापरपर्यायभूतं अपूर्व एव साक्षात् कर्मजन्यफलजनकं भवति। जीवनस्वर्गयोःमध्ये कर्मकाण्डजन्यम् अपूर्वमेव सेतुरुपमस्ति। अपूर्व एव पापपुण्ययोः आश्रयः वर्तते। वेदः कर्मविधानं करोति। वेदाः ईश्वरकृताः सन्ति, अतः वेदविहितकर्मएव धर्मः। अयमेव पूर्वमीमांसादर्शनस्य सर्वसम्मतः सिद्धान्तोऽस्ति। पूर्वमीमांसा स्वीकरोति यत् इदं जगत् पूर्णसत्यम् अस्ति। अस्य मिथ्यात्व निराधारकल्पना वर्तते। पश्चात्काले दर्शनमिदं भाट्टमतं प्राभाकरमतम् इति द्विधा अभवत्। कुमारिलमतानुयायिनः भाट्टमीमांसकाः प्राभाकरमतानुयायिनः प्राभाकरमीमांसकाः इति श्रूयते। तत्र भाट्टमते प्रत्यक्षानुमानोपमानशब्दार्थापत्तिरनुपलब्धिः इति षड्, प्राभाकरमते अनुपलब्धिं विहाय पञ्च प्रमाणानि च सन्ति ।

### 1.3.6 उत्तरमीमांसादर्शनम्

दर्शनमिदं वेदानां ज्ञानकाण्डमधिकृत्य प्रवर्तते बादरायणमहर्षिप्रणीतम् ब्रह्मसूत्रमेव दर्शनस्यास्य मूलं प्रमाणम्। चतुर्षु अध्यायेषु पञ्चपञ्चाशतधिकपञ्चशतसूत्राणि(555)सन्ति ब्रह्मसूत्रे। शङ्कराचार्यः, रामानुजाचार्यः, मध्वाचार्यःनिम्बार्काचार्यः, वल्लभाचार्यः. विज्ञानभिक्षुःइत्येते अनेके आचार्याः ब्रह्मसूत्रस्य भाष्यं रचितवन्तः। शङ्कराचार्यस्य अद्वैतप्रतिपादकं शारीरकमीमांसाभाष्यं, रामानुजाचार्यस्य विशिष्टाद्वैतोपपादकं श्रीभाष्यं, मध्वाचार्यस्य द्वैतमतप्रवर्त्तकं पूर्णप्रज्ञाभाष्यं, निम्बार्काचार्यस्य द्वैताद्वैतसमर्थकं वेदान्तपारिजातभाष्यं, वल्लभाचार्यस्य शुद्धाद्वैतप्रकाशं शङ्कराचार्यप्रणीतं अद्वैतभाष्यम् च ब्रह्मसूत्रभाष्येषु एके अतिप्रतिष्ठित सिम्युक्तं इदमेवेति वेदान्तशब्देन अधुना मुख्यतया अस्यैव

व्यवहारः भवति।"ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रमैवनापरः" इति अद्वैतवेदान्तस्य मुख्य सिद्धान्तः। दर्शनमिदमनुमृत्य प्रपञ्चस्य सृष्टिस्थितिलयकारणमेवअनुभूयते। अतः तयो अभेदः। अज्ञानवशात् अभेदमिदं न जानन्ति जनाः। उपनिषत्वाक्यानां श्रवणमनननिदिध्यासनैः यदा तथ्यमिदं साक्षात्क्रियते तदा परमपुरुषार्थःमोक्षः सिद्ध्यति इति अद्वैतिनां सिद्धान्तः। भाट्टमामीमांसकसम्मतानि षड्प्रमाणानि अद्वैतवेदान्तेऽपि स्वीकुर्वन्ति।

## पुनरावृत्तिः(Recap)

- कपिलमहर्षिः सांख्यदर्शनस्य प्रणेता इति मन्यते।
- ईश्वरकृष्णेन विरचिता सांख्यकारिका अद्य सर्वप्रमाणतया स्वीक्रियते।
- आधिभौतिकाधिदैविकाध्यात्मिकम् इति दुःखत्रयात् मोचनं, प्रकृतिपुरुषविवेकपरिज्ञानात् सम्पद्यते।
- पञ्चविंशतितत्वानि सांख्यदर्शने प्रतिपादितानि। प्रकृतिः, महत् अहङ्कारः, एकादशेन्द्रियाणि,पञ्चतन्मात्राणि, पञ्चभूतानि पुरुषः,चेति चतुर्विंशति तत्वानि ।
- प्रत्यक्षम्, अनुमानम्, शब्दः इति त्रीणि प्रमाणानि सांख्ये प्रसिद्धानि भवन्ति।
- अतिपुरातनं दर्शनं भवति सांख्यदर्शनम्।
- सत्व ,रज ,तमोगुणानां साम्यावस्था प्रकृति ।
- सेश्वरसांख्यदर्शनमेव योगदर्शनस्य प्रथमं नाम।
- योगोचित्तवृत्तिनिरोधः।क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः इति।
- नीयन्ते विवक्षितार्थः अनेनेति न्यायः।इदं शास्त्रं प्रमाणशास्त्रं, तर्कशास्त्रं, आन्वीक्षिकी,हेतुविद्याइत्यादिभिः आख्याभिः अपि प्रथते।
- न्यायदर्शनस्यआधारभूतः ग्रन्थः गौतममहर्षिप्रणीतम् न्यायसूत्रम् भवति ।
- प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डहेत्वा षोडशपदार्थाः।
- प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः इति चत्वारि प्रमाणानि अङ्गीक्रियन्ते।

- षोडशपदार्थतत्त्वज्ञानेन निश्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिकाः।कर्मणा समुत्पन्नं धर्माधर्मापरपर्यायभूतं अपूर्वमेव साक्षात् कर्मजन्यफलजनकं भवति ।
- वैशेषिकदर्शनस्य उपज्ञाता महर्षिकणादः भवति।
- द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः।
- प्रत्यक्षम्, अनुमानम्, इति द्वे प्रमाणे एते अङ्गीकुर्वन्ति।
- दर्शनशास्त्रे वेदस्य रूपद्वयं प्रसिद्धमस्ति कर्मकाण्डः, ज्ञानकाण्डश्चेति ।
- कर्मकाण्डः पूर्वमीमांसायाःज्ञानकाण्डः उत्तरमीमासायाः विषयः।
- मीमांसादर्शनस्य दर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव।
- “अथातो धर्मजिज्ञासा” इति प्रथमं मीमांसासूत्रम्।
- मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः।
- कुमारिलमतानुयायिनः भाट्टमीमांसकाः प्राभाकरमतानुयायिनः प्राभाकरमीमांसकाः इति श्रूयते।
- दर्शनमिदं वेदानां ज्ञानकाण्डमधिकृत्य प्रवर्तते बादरायणमहर्षिप्रणीतम् ब्रह्मसूत्रमेव दर्शनस्यास्य मूलं प्रमाणम्।
- ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः इति अद्वैतवेदान्तस्य मुख्यो सिद्धान्तः।
- शङ्कराचार्यः- अद्वैतम्।
- रामानुजाचार्यः - विशिष्टाद्वैतम् ।
- मध्वाचार्यः- द्वैतम्।
- निम्बार्काचार्यः- द्वैताद्वैतम् ।
- वल्लभाचार्यः-शुद्धाद्वैतम्।
- उपनिषत् वाक्यानां श्रवणमनननिदिध्यासनैः परमपुरुषार्थः मोक्षः सिद्ध्यति

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. सांख्यदर्शने कति कारिकाः सन्ति?
2. दुःखत्रयं किम्?

3. सांख्यमिति नामधेयं कस्मात् शब्दात् जातम्?
4. दृष्टं इत्यस्य अर्थः?
5. अनुमानस्य लक्षणम् ?
6. योगदर्शनस्य प्रवक्ता कः?
7. योगसूत्रे अध्यायाः कति ? के च ते ?
8. योगदर्शनस्य प्रामाणिकग्रन्थः कः ?
9. वैशेषिकदर्शने पदार्थाः कति ?
10. वैशेषिकदर्शने प्रमाणं कति विधम्?
11. न्यायदर्शनस्याचार्यः कः?
12. न्यायदर्शने प्रमाणं कति विधम्?
13. वेदान्तदर्शनस्य आचार्यः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. अद्वैतदर्शनस्य मुख्यः सिद्धान्तः कः?
2. अद्वैतदर्शनानुसारं मोक्षः कथं सिद्ध्यति ?
3. सांख्याभिमतानि प्रमाणानि कानि ?
4. योगशास्त्रानुसार ईश्वरः कः?
5. षोडशपदार्थ◌ा◌ः के?
6. न्यायमते कति गुणाः सन्ति?कानि च तानि ?
7. सप्तपदार्थाः के ?
8. मीमांसामते धर्मलक्षणम् किं?
9. को नाम अपूर्वः?

10. भाट्टमीमांसकमते प्रमाणानि कानि?
11. ब्रह्मसूत्रस्य प्रमुखभाष्याणि कानि ?

**एकैकया खण्डिकयाउत्तराणि लिखत।**
**(Answer the following questions in a paragraph)**

1. पूर्वमीमांसा उत्तरमीमांसयोः प्रधानतत्त्वानि विशदयत।
2. सांख्यदर्शने तत्वानि विशदयत।
3. योगदर्शने कः ईश्वरः, प्रतिपादयत।

**निर्दिष्टाभ्यासः(Assignment)**

1. पूर्वोत्तरमीमांसयोः प्रधानतत्त्वानि विशदयत।
2. सांख्यदर्शने पुरुषः प्रतिपादयत ।
3. न्यायमते पदार्थाः विशदयत ।

**वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)**

1. द्वासप्ततिः
2. आध्यात्मिकं, आधिदैव्कं, आधिभौतिकं ।
3. संख्याशब्दात् ।
4. प्रत्यक्षम् ।
5. अनुमितिकरणं अनुमानं ।
6. पतञ्जलि महर्षिः ।
7. चत्वारि । समाधि, साधनं, कैवल्यं, विभूति ।
8. योगसूत्रम् ।
9. षट् ।
10. चत्वारि ।
11. गौतमः ।
12. सप्त ।
13. शङ्कराचार्यः ।

## सूचनाग्रन्थाः(References)


1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणि दाहलाः, चौखम्बा कृष्णदास अकादमि वारणासि,1998
2. सर्वदर्शनसंग्रहः,श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रम्थावलिः, चौखम्बा विद्याभवन्, वारणासि ।


## अधिकवाचनग्रन्थौ(Suggested Readings)


1. History of Indian Philosophy , Surendranath Das Guptha , Vol-III, MLBD, Varanasi
2. Indian Philosophy - Dr.S.Radhakrishnan, Vol- I & II, Varanasi, Delhi.
3. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal BanarsidassPublishers PrivateLimited, Delhi, 2000
4. Outlines of Indian Philosophy - Jadunath Sinha ,New Central Book agency, Culcutta, 1992.

# Unit- 4
# नास्तिकदर्शनानां परिचयः

## उद्देश्यानि(Learning Outcomes)

- नास्तिकदर्शनानां परिचयः प्राप्स्यसि।
- आस्तिकनास्तिकदर्शनानां साधर्म्यं वैधर्म्यं च वेत्स्यति।
- चार्वाकदर्शनस्य प्रमाणज्ञानं अवगम्यते ।
- जैनदर्शनस्य भेदानि ज्ञायते ।
- बौद्धदर्शनस्य पिटकत्रयं,भेदाः च ज्ञायते ।

## प्राग्व्यपेक्षाः(Pre requisites)

पण्डिताः सकलं जगत् सारहीनं मत्वा किं सत्यमिति विज्ञातुम् इच्छन्तः सन्तः जीवं, जगद्, ब्रह्म च अधिकृत्य विचारम् अनवरतमकुर्वन्। एवं जिज्ञासुभिः पण्डितैः कृतेभ्यः प्रयत्नेभ्यः विवधदर्शनानाम् आविर्भावः। भारतीयदर्शनानि सामान्यतः आस्तिकदर्शनम्, नास्तिकदर्शनम् इति द्विधा विभज्यन्ते। वेदाः खलु भारतीयचिन्ताः अत्यधिकं प्रभावितवन्तः।यानि च वेदानां प्रामाण्यं नाङ्गीकुर्वन्ति तानि नास्तिकदर्शनानि । आस्तिकदर्शनानि षड् सन्ति। चार्वाक-बौद्ध- जैनानि नास्तिकदर्शनानि।सर्वाणि शास्त्राणि दर्शनानुसारं सञ्जातानि। शास्त्रस्य प्रतिपादकं मार्गदर्शकं भवति दर्शनम्।

## मुख्यपदानि(Key words)

चार्वाकं, बृहस्पतिमहर्षिः, बौद्धं, गौतमः, जैनं, वर्धमानमहावीरः, नास्तिकदर्शनं, मरणमेवापवर्गः, पुरुषार्थः, प्रत्यक्षप्रमाणम्, सम्यग्दर्शनम्, सम्यग्ज्ञानम्, सम्यग्चरित्रम्, सप्तभङ्गीनयं, त्रिपिटकं, वैभाषिकः, सौत्रान्तिकः, योगाचारः, माध्यमिकः ।

**Discussion**

### 1.4.1 चार्वाकदर्शनम्

नास्तिकदर्शनेषु प्राचीनतमं भवति चार्वाकदर्शनम् अस्य दर्शनस्य उपज्ञाता बृहस्पतिमहर्षिः। अतः एव दर्शनमिदं बार्हस्पत्यं इत्यपि प्रसिद्धम्। इदमेव दर्शनम् लोके बाहुल्येन प्रचरितत्वात् लोकायतदर्शनम् इत्यपि व्यवह्रियते। लोकः जनःआयतः इत्यस्य विस्तृतः इत्यर्थः। चारु मनोहरं वाक् अस्ति येषां तेइति चार्वाकाः इति संज्ञां लभन्ते।अस्य दर्शनस्य सिद्धान्ताः आकर्षकाः तथा सन्तोषदायकाः च। जनानां मध्ये प्रचुरप्रचारत्वादेव एतन्नाम। चार्वाकः इत्यस्मिन् कार्ये पण्डिताः भिन्नाभिप्रायान् प्रकटयन्ति। केचित् बृहस्पति मन्यन्ते। अन्ये केचन बृहस्पतेः शिष्यः चार्वाकः इति मन्यन्ते।सर्वेभ्यः दर्शनेभ्यः प्राचीनतमपि अस्य दर्शनस्य प्रामाणिको ग्रन्थः न दृश्यते। चार्वाकमते चत्वारि तत्त्वानि। तानि पृथिव्यप्तेजोवायुरूपाणि। अर्थकामो पुरुषार्थौ। मरणमेव मोक्षः। प्रत्यक्षमेव प्रमाणम्। धर्मचिन्ता न वर्तते। सुखं दुःखंच स्वभावेनेव भवतः। तत्र धर्माधर्मौ न कारणम्।अस्य दर्शनस्य कश्चिदपि प्रामाणिको ग्रन्थः अधुना न उपलभ्यते। इतरदार्शनिकग्रन्थेषु दृष्टानि चार्वाकमतानि अत्र प्रदर्शन्ते।पृथिव्यप्तेजोवायुरिति तत्वानि। तत्समुदाये शरीरेन्द्रियविषयसंज्ञा तेभ्यश्चैतन्यम् चैतन्यविशिष्टःकायः पुरुषः। काम एव एकः पुरुषार्थः। मरणमेव अपवर्गः।

यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिबेत्।

'भस्मीभूतस्य देहस्य पुनरागमनं कुतः।। इति ।

एतेषां सिद्धान्तः सर्वदर्शनसंग्रहाख्ये ग्रन्थे उद्धृताः भवन्ति प्रत्यक्षमात्रप्रमाणवादिनः चार्वाकाः ।

### 1.4.2 बौद्धदर्शनम्

श्रीबुद्धस्य चिन्तापद्धतिम् आधारीकृत्य आविर्भूतम् दर्शनम् भवति बौद्धदर्शनम् । क्लेशकर्मविपाकादिकृतदुःखेभ्यो मुक्तिरेव अस्य दर्शनस्यापि मूलम्। श्रीबुद्धस्य शिष्याः तदीयान् उपदेशान् सिद्धान्ताश्च पिटकरूपेण संगृह्य प्रकाशितवन्तः। ते एव त्रिपिटकमिति नाम्ना प्रसिद्धाः ते च विनयपिटकः, सुत्तपिटकः, अभिधम्मपिटकश्च। विनयपिटके

सदाचारविषयकाः नियमाः, सुत्तपिटके सदृष्टान्तोपदेशाः, अभिधम्मपिटके दार्शनिकाः विषयाः सङ्कलिताः सन्ति दुःखेभ्यो मोचनं कथं स्यात् इत्यासीत् बुद्धस्य विचिन्तनम् तस्य मते ज्ञानस्य सारांशं चतुर्षु आर्यसत्येषु सन्निहितं वर्तते। आर्यसत्यानि हि –दुःखं, दुःखसमुदयं, दुःखनिरोधं, दुःखनिरोधगामिनी प्रतिपत्तिश्च। अर्थात् संसारः दुःखमयोऽस्ति, दुःखानां निदानमपि विद्यते, दुःखेभ्यो मुक्तिरपि लब्धुं शक्यते, मुक्तिमार्गोऽपि निर्धारितो ऽस्ति। केवल आर्यजना एवं एतान् प्राप्तुमशक्नुवन्ति, अनार्यस्तु यावज्जीवन दुःखेष्वेव जीवन्ति। दुःखकारणावगमनाय बुद्धः प्रतीत्यसमुत्पादं प्रस्तौति। हेतुप्रत्ययसापेक्षो भावानामुत्पादः प्रतीत्यसमुत्पादः। कस्माचित् कारणात् यत्कार्यमुत्पद्यते तत्कार्यमेव कस्याप्यत्यस्य कार्यस्य कारणं भवति। एवमेवोत्तरोत्तरमेकैकं कार्य कार्यान्तरं प्रति कारणत्वं गच्छति न अकस्मात् किमपि प्रादुर्भवति। बौद्धमते मोक्षस्य निर्वाणमिति संज्ञा। चतुर्षु आर्यसत्येषु दुःखनिरोधस्यैव प्राधान्यम् । दुःखनिरोधोपाधि अष्टाङ्गमार्गानुसारमेव अष्टाङ्गमार्गाणि इमानि सन्ति सम्यक् दृष्टिः, सम्यक् सङ्कल्पः सम्यक् वाक्, सम्यक् कर्म, सम्यक् आजीवः, सम्यक् व्यायामः सम्यक् स्मृतिः सम्यक् समाधिः। कालान्तरे अस्य दर्शनस्य चल शाखाः सञ्जाताः। ते वैभाषिकाः, सौत्रान्तिकाः, माध्यमिकाः, योगाचाराः चेति। एतेषां मते प्रत्यक्षम्, अनुमानम् इति द्वे प्रमाणे स्तः।

### 1.4.3 जैनदर्शनम्

जिनस्य दर्शनं जैनदर्शनम्। जिनः सारात् मुक्तः आत्मा। मोहरागद्वेषान् जयति इति जिनः। इदम् आहेतदर्शनमित्यपि उच्यते। अस्मिन् दर्शने विंशति तीर्थङ्कराः स्वीकृताः, ये धर्मतीर्थस्य प्रवर्तकाः। प्रथमः तीर्थङ्करः ऋषभदेवः अन्तिमःतीर्थङ्करः महावीरः। एते सम्यग्दर्शनज्ञानचरित्ररूपं मोक्षमार्गम् मृत्य जिनाः अभवन्तमेव च मोक्षमार्गम् अन्येभ्यः उपदिशन्ति। जीव-अजीव-पुण्यं-पापं- आस्रवः-संवरः-बन्धः-निर्जरः-मोक्षः इति नव तत्वार्थाः। एतेषांसम्यक् श्रद्धानं सम्यग्दर्शनम् एतेषां यथार्थम् ज्ञानं सम्यग्ज्ञानम् हिंसानृतस्तेयब्रह्मापरिग्रहेभ्यः पूर्णः निवृत्तिः सम्यक्चरित्रम् तत्वार्थानां ज्ञानार्थ वे प्रमाणे स्वीकृते प्रत्यक्षम् परोक्षम् धर्मः अधर्मः आकाशः कालः चेति पद द्रव्याणि पदद्रव्यात्मको लोकः

स्वयं स्वातन्त्र्येण परिणमनशीलः, ईश्वरस्य तस्य अकर्ता इति जैनदर्शनस्य प्रमुखम् अभिमतम्। प्रत्येक द्रव्ये सदसदादयः अनन्ताः परस्परविरुद्धाः गुणधर्माः विद्यन्ते तस्मात् द्रव्ये न तु सर्वथा सत् न च सर्वथा असत् प्रत्युत प्रचित् मत् कथंचित् च असत् एष सिद्धान्तः अनेकान्तवादः उच्यते। कथंचित् इत्यर्थक स्यात्पदं प्रयुज्य द्रव्यस्य एकपक्षस्य प्रस्तुतीकरणम् स्याद्वादः उच्यते। प्रत्येकं गंगारी जीवः मोहरागद्वेषात्मक परिणमनं प्रतिसमयं करोति। तस्य निमितेन कर्माख्याः पॉलिकाः परमाणवः प्रतिगमयं जीवं वनाति तच कर्मबन्धनम् उच्यते। सम्यग्दर्शनज्ञानचरित्ररुपेण मोक्षमार्गेण तत्कर्मबन्धनं नश्यति। मोक्षश्च उपलभ्यते। प्रत्येकं भव्यजीवः मार्गभिमम् अनुसृत्य मोक्षम् अधिगन्तुम्, जिनच भवितुम् अर्हति।

## पुनरावृत्तिः(Recap)

- चार्वाकमतं पुरातनयुगे लोकायतनाम्नाप्रसिद्धमासीत्।
- चार्वाकमतं शुद्धबुद्धिवादः भूतचैतन्यवादः, भौतिकवादः, सुखवादः इत्यपि शब्द्यन्ते। , पृथिव्यप्तेजोवायुरिति तत्वानि।
- चैतन्यविशिष्टः कायः पुरुषः। काम एवैकः पुरुषार्थः।
- मरणमेवापवर्गः।
- यावज्जीवेत्सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत्।
- प्रमाणम्- प्रत्यक्षम्।
- प्रतीत्यसमुत्पादः।
- षडिन्द्रियाणि षड्विषयाश्चेति द्वादशायतनानि। आयतनं हि ज्ञानसाधनम्।त्रिपिटकं बौद्धदर्शनस्य सर्वस्वभूतो ग्रन्थः।
- तत्र सुत्तपिटके महात्मनो बुद्धस्य उपदेशाः सङ्गृहीताः, विनयपिटके आचारविशेषाः , अभिधम्मपिटके च दार्शनिक सिद्धान्ता।
- बौद्धानां मते रूप- वेदना- संज्ञा- संस्कार- विज्ञानेतिपञ्चस्कनधानां सन्ति।
- बौद्धा हि चतुर्धा विभक्ताः वैभाषिक- सौत्रान्तिक- योगाचार- माध्यमिकभेदात्।
- जैनदर्शनस्य अपरं नामआर्हतमतम् इति।

- जैनदर्शनानुसारं जीवो हि प्रकृतेर्भिन्न एव। ज्ञानं द्विविधं प्रत्यक्षं परोक्षञ्च।
- चतुर्विंशति तीर्थङ्कराः वर्धमानमहावीरः।
- प्रथमः तीर्थङ्करः ऋषभदेवः, अन्तिमः तीर्थङ्करः महावीरश्च ।
- जैनास्तु द्विविधाः श्वेताम्बराः दिगम्बराश्च।
- अहिंसा-सुनृत-अस्तेय- ब्रह्मचर्य- अपरिग्रह-आत्मसंयम-वैराग्यादीनि व्रतानि, यत आत्मा आनन्दमयस्वरूपं प्राप्नोति।
- मोक्षमार्गम्- सम्यग्दर्शनम्, सम्यग्ज्ञानम्, सम्यग्चरित्रम् एते त्रिरत्नानि।
- अहिंसा-सत्य-अस्तेया-परिग्रह-ब्रह्मचर्याणां साधनैव सम्यक् चारित्र्यम्।
- जैनानां परामर्शश्च सप्तप्रकारकः सप्तभङ्गीनयपदव्यपदेश्यः।
- स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यं, स्यादस्ति चावक्तव्यञ्च, स्यान्नास्ति चावक्तव्यञ्च. त्यादस्ति च नास्ति चावक्तव्यञ्चेति। जै
- अनेकान्तवादः स्याद्वादश्च ।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. चार्वाकदर्शनस्य उपज्ञाता कः ?
2. चार्वाकदर्शनस्य अपरं नाम किम् ?
3. चार्वाकदर्शने कति प्रमाणाः सन्ति ?
4. लोकायतमित्यस्य कः अर्थः ?
5. बुद्धदर्शनस्य स्थापकः कः ?
6. श्रीबुद्धस्य उपदेशाः कथं संगृहीताः?
7. पिटकत्रयम् किम् ?
8. चत्वारि आर्यसत्यानि कानि ?
9. बौद्धदर्शनमङ्गीकृतं प्रमाणद्वयं किम् ?

10. जैनदर्शनस्य प्रथमः तीर्थङ्करः कः?
11. जैनदर्शनस्य नामान्तरं किम्?
12. जैनमतस्य स्थापकः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. विनयपिटके कः विषयः ?
2. चार्वाकदर्शने तत्वानि कति ?कानि च तानि?
3. सुत्तपिटके विषयः कः ?
4. अभिधम्मपिटके विषयः कः ?
5. को नाम प्रतीत्यसमुत्पादः ?
6. अष्टाङ्ङ्गमार्गाः के?
7. जैनानां मोक्षमार्गाणि कानि ?
8. जैनमतानुसारं प्रमाणानि कति ?कानि च तानि?
9. जैनमते द्रव्याणि कति? कानि च तानि?
10. अनेकान्तवादः कः ?

## एकैकया खण्डिकयाउत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. चार्वाकसिद्धान्तः प्रतिपादयत।
2. चार्वाकदर्शने जीवः विशदयत ।
3. जैनमते सप्तभङ्गीनयं अथवा स्याद् वादः विशदयत ।

4. जैनमते मोक्षसाधनानि लिखत ।
5. आर्यसत्यानि लिखत ।
6. बौद्धदर्शनस्य विभागाः के , लिखत ।
7. पिटकत्रयं विशदयत ।
8. अष्टाङ्गमार्गाणि विशदयत ।

## निर्दिष्टाभ्यासः(Assignment)

1. बौद्धदर्शनविभागाः विशदयत।
2. बौद्धदर्शनस्य सामान्य अवलोकनं निरूपयत।
3. जैनदर्शनं तस्य विभागाः च प्रतिपादयत ।
4. चार्वाकदर्शनं प्रतिपादयत।
5. आस्तिकदर्शनं विशदयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि(Answer to Objective type questions)

1. बृहस्पतिमहर्षिः।
2. लोकायतम्।
3. एकम्।
4. लोके वाहुल्येन प्रचरितत्वात् लोकायतदर्शनम्।
5. श्रीबुद्धः।
6. पिटकरूपेण।
7. विनयपिटकः, सुत्तपिटकः, अभिधम्मपिटकश्च।
8. दुःखं, दुःखसमुदायः, दुःखनिरोधः, दुःखनिरोधगामिनी प्रतिपतिश्च ।
9. प्रत्यक्षम्, अनुमानम्।
10. दार्शनिकाः विषयाः।
11. ऋषभदेवः।
12. आर्हतमतम् ।
13. वर्धमानमहावीरः ।

## सूचनाग्रन्थौ(References)


1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणि दाहलाः, चौखम्बा कृष्णदास् अकादमि वारणासि,1998
2. सर्वदर्शनसंग्रहः, श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रम संस्कृतग्रन्थावलिः, चौखम्बा विद्याभवन्, वारणासि ।


## अधिकवाचनग्रन्थौ(Suggested Readings)


1. History of Indian Philosophy , Surendranath Das Guptha , Vol-III, MLBD, Varanasi
2. Indian Philosophy - Dr.S.Radhakrishnan, Vol- I & II, Varanasi, Delhi.
3. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal BanarsidassPublishers PrivateLimited, Delhi, 2000
4. Outlines of Indian Philosophy - Jadunath Sinha ,New Central Book agency, Culcutta, 1992.

BLOCK - 2

# सांख्यं योगं च

SGOU

# Unit 1
# सांख्यमते प्रमाणानि

## उद्देश्यानि(Learning Outcomes)

- दार्शनिकानां प्रमाणतत्वविचारविषयावगमनम् ।
- प्रकृतेः सिद्धिं जानाति।
- दुखःत्रयं जानाति।
- त्रिगुणानां स्वरूपकार्यप्रयोजनानि जानाति।

## प्राग्व्यपेक्षाः(Pre requisites)

दर्शनेषु अतिप्राचीनदर्शनमस्ति सांख्यम्। संख्यायन्ते गण्यन्ते तत्वानि येन तत् सांख्यम्। महामुनिः ईश्वरकृष्णेन विरचितं सांख्यकारिका। पञ्चविंशतितत्वानां विचार एवं सांख्यम्, तमधिकृत्य कृतो ग्रन्थः सांख्यकारिका। अर्थात् प्रकृत्ति पुरुषयोः पृथक् पृथक् संख्यानं एवं सांख्यम्।दर्शनेऽस्मिन् सृष्ट्याधारेणरूपेण द्वे तत्वे परिकल्प्यते- पुरुषः प्रकृतिः च। पुरुषः निर्विकारः सचेतनः किन्तु भेदाः अनेके। प्रकृतिः जडीभूता एका च विद्यते। जगतः उत्पत्तिः अनयोः संयोगादेव भवति। उत्पत्तिक्रियया तेषां आविर्भावः एव सञ्जायते। सांख्यदर्शनस्य अस्यां सिद्धान्तः सत्कार्यरूपेण प्रसिद्धिमवाप्नोत्। सत्वादिगुणानां महदादिकरणानां प्रकृतिपुरुषयोश्च वर्णनं अत्र क्रियते। सांख्यमतानुसारं कैवल्यप्राप्तिः कथं इति विशदयति।

## मुख्यपदानि (Key words)

दुःखत्रयं, दृष्टम्, अनुमानम्, आप्तवचनं, प्रमेयसिद्धिः, प्रमाणाः, प्रतिविषयाध्यवसायः, लिङ्गलिङ्गिपूर्वकम् आप्तश्रुतिराप्तवचनम्, व्यक्ताव्यक्तम्।

## Discussion

'संख्या' शब्दात् निष्पन्नम् अस्य दर्शनस्य सांख्यमितिनामधेयम्। संख्याशब्दस्य 'संख्या' 'ख्यातिः' चेति अर्थद्वयम्। 'संख्यायन्ते सम्यग्ज्ञायन्ते येन तत् सांख्यम्'। पञ्चविंशति

तत्वानिसंख्यायन्ते गण्यन्ते येन तत्सांख्यम्। प्रकृतिपुरुषान्यताख्यातिरूपोऽववोधोसंख्यायते सम्यग्ज्ञाप्यते येनेति वा तत्सांख्यम् ।

महाभारते उक्तं यथा-

'संख्यां प्रकुर्वते चैव प्रकृतिश्च प्रचक्षते ।

तत्वानि च चतुर्विंशत् तेन सांख्यम्प्रकीर्त्तितम् ।। इति ।

सांख्यसारे उक्तं यथा

'शुद्धात्मतत्वविज्ञानं सांख्यमित्यभिधीयते' इति ।

कपिलमुनिः सांख्यदर्शनस्य प्रथमः आचार्यः। सांख्यदर्शनस्य प्रामाणिको ग्रन्थः ईश्वरकृष्णविरचितासांख्यकारिका भवति। वाचस्पतिमिश्रेणविरचिता सांख्यतत्वकौमुदी सांख्यकारिकायाः प्रसिद्धव्याख्या भवति ।

## सांख्यकारिका

**दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ।**
**दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततो भावात्।।**

**सारांशः-**

तत्र दुःखत्रयम् आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकञ्चेति। तत्र आध्यात्मिकं द्विविधं -शारीरं मानसं चेति। शारीरं वातपित्तश्लेष्मविपर्ययकृतं ज्वरातीसारादि। मानसं प्रियवियोगाप्रियसंयोगादि। आधिभौतिकं चतुर्विधभूतग्रामनिमित्तं (जरायुजं, अण्डजं, उद्भिजं, स्वेदजम् इतिचतुर्विधभूतसमुदायोत्यम्) मनुष्यपशुमृगपक्षिसरीसृपदंशमशक-यूकामत्कुणमत्स्यमकरग्राहस्थावरेभ्यो जरायुजाण्डजस्वेदजोद्भिज्जेभ्य सकाशादुपजायत। आधिदैविकं - देवानामिदं दैवम्, दिवा प्रभवतीति वा दैवं, तदधिकृत्य (तन्निमित्तीकृत्येत्यर्थः) यदुपजायते शीतोष्णवातवर्षाशनि- पातादिकम्।तस्य दुःखत्रयस्य अभिघातको योऽसौ हेतुः तत्रेति। 'दृष्टे सापार्था चेत्, दृष्टे हेतो दुःखत्रयाभिघातके सा जिज्ञासाऽपार्था चेद्, यदि तत्राध्यात्मिकस्य द्विविधस्यापि आयुर्वेदशास्त्रक्रियया प्रियसमागमा प्रियपरिहार कटुतिक्त-कषायक्काथादिभिर्दृष्ट एव आध्यात्मिकोपायः, आधिभौतिकस्यरसादिनाऽभिघातो दृष्टः, दृष्टे

साऽपार्था चेदेवं मन्यसे; न, एकान्तात्यन्ततोऽभावात्। यत एकान्ततोऽवश्यम् अत्यन्ततो नित्यं दृष्टेन हेतुनाऽभिघातो न भवति, तस्मादन्यत्र एकान्तात्यन्ताभिघातके हेतौजिज्ञासा विविदिषा कार्येति ।

**दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।**

**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि।।४।।**

**सारांशः -**

एवमेषां व्यक्ताव्यक्तज्ञानां त्रयाणां पदार्थानां कैः कियद्भिः प्रमाणैः केन कस्य वा प्रमाणेन सिद्धिर्भवति, इह लोके प्रमेयवस्तु प्रमाणेन साध्यते।दृष्टं तथा श्रोत्रं,त्वक्, चक्षु, जिह्वा, घ्राणमिति पञ्च बुद्धीन्द्रियाणि, शब्द, स्पर्श,रूप, रस, गन्धा एषां पञ्चतन्मात्राणि, शब्दं श्रोत्रं गृह्णाति, त्वक् स्पर्शंगृह्णाति, चक्षुः रूपंगृह्णाति, जिह्वा रसंगृह्णाति, घ्राणं गन्धमिति, एतद् दृष्टमित्युच्यते प्रमाणम्। प्रत्यक्षेणानुमानेन वा योऽर्थो न गृह्यते स आप्तवचनाद् ग्राह्यः।प्रत्यक्षानुमानाग्राह्यं अपि आप्तवचनात् गृह्यते।

एतेषु प्रमाणेषु सर्वप्रमाणानि सिद्धानि भवन्ति। षट् प्रमाणानि जैमिनिः-'अर्थापत्तिः सम्भवः अभावः प्रतिभा ऐतिह्यम् उपमानं' इति षट् प्रमाणानि। तत्र अर्थापत्तिः द्विविध- दृष्टा, श्रुता च। दृष्टा - एकस्मिन् पक्षे आत्मभावो गृहीतश्चेदन्यस्मिन्नध्यात्मभावो गृह्यत एव। श्रुता यथा-दिवा देवदत्तो न भुङ्क्ते, अथ च पीनो दृश्यते, अतोऽवगम्यते रात्रौभुङ्क्त इति सम्भवो यथा-प्रस्थ इत्युक्ते चत्वारः कुडवाः सम्भाव्यन्ते। अभावो नाम प्रागितरेतरात्यन्त सर्वाभावलक्षणः। प्रागभावो यथा-देवदत्तः कौमारयौवनादिषु। इतरेतराभावः पटे घटाभावः। अत्यन्ताभावः खरविषाण वन्ध्यासुतखपुष्पवदिति। सर्वाभावः - प्रध्वंसाभावो दग्धपटवदिति। यथा शुष्कधान्यवर्शनाद् वृष्टेरभावोऽवगम्यते। एवमभावोऽनेकधा। प्रतिभा यथा-'दक्षिणेन च विन्ध्यस्य सह्यस्य च यदुत्तरम् ।

पृथिव्यामासमुद्रायां स प्रदेशोमनोरमः ॥'

एवमुक्ते तस्मिन् प्रदेशे शोभनाः गुणाः सन्तीति प्रतिभोत्पद्यते, प्रतिभा च जानतां ज्ञानमिति। ऐतिह्यं यथा-ब्रवीति लोको यथाऽत्र वटे यक्षिणि प्रतिसतीत्येव ऐतिह्यम्। उपमानं यथा-गौरिव गवयः, समुद्र इव तडागः।

एतानि षट् प्रमाणानि त्रिषु दृष्टादिष्वन्तर्भूतानि। तत्र अनुमाने तावदर्थापत्तिरन्तर्भूता, सम्भवाभावप्रतिभैतिह्योपमावाप्तवचने। तस्मात् त्रिष्वेव सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं, तदाह-तेन त्रिविधेन प्रमाणेन प्रमाणसिद्धिः भवतीति । वाक्यशेषः । प्रमेय सिद्धिः प्रमाणाद्धि। प्रमेयं प्रधानं बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि पुरुष इति, एतानि पञ्चविंशति तत्त्वानि व्यक्ताव्यक्त । इत्युच्यन्ते, तत्र किंचित् प्रत्यक्षेण साध्यं किंचिदनुमानेन किंचिदागमेनेति त्रिविधं प्रमाणमुक्तम् ।। ४ ।।

**प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।**
**तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनम् तु ।।५।।**

**सारांशः-**

प्रतिविषयेषु श्रोत्रादीनां शब्दादिविषयेषु अध्यवसायो दृष्टं, प्रत्यक्षमित्यर्थः।त्रिविधमनुमानमाख्यातं - पूर्ववत्, शेषवत्, सामान्यतोदृष्दं चेति। पूर्वमस्य अस्तीति पूर्ववद्, यथा- मेघोन्नत्या वृष्टिं साधयति पूर्वदृष्टत्वात्। दशेषवत् यथा - समुद्रादेकं जलपलं, लवणमासाद्य शेषस्याप्यस्ति लवणभाव इति। सामान्यतो दृष्टम्-देशान्तराद्देशान्तरं प्राप्तं दृष्टम् गतिमच्चन्द्रतारक चैत्रवत्, यथा चैत्रनामानं देशान्तराद्देशान्तरं प्राप्तमवलोक्य गतिमानयमिति तद्वच्चन्द्रतारकमिति। एतत् सामान्यतो दृष्टम्। किञ्च तल्लिङ्गलिङ्गि पूर्वकमिति, तदनुमानं लिङ्गपूर्वकं, यत्र लिङ्गेन लिङ्गी अनुमीयते। यथा- दण्डेन यतिः। लिङ्गिपूर्वकं च, यत्र लिङ्गिना लिङ्गमनुमीयते। आप्तश्रुतिराप्तवचनं च । आप्ता आचार्या ब्रह्मादयः, श्रुतिर्वेदः, आप्ताश्च श्रुतिश्च आप्तश्रुतिः,तदुक्तमाप्तवचनमिति। एवं त्रिविधं प्रमाणमुक्तम् ।

**सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।**
**तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥ ६ ॥**

**सारांशः-**

तत्र केन प्रमाणेन किं साध्यम् इति- सामान्यतो दृष्टाद् अनुमानाद् अतीन्द्रियाणाम् इन्द्रियाण्यतीत्य वर्तमानानां सिद्धिः। प्रधानपुरुषावतीन्द्रियौ सामान्यतो दृष्टेनानुमानेन साध्येते, - यस्मान्महदादिलिङ्गं त्रिगुणं, यस्येदं त्रिगुणं कार्यं तत् प्रधानमिति, यतश्चाचेतनं चेतनमिवाभाति अतोऽन्योधिष्ठाता पुरुष इति। व्यक्तं प्रत्यक्षसाम्यम्, तस्मादपि चासिद्ध परोक्षमाप्तागमात् सिद्धम्।

अत्र कश्चिदाह प्रधानं पुरुषो वा नोपसभ्यते यच्चनोपलभ्यते लोके तन्नास्ति तस्मात् तावपि न स्तः, यथा द्वितीयं शिरस्तृतीयो बाहुरिति । तदुच्यते-
अत्रसतामप्यर्थानामष्टधोपलब्धिर्न भवति ।

**अतिदूरात् सामीप्यादिन्द्रियषातान्मनोनिवस्थानाच्च।**
**सौक्ष्म्याद व्यवधानाभिभवात् समानाभिहारात्।।**

**सारांशः-**

अत्र सतामप्यर्थानामष्टधोपलब्धिनं भवति। तद् यथा इह सतामप्यर्थानामतिदूरत् अनुपलब्धिदृष्टा यथा-देशान्तरस्थानां चैत्रमैत्रविष्णुमित्राणाम्। सामीप्यात् यथा चक्षुषोऽञ्जनानुपलब्धिः। इन्द्रियाभिघाताद् यथा- बधिरान्धयो शब्दरूपानुपलब्धि। मनोऽनवस्थानाद् यथा- व्यग्रचित्तः सम्यक्कथितमपि नावधारयति। सौक्ष्म्याद् यथा- धूमोष्मजलनीहारपरमाणवो गगनगता नोपुलभ्यन्ते। व्यवधानाद् यथा कुड्योनापिहितं वस्तु नोपलभ्यते। अभिभवाद् यथा सूर्यतेजसाऽभिभूताः ग्रहनक्षत्रतारकादयः नोपलभ्यन्ते। समानाभिहाराद्यथा-मुद्गराशौ क्षिप्तः कुवलयामलकमध्येकुवलयामलके क्षिप्ते, कपोतमध्ये कपोतो नोपलभ्यते समानद्रव्यमध्याहृतत्वात् एवमष्टधानुपलब्धिः सतामर्थानामिह दृष्टा ।

## पुनरावृत्तिः (Recap)

- आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकम् इतिदुःखत्रयम्।
- दृष्टम्, अनुमानम्, आप्तवचनम् च त्रिविध प्रमाणमिति।
- त्रिविधेन प्रमाणेन प्रमाणसिद्धिः।
- अत्र अयं देशो भविष्यद्वृष्टिमान् मेघोन्नतिमत्त्वात् तद्देशवत्, समुद्र जलं क्षारमुदधिजलत्वादुद्धततज्ञलवत्, चन्द्रतारकं गतिमत् देशान्तरप्राप्तिमत्त्वा च्चैत्रवदिति क्रमेण त्रिविधस्यानुमानस्य प्रयोगा द्रष्टव्याः ।
- प्रमाणात् प्रमेयसिद्धिः भवति।
- यत् लिङ्गलिङ्गिपूर्वकम् ज्ञानम् अनुमानम्।
- अनुमानम् पूर्ववत्, शेषवत्, सामान्यतोदृष्टं भेदात् त्रिविधम्। ।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. सांख्यकारिकायाः कर्ता?
2. सांख्यदर्शनस्य प्रवक्ता कः?
3. दुःखत्रयं नाम किम्?
4. आध्यात्मिकं कति विधम्?कानि च तानि ?
5. प्रमाणं कति विधम् ?कानि च तानि?
6. दृष्टं इत्यस्य अर्थः?
7. अनुमानं कति विधम् ?कानि च तानि ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. दुःखं कति विधम्? कानि च तानि?
2. ज्ञानेन्द्रियं कति विधम् ?कानि च तानि?
3. कर्मेन्द्रियं कति विधम्? कानि च तानि?

SGOU

## एकैकया खण्डिकयाउत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. दुखःत्रयं प्रतिपादयत।
2. सांख्यमते प्रमाणानि विशदयत।
3. सांख्यमते प्रकृतिः प्रतिपादयत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. सांख्यदर्शने तत्वानि विशदयत ।
2. सांख्यदर्शनेपुरुषः प्रतिपादयत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. इश्वरकृष्णः।
2. कपिलमुनिः।
3. आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकम्।
4. द्विविधं, शारीरं मानसं च ।
5. त्रिविधम्, दृष्टंअनुमानं आप्तवचनं च ।
6. प्रत्यक्षम्।
7. त्रिविधम्, पूर्ववत् शेषवत् सामान्यतोदृष्टं च ।
8. अहङ्कारम् ।
9. बुद्धिः ।
10. व्यक्ताव्यक्तज्ञा ।
11. मनस् ।
12. प्रकृति ।
13. पृथ्वी, अप्, तेजस् वायु, आकाशम्।

## सूचनाग्रन्थाः(References)


1. Samkhykarikawithgoudapada commentary  Pt. Dhundhirajsastri,Chowkhamba Sanskrit Series Office, Varanasi.
2. Samkhyakarika of Isvarakrishna with the commentary of Gaudapada , Dr. T.G.Manikar , Oriental Book Agency Poona
3. Samkhyakarika with Samkhya TattvaKaumudi 1917.


## अधिकवाचनग्रन्थाः(Suggested Readings)


1. The Samkhykarika of Mahamuni Sri lwarakrishna, with the commentary sarabodhini of Pandit Sivanarayanasastri with Sankhyatattvakaumudi of Vachaspati misra.
2. SamkhykarikaIswarakrishnaPoshtacharya
3. SamkhykarikaIswarakrishnaP.Aravindhapisharadi

# Unit 2
# पञ्चविंशतितत्त्वानि, सत्कार्यवादः, पुरुषश्च

## उद्देश्यानि (Learning Outcomes)

- सांख्यमतमनुमृत्य पञ्चविंशतितत्वानि जानाति।
- प्रकृतेः सिद्धि जानाति।
- सांख्यमते पुरुषास्तित्वं पुरुषबहुत्वं च जानाति।
- सत्कार्यवादः ग्राह्यते।

## प्राग्व्यपेक्षा (Prerequisites )

दर्शनेषु अतिप्राचीनं दर्शनमस्ति सांख्यम्। संख्यायन्ते गण्यन्ते तत्त्वानि येन तत् सांख्यम्। महामुनिः ईश्वरकृष्णेन विरचिता सांख्यकारिका । पञ्चविंशतितत्वानां विचार एव सांख्यम्, तमधिकृत्य कृतो ग्रन्थः सांख्यकारिका। दर्शनेऽस्मिन् सृष्टयाधारेणरुपेण द्वे तत्वे परिकल्प्यते- पुरुषः प्रकृतिः च। पुरुषः निर्विकारः सचेतनः किन्तु भेदाः अनेके। प्रकृतिः जडीभूता एकाच विद्यते। जगतः उत्पत्तिः अनयोः संयोगादेव भवति। उत्पत्तिक्रियया तेषां आविर्भावः एवं सञ्जायते। सांख्यदर्शनस्य अस्यां सिद्धान्तः सत्कार्यरूपेण प्रसिद्धिमवाप्नोत्। सत्वादिगुणानां महदादिकरणानां प्रकृतिपुरुषयोश्च वर्णनं अत्र क्रियते। साख्यमतानुसारं कैवल्पप्राप्तिः कथं इति विशदयति।

## मुख्यविचाराः(Key words)

प्रकृतिः, पुरुषः, मूलप्रकृतिः अविकृतिः महत्तत्वं, अहङ्कारः,विकारः, प्रकृतिः, विकृतिः, पुरुषः, पञ्चविंशतितत्वानि, पुरुषसिद्धिः, सत्कार्यवादः, त्रिगुणानां स्वरुपः, सांख्यकारिका

## Discussions

**दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ।**
**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।।२॥**

सारांशः –

'यदि दृष्टादन्यत्र जिज्ञासा कार्या, ततोऽपि नैव, यत आनुश्रविको हेतु। दुःखत्रयाभिघातकः, अनुश्रूयते इत्यनुश्रवस्तत्र भवः, आनुश्रविकः, स च आगमात् सिद्धः। दृष्टेन तुल्यो दृष्टवत्, योऽसौ आनुश्रविकः, कस्मात् स दृष्टवद्?यस्मादविशुद्धिक्षयातिशययुक्तः। तद्विपरीतः श्रेयान्, ताभ्यां दृष्टानुश्रविकाभ्यां विपरीतः श्रेयान् प्रशस्यतर इति, अविशुद्धि-क्षयातिशयायुक्तत्वात्। स कथमित्याह - व्यक्ताव्यक्तज्ञविज्ञानात्। तत्र व्यक्तं महदादि बुद्धिरहङ्कारः, पञ्चतन्मात्राणि (शब्दः,स्पर्शः,रूपः,रसः,गन्धः), एकादशेन्द्रियाणि (पञ्च ज्ञानेन्द्रियं- श्रोत्रं,त्वक्,चक्षुः,जिह्वा घ्राणं) (पञ्च कर्मेन्द्रियं-वाक्,पाणि,पादः,पायु,उपस्थं) मनस्, पञ्चमहाभूतानि (पृथ्वि, अपः, तेजसः, वायु, आकाशः), अव्यक्तं प्रधानम्, ज्ञः पुरुषः एवमेतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञाः कथ्यन्ते, एतद्विज्ञानात् श्रेय इति। 'उक्तं च - 'पञ्चविंशतितत्त्वज्ञ' इत्यादि ।

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।**
**षोडशकस्तु विकारो न प्रकृतिर्नविकृतिः पुरुषः।।३।।**

सारांशः –

मूलप्रकृतिः प्रधानम् उच्यते - प्रकृति विकृतिसप्तकस्य मूलभूतत्वात्,मूलं च सा प्रकृतिश्च मूलप्रकृतिः, अविकृतिअन्यस्मात् न उत्पद्यते, तेन प्रकृतिः। महदाद्याःप्रकृतिविकृतयः सप्त। बुद्धिः, अंहङ्कारःपञ्च तन्मात्राणि एताः सप्त प्रकृतिविकृतयः। तद् यथा - प्रधानाद् बुद्धिरुत्पद्यते तेन विकृतिः प्रधानस्य विकार इति, स एवअहङ्कारमुत्पादयति अतः प्रकृतिः। अहंङ्कारोऽपि बुद्धेरुत्पद्यत इति विकृतिः, स च पञ्च तन्मात्राण्युत्पादयति इति प्रकृतिः । तत्र शब्दतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिः तस्मादाकाशमुत्पद्यत इति प्रकृतिः। तथा स्पर्शतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेव, वायुमुत्पादयतीति प्रकृतिः। गन्धतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेव पृथिवीमुत्पादयतीति प्रकृतिः।

रूपतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेव तेज उत्पादयति इति प्रकृतिः। रसतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेव अप् उत्पादयतीति प्रकृतिः। एवं महदाद्याः सप्त प्रकृतयो विकृत्यश्च। षोडशकस्तु विकारः; पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनः, पञ्च महाभूतानि एष षोडशको गणो विकृतिरेव विकारो विकृति। न प्रकृतिन विकृतिः पुरुषः।

**सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः ।**
**महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च ॥ ८ ॥**

सारांशः-

प्रधानं सौक्ष्म्यात् नोपलभ्यते यथाकाशे घूमोष्मजलनीहारपरमाणवः, सन्तोऽपिनोपलभ्यन्ते।कथं तर्हि तदुपलब्धिः?कार्यस्तदुपलब्धिःकार्यं दृष्ट्वाकारणमनुमीयते। अस्ति प्रधानं कारणं यस्येदं कार्यम्, बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतान्येव तत्कार्यम्। तच्च कार्यं प्रकृतिविरूपम् - प्रकृतिः प्रधानं तस्य विरूपं प्रकृतेरसदृशम्, सरूपं च समानरूपं च, यथा लोकेऽपि पितुस्तुल्य इव पुत्रो भवत्यतुल्यश्च। येन हेतुनातुल्यमतुल्यंतदुपरिष्टाद्वक्ष्यामः।

महदादिकार्यं यदिदं तत् किं प्रधाने सदुताहोस्विदत्वात् आचार्यविप्रतिपत्तेरयंसंशयः। यतोऽत्र सांख्यदर्शने सत्कार्यं,बौद्धादीनामसत्कार्यं, यदि सदसन्नभक्त्ययासत्सन्न भवतीति विप्रतिषेधः ।

**सत्कार्यवादः-**

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥ ९ ॥**

**सारांशः-**

असदकरणात्- न सदसदसतोऽकारणं तस्मात्सत्कार्यम्, इह लोकेऽसत्करणं नास्ति, यथासिंकताभ्यस्तैलोत्पत्तिः, तस्मात् सतः करणावस्ति प्रागुत्पत्तेः प्रधाने व्यक्तम्, अतः सत्कार्यम्। उपादानग्रहणात्-उपादानं कारणं तस्य ग्रहणात्, इह लोके यो येनार्थी स तदुपादानग्रहणं करोति दध्यर्थी क्षीरस्य न तु जलस्य तस्मात् सत्कार्यम्। इतश्च सर्वसम्भवाभावात्, सर्वस्य सर्वत्र सम्भवो नास्ति, यथा सुवर्णस्य रजतादौ तृणपांशुसिकतासु ।

तस्मात् सर्वसम्भवाभावात् सत् कार्यम्। इतश्च शक्तस्य शक्यकरणात् इह कुलालः शक्तो मृदुदण्डचक्रचीवर रज्जुनीरादिकरणोपकरणं वा शक्यमेव घटं मृत्पिण्डादुत्पादयति, तस्मात् सत्कार्यम्। कारणभावाच्च सत्कार्यम्- कारणं यल्लक्षणं तल्लक्षणमेव कार्यमपि, यथा यवेभ्योयवाः, व्रीहिभ्यो व्रीहया, यदाऽसत्कार्य स्यात्। एवं पश्चभिर्हेतुभिः प्रधाने महदादिलिङ्गमस्ति, तस्मात् सतः उत्पत्तिर्नास्ति इति ।

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।**
**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥**

**सारांशः-**

हेतुरस्यास्ति हेतुमत्, उपादानं हेतुः कारणं निमित्तमितिपर्यायाः, व्यक्तस्य प्रधानं हेतुरस्ति, अतो हेतुमत्। व्यक्तं भूतपर्यन्तम्, हेतुमद्बुद्धित्तत्त्वं प्रधानेन हेतुमानहङ्कारो बुद्धधा, पञ्चतस्मात्राणि एकादशेन्द्रियाणि हेतु- मन्त्यहङ्कारेण, आकाशं शब्दतन्मात्रेण हेतुमत्, वायुःस्पर्शतन्मात्रेण हेतुमान्, तेजोरूपतन्मात्रेण हेतुमद्, आपो रसतन्मात्रेण हेतुमत्यः, पृथिवी गन्धतन्मात्रेण हेतुमती एवं भूतपर्यन्तं व्यक्तं हेतुमत्।किञ्चान्यत् अनित्यं, यस्मादन्यस्मादुत्पद्यते घटः स च अनित्यः।यथा प्रधानपुरुषौ सर्वगतौ नैवं व्यक्तम्। किञ्चान्यत् सक्रियं, संसारकालेसंसरति-त्रयोदशविधेन करणेन सयुक्तं सूक्ष्मशरीरमाश्रित्य संसरति तस्मात् पञ्चतन्मात्राणि एकादशेन्द्रियाणि सक्रियम्। किंचान्यत् अनेकं, बुद्धिरहङ्कारः पञ्चमहाभूतानि चेति। किञ्चान्यत् आश्रितम्, स्वकारणमाश्रयते, प्रधानाश्रित बुद्धिः, बुद्धिमाश्रितोऽहङ्कारः बहङ्काराश्रितानि एकादशेन्द्रियाणि पञ्चतन्मात्राणि पञ्चतन्मात्राश्रितानि पञ्चमहाभूतानीति। किञ्च लिङ्गं लययुक्तं, लयकाले पञ्चमहाभूतानि तन्मात्रेषु लीयन्ते तान्येकादशेन्द्रियैः सहाहङ्कारे बुद्धौ सा प्रधाने लयं यातीति। तथा सावयवम्, अवयवाः शब्दस्पर्शरसरूपगन्धाः। किञ्च परतन्त्रं, नात्मनः प्रभवति यथा प्रधानतन्त्रो

बुद्धितन्त्रोऽहङ्कारः अहङ्कारतन्त्राणि तन्मात्राणीन्द्रियाणि न तन्मात्रतन्त्राणि पञ्च महाभूतानि च। एवं परतन्त्रं परायत्तं व्याख्यातं व्यक्तम् ।

अथोऽव्यक्तं व्याख्यास्यामः- विपरीतमव्यक्तम्। एतैरेव गुणैर्यथोक्तैर्विपरीतमव्यक्तम्, हेतुमद् व्यक्तमुक्तम्, न हि प्रधानाद् वरं किञ्चिदस्ति यह प्रधानस्यानुत्पत्तिः, तस्माद् हेतुमदव्यक्तम्। तथाऽनित्यं च व्यक्तं नित्यमव्यक्तम् अनुत्पाद्यत्वात् न हि भूतानीव कुतश्चिदुत्पद्यत इत्यव्यक्तं,प्रधानम्। किञ्चाव्यापि व्यक्तं,व्यापि प्रधानं सर्वगतत्वात्। सक्रियं व्यक्तमक्रियमव्यक्तं सर्वगतत्वादेव तथाऽनेकं व्यक्तमनेकं प्रधानं कारणत्वात्, त्रयाणां लोकानां प्रधानमेकं कारणं तस्मादेकं प्रधानम्। तथाश्रितं व्यक्तमनाश्रितमव्यक्तमकार्यत्वात्, न हि प्रधानात्किञ्चिदस्ति परं यस्य प्रधानं कार्यं स्यात्। तथा व्यक्तं लिङ्गम्, अलिङ्गमव्यक्तं नित्यत्वात्, महदादिलिङ्ग प्रलयकाले परस्परं प्रलीयते नैवं प्रधानं, तस्मादलिङ्गं प्रधानम् । तथा सावयवं व्यक्तं, निरवयवमव्यक्तं, न हि शब्दस्पर्शरसरूपगन्धाः प्रधाने सन्ति। तथा परतन्त्रं व्यक्तं, स्वतन्त्रमव्यक्तं प्रभवत्यात्मनः।

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**
**व्यक्तं तथा प्रधानंतद्विपरीतस्तथा च पुमान्।।११।।**

**सारांशः –**

एवं व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तं, साधर्म्यमुच्यते। त्रिगुणं व्यक्तं, सत्वरजस्तमांसि त्रयोगुणा यस्येति। पुमानित्येतद् व्याख्यायते तद्विपरीतः ताभ्यां व्यक्ताव्यक्ताभ्यां विपरीतः पुमान्। तद् यथा त्रिगुणं व्यक्ताव्यक्तञ्च, अगुणः पुरुषः। अविवेकि व्यक्ताव्यक्तं च विवेकि पुरुषः। तथा विषयो व्यक्ताव्यक्तं च विषयः पुरुषः।तथा सामान्यं व्यक्तमव्यक्तं च, असामान्यः पुरुषः। अचेतनं व्यक्ताव्यक्त च चेतनः पुरुषः, सुखदुःखमोहांश्चेतयति सञ्जानीते तस्माच्चेतनः पुरुषः इति।प्रसवधर्मि व्यक्तं प्रधानं च, अप्रसवधर्मी पुरुषः, तस्मादुक्तं तद्विपरीतःपुमानिति। तदुक्तं तथा च पुमान्, तद् यथा हेतुमदनित्यमित्यादि व्यक्तं तद्विपरीतमव्यक्तं, तत्र हेतुमत् व्यक्तम् अहेतुमद्प्रधानं तथा च पूमानहेतुमान् अनुत्पाद्यत्वात् ।

अनित्यं व्यक्त नित्यं प्रधानं , तथा च नित्यः पुमान्। अव्यापि व्यक्तंव्यापि प्रधानम्, तथा च पुमान् सर्वगतत्वात्। सक्रियं व्यक्तमक्रियं प्रधानम् तथा च पुमानक्रियः, सर्वगतत्वादेव अनेक व्यक्त अव्यक्तं तथा च पूमानप्यनेकः। लिङ्गं व्यक्तमलिङ्गं प्रधानं तथा च पूमानप्यलिङ्गःइति। सावयवं व्यक्तं निरवयवव्यक्तं तथा च पुमानप्यलिङ्गं। किंच परतन्त्रं व्यक्त स्वतन्त्रमव्यक्तं तथा च पुमानित्यादि स्वतन्त्रः आत्मनः प्रभवतीत्यर्थः।

**प्रीत्यप्रीतिर्विषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ।।१२।।**

**सारांशः –**

यत्र यदुक्तं 'त्रिगुणमिति व्यक्तमव्यक्तं च' तत् के ते गुणा इति तत्स्वरूपप्रतिपादनायेदमाह - प्रीत्यात्मका अप्रीत्यात्मका विषादात्मकाश्चंसि इति , गुणाः सत्त्वरजस्तमांसीत्यर्थः। तत्र प्रीत्यात्मकं सत्त्वं, प्रीतिः सुखं तदात्मकमिति । अप्रीत्यात्मकं रजः, अप्रोतिर्दुःखम्। विषादात्मकं तमः, विषादो मोहः। तथा प्रकाशप्रवृत्तिनियमार्थाः।अर्थशब्दः सामर्थ्यंत्राची, प्रकाशार्थं सत्त्वं, प्रकाशसमर्थमित्यर्थः। प्रवृत्त्यर्थं रजः, प्रवृत्तिसमर्थमित्यर्थः। नियमार्थं तमः स्थितौ समर्थमित्यर्थः। प्रकाश क्रियास्थितिशीला गुणा इति। अन्योन्याभिभवाः अन्योन्याश्रयाः अन्योन्यजननाः अन्योऽन्याभिधुनाः अन्योन्यवृत्तयश्च ते तथोक्ताः। अन्योऽन्याभिभवा इति अन्योऽन्यं परस्परमभिभवन्तीति, प्रीत्यप्रीत्यादिभि- र्धमैराविर्भवन्ति, यथा यदा सत्त्वमुत्कटं भवति तदा रजस्तमसी अभिभूय स्वगुणेन प्रीतिप्रका- शात्मकेनावतिष्ठते यदा रजस्तदा सत्त्वत्तमसी अप्रीतिप्रवृत्त्यात्मना धर्मेण, यदा तमस्तदा सत्त्वरजसी विषादस्थित्यात्मकेनइति। तथाऽन्योन्याश्रयाश्च द्व्यणुकवद् गुणाः। अन्योन्यजननाः- यथा मृत्पिण्डो घटं जनयति। तथाऽयोन्यमिथुनाश्च यथा स्त्रीपुंसौ अन्योन्यमिथुनाः तथा गुणाः ।

**सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।**
**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ।।**

**सारांशः –**

सङ्घातपरार्थत्वात् - योऽयं महदादिसङ्घातः स पुरुषार्थं इत्यनुमीयते, अचेतनत्वात् पर्यङ्कवत्। इदं शरीरं पञ्चानां महाभूतानां सङ्घातो वर्तते, अस्ति पुरुषो यस्येदं भोग्यंशरीरं भोग्यमहदादि सङ्घातरूपं समुत्पन्नमिति। त्रिगुणादिविषयात् यदुक्तं पूर्वं स्यामार्यायां "त्रिगुणमविवेकि विषय" इत्याति, तस्मात्विपर्यात्, येनोक्तं तद्विपरीतस्तथा च पुमान्। अधिष्ठानात्, य़थेह लङ्घनप्लवनधावनसमर्थैरश्वैर्युक्तो रथः रथिनाऽधिष्ठितः प्रवर्तते तथात्माऽधिष्ठानाच्छरीरमिति।षष्टितन्त्रे पुरुषाधिष्ठितं प्रधानं प्रवर्तते। भोक्तृत्वात्- य़था मधुराम्ललवणकटुतिक्तकषायषड् रसोपवृंहितस्य संयुक्तस्यान्नस्य साध्यते ,एवं महदादिलिङ्गस्य भोक्तृत्वाभावादस्ति स आत्मा यस्येदं भोग्ये शरीरमित।

कैवल्यार्थं प्रवृत्तेश्च-केवलस्य भावः कैवल्यंतन्निमित्तं या च प्रवृत्तिस्तस्याः स्वकैवल्यार्थे प्रवृत्तेः सकाशादनुमीयते - अस्त्यात्मेति, यतः सर्वो विद्वानविद्वांश्च संसारसन्तानक्षयमिच्छति। एवमेभिर्हेतुभिरस्त्यात्मा शरीराद् व्यतिरिक्तः।

**जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृतेश्च ।**
**पुरुषबहुत्वंसिद्धं त्रैगुण्यविपर्ययाच्चैव ।। १८ ॥**

**सारांशः –**

'अथ स किमेकः सर्वशरीरेऽधिष्ठाता मणिरसनात्मकसूत्रवत् आहोस्विद् बहव आत्मानः प्रतिशरीरमधिष्ठातार' इत्यत्रोच्यते- जन्म च मरणश्च करणानि च जन्ममरणकरणानि तेषां प्रतिनियमात्, प्रत्येकनियमादित्यर्थः। यद्येक एव आत्मा स्यात् तत् एकस्य जन्मनि सर्व एव जायेरन्, एकस्य मरणे सर्वेऽपि म्रियेरन्,एकस्यक्य करणवैकल्ये बाधिर्यान्धित्वमूकत्वकुणित्वख ञ्जत्वलक्षणे सर्वेऽपि बधिरान्धमूककुणिखञ्जाः स्युः, न चैवं भवति, तस्माज्जन्मरणकरणानां प्रतिनियमात् पुरुषबहुत्वं सिद्धम्। इतश्च अयुगपत्प्रवृत्तेश्च युगपदेककालं न युगपदयुगपत् प्रवर्तनं,. यत्मादयुगपद्धर्मादिषु प्रवृत्तिर्दृश्यते, एके धर्मे प्रवृत्ता अन्येऽधर्मे वैराग्येऽन्ये ज्ञानेऽन्ये प्रवृत्ताः, तस्मादयुगपत्प्रवृतेश्च बहव इति सिद्धम्। किञ्चान्यत् त्रैगुण्यविपर्ययाच्चैव

त्रिगुणभावविपर्ययाच्च पुरुषबहुत्वं सिद्धम्। यथा सामान्येजन्मनि एकः सात्त्विकः सुखो, अभ्या राजसो दुःखो, अन्यस्तामसो मोहवान् एवं त्रगण्यविषयंयावहुत्वं सिद्धिमिति।

**तस्माच्चविपर्यासात्सिद्धं साक्षित्वमस्यपुरुषस्य ।**
**कैवल्यंमाध्यस्थ्यं द्रष्टुत्वमकर्तृभावश्च ॥ १९ ॥**

**सारांशः –**

अकर्ता पुरुष इत्येतदुच्यते - तस्माच्च विपर्यासात्, तस्माच्च ययोक्तःत्रैगुण्यविपर्यासाद्विपर्ययात्- निर्गुणः पुरुषो विवेकी भोक्तेत्यादिगुणानां पुरुषस्य योविपर्यास उक्तस्तस्मात्, सत्त्वरजस्तमःसु कर्तृभूतेषु साक्षित्त्वं सिद्धं पुरुषस्येतियोऽयमधिकृतो बहुत्वं प्रति गुणा एव कर्तारः प्रवर्तन्ते, साक्षी न प्रवर्तते नापि निवर्तत एव। किश्चान्यत् कैवल्यं केवलभावः, कैवल्यमन्यत्त्वमित्यर्थः, त्रिगुणेभ्यः केवलोऽन्यः। माध्यस्थ्यं मध्यस्थभावः, परिव्राजकवत् मध्यस्थः पुरुषः। यथा कश्चित् परिव्राजको ग्रामीणेषु कर्षणार्थेषु प्रवृत्तेषु केवलो मध्यस्थः, पुरुषोऽप्येवं गुणेषु प्रवर्तमानेषु न प्रवर्तते। तस्मात् द्रष्टुत्वमकतृ 'भावश्च, यस्मान्मध्यस्थतस्माद्दृद्रष्टा तस्मादकर्ता पुरुषस्तेषां कर्मणामिति सत्त्वरजस्तमांसि त्रयो गुणाः कर्मकर्तृभावेन प्रवर्तन्ते न पुरुषः, एवं पुरुषस्यास्तित्वं च सिद्धम्।

**तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।**
**गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ २० ॥**

**सारांशः –**

'यस्मादकर्ता पुरुपस्तत्कथमध्यवसाय करोति धर्म करिष्याम्यधर्म न करिष्यामीत्यतः कर्ता भवति, न च कर्ता पुरुष एवमुभयथा दोषः स्यादिति', अतः उच्यते- इह पुरुषश्चेतनावान् तेन चेतनावभाससंयुक्तं महदादिलिङ्ग चेतनावदिव भवति, यथा लोके घटः शीतसंयुक्तः शीतः उष्णसंयुक्तः, एवं महदादि लिङ्गंतस्य संयोगात् पुरुषसंयोगाच्चेतनादिव भवति, तस्माद् गुणा

अध्यवसीय कुर्वन्ति न पुरुषः। यद्यपि लोके पुरुषः कर्ता, गन्तेत्यादि प्रयुज्यते तथाप्यकर्ता पुरुषः। कथम्? गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः। गुणानां कतृत्वे सति उदासीनोऽपि पुरुषः कर्तेव भवति न कर्ता । अत्र दृष्टान्तो भवति यथाऽचौरश्चौरै सह गृहीतश्चौर इत्यवगम्यत्ते, एवं त्रयो गुणाः कर्तारः तैः संयुक्तः पुरुषोऽकर्ताऽपि कर्ता भवति कर्तृ संयोगात् । एवं व्यक्ताव्यक्तज्ञानां विभागो विख्यातः यद्विभागान्मोक्षप्राप्तिरिति ।।२०।।

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानुस्य ।**

**पङ्ग्वन्धवधुभयोरपि संयोगस्तत्कृतः सर्गः ।।२१।।**

**सारांशः –**

'अर्थतयोः प्रधानपुरुषयोः किं हेतुः सङ्घातः' उच्यते-पुरुषस्थ प्रधानेन स संयोगो दर्शनार्थं - प्रकृति महदादिकार्यं भूतपर्यन्तं पुरुषः पश्यति एतदर्थम्, प्रधानस्यापि पुरुषेण संयोगः कैवल्यार्थम्, स च संयोगः पङ्ङ्ग्वन्धवदुभयोरपि दृष्टव्यः, यथा एकः पङ्गुरेकश्चान्ध एतौ द्वावपि गच्छन्तौ महता सामर्थ्येनाटव्य सार्थस्य स्तेनकृतादुपप्लवात् स्वबन्धुपरित्यक्तौ देवादितश्चेतश्च चेरतुः, स्वगत्या च तौ संयोगमुपयातौ पुनस्तयोः स्ववचसोविश्वस्तत्वेन संयोगो गमनार्थ दर्शनार्थ च भवति, अन्धेन पङ्गुः स्कन्धमारोपितः, एवं शरीरारूढ पङ्गुदर्शितेन मार्गेणान्धो याति पङ्गुश्चान्धस्कन्धारूढः, एवं पुरुषेणे दर्शनशक्तिरस्ति पङ्गुवन्न क्रिया प्रधाने क्रियाशक्तिरस्त्यन्धवन्न दर्शनशक्तिः। यथा वाऽनयोः पङ्ग्वन्धयोः कृतार्थंयोर्विभागो भविष्यतीप्सितस्थानप्राप्तयोः, एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा कर्ता निवर्तते पुरुषोऽपि प्रधानं दृष्ट्वा कैवल्यं गच्छति, तयोः कृतार्थयोर्विभागो भविष्यति। किञ्चान्यत् तत्कृतः सर्गः, तेन संयोगेन कृतस्तत्कृतः, सर्गः सृष्टिः, यथा स्त्रीपुरुषसंयोगात् सुतोत्पत्तिस्तथा प्रधानपुरुषसंयोगात् सर्गस्योत्पत्तिः।

## पुनरावृतिः (Recap)

- प्रमेयानि कश्चित् केवलप्रकृतिः, केचित् प्रकृतिविकृतयः केचित् केवलं विकृतयः केचित् न प्रकृतिः न विकृतिः।
- सांख्यशास्त्रे पञ्चविंशति तत्त्वानि सन्ति। प्रकृतिः, महत्, अहंकारः पञ्चतन्मात्राः (शब्द-रूप-रस-गन्ध-स्पर्शा) पञ्चज्ञानेन्द्रियाणि (श्रोत्रं-त्वक्-चक्षु-जिह्वा-घ्राण), पञ्चकर्मेन्द्रियाणि- (वाक्-पाणि-पाद-पायु-उपस्था), पञ्चभूतानि-(पृथ्वी-तेज-जल-वायु-आकाशः), मनश्च। पुरुषः।
- पदार्थानां अनुपलब्धेः कारणानि अतिदूरात् अतिसामिप्यात्, इन्द्रियपातात्, मनोनवस्थानात् ।
- सत्कारणादेव सत्कार्योत्तिःजायते।
- सत्कार्यवादस्य द्वे रूपे वर्तते परिणामवादः, विवर्तवादः।
- परिणामवादः यत्र कारणादुत्पन्नं कार्यं वास्तविकं भवति
- प्रकृतेः अतुलब्धिः सौक्ष्म्यात् भवति, न अभावात्। प्रकृतिः अचेतनः, जडस्वभावः । प्रकृतेः त्रिगुणाः, सत्वं, रजः, तमः।
- पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. सांख्यशास्त्रे कति तत्त्वानि सन्ति?
2. बुद्धेः किम् उद्भवति ?
3. पञ्चविंशतितत्वानि केन नाम्ना ज्ञायन्ते?
4. कस्मात् अहङ्कारः उद्भवति ?
5. उभयात्मकमिन्द्रियंकिम् ?
6. प्रधानस्य अपरं नाम किम्?
7. न प्रकृतिः न विकृत्ति कः?

8. विकारः कति विधः?
9. सांख्ये मोक्षस्य अपरंनाम किम्?
10. सांख्यमते कति गुणाः सन्ति?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. ज्ञानेन्द्रियाणि कति? कानि च तानि?
2. कर्मेंद्रियाणि कति? कानि च तानि?
3. एकादश इन्द्रियाणि कानि?
4. तन्मात्राणिकति?कानि च तानि?
5. प्रकृतिविकृतयः कति?कानि च तानि?
6. विकारः कति ?कानि च तानि ?

## निर्दिष्टाभ्यासाः(Assignments)

1. सांख्यमते (प्रमेयं) तत्वानि प्रतिपादयत।
2. सांख्यदर्शने पुरुषः निरूपयत।
3. सांख्यदर्शने प्रकृतिः प्रतिपादयत।
4. सांख्यमते तत्वानि विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. त्रिविधः
2. एकादश (११)
3. मनः

4. पञ्च (५)
5. त्रयोदश (१३)
6. पञ्चभूतानि
7. त्रीणि (३)
8. ज्ञानेन
9. प्रकृतिलयः
10. पुरुषः
11. षोडश
12. कैवल्यम्

## सूचनाग्रन्थाः(References)


1. Samkhykarika withgoudapada commentary Pt. Dhundhirajsastri,Chowkhamba Sanskrit Series Office, Varanasi.
2. Samkhyakarika of Isvarakrishna with the commentary of Gaudapada , Dr. T.G.Manikar , Oriental Book Agency Poona
3. Samkhyakarika with Samkhya TattvaKaumudi 1917.


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. The Samkhykarika of Mahamuni Sri lwarakrishna, with the commentary sarabodhini of Pandit Sivanarayanasastri with Sankhyatattvakaumudi of Vachaspati misra.
2. SamkhykarikaIswarakrishnaPoshtacharya
3. SamkhykarikaIswarakrishnaP.Aravindhapisharadi

# Unit 3
# योगलक्षणम्, पञ्चवृत्तयः,ईश्वरः

## उद्देश्यानि (Learning Outcomes)

- योगदर्शनम् प्रति ज्ञानम् लभते।
- योगदर्शनस्य प्रमाणानि ग्राहते।
- योगदर्शने ईश्वरः इति ज्ञानं अवगाहते ।

## प्राग्व्यपेक्षाः:(Prerequisites)

युजिर् योगे' इति धातोः योगपस्य निष्पत्तिः। योगः समाधिरिति। युज् समाधौ इत्यस्मत्व्युत्पत्रः समाधि अर्थो न तु युजिर् योगे इत्यस्मात् संयोगार्थ भवति। श्रीमद् पतञ्जलेनविरचितं योगसूत्रम्। पतञ्जलि महर्षेः योगसूत्राणि एव योगदर्शनस्य आधारः।तस्य रचनाकालःक्रिस्तोः पूर्वं400शतके इति मन्यते। तत् दर्शनं सेश्वरसाख्यं इत्यपि उच्यते। ईश्वरश्च पुरुषविशेषः। श्री वाचस्पतिमिश्रोऽपि योगभाष्यस्योपरि तत्ववैशारदी नाम्नीं टीकां रचितवान्। इदं योगदर्शनं पादचतुष्टयात्मकं अस्ति। प्रथमे समाधिपादे51सूत्राणि सन्ति। तस्मिन् पादे योगस्वरूपस्य विस्तृतं निरुपणम्। साधनापादे 55 सूत्राणिसन्ति। साधनपादे क्रियायोगः तत्वसाधनानि यमादीनि च। तृतीय विभूतिपादे 55 सूत्राणि सन्ति। तस्मिन् पादे ध्यानधारणासमाधिरूपं संयमपद व्यपदेश्यम्। चतुर्थे कैवल्यपादे 34सूत्राणि सन्ति। व्यपारे जन्मौषधि मन्त्रतपःसिद्धिपञ्चकं तत् सम्बन्धं कैवल्यस्वरूपं परमप्रयोजनम् निरूपितम्।
अथ योगस्य दार्शनिकचिन्ता प्रस्तौति । इदानीं योगस्य लक्षणम्। योगस्य प्रमाणानि। ईश्वरस्वरूपं, अष्टाङ्गयोगः कैवल्यं तान् अधिकृत्य विचारः क्रियते।

## मुख्यविचाराः(Key Concepts)

चित्तवृत्तिनिरोधः, चितभूमयः, वृत्तयः, प्रमाणानि, असंप्रज्ञातः, सम्प्रज्ञातः, योगाङ्गानि,ईश्वरः, कैवल्यम्।

## Discussions

### अथ योगानुशासनम्।

अथ इति अधिकारार्थः। योगानुशासनमधिकृतं वेदितव्यम्। योगः समाधिः। स च सार्वभौमचित्तस्य धर्मः। चितस्यसहजप्रवृत्तिः एवं चित्तभूमिः। चित्तभूमयः तु-क्षिप्तं, मूढं, विक्षिप्तं, एकाग्रं,निरुद्धमिति च। क्षिप्तं सदैव रजसा तेषु विषयेषु क्षिप्यमाणं अत्यन्तमस्थिरम्। एतादृक् चित्तं तु दैत्यानां दानवानां मदोद्भ्रान्त विषयीजनानांवा भवति। मूढं तुतमः समुद्रेकात् निद्रावृत्तिमत्। मूढं तमसा निद्रादिविवृत्तिमत्। अस्यां दशायां विचारहीना, किंकर्तव्यविमूढता चाञ्चल्यं च जायते। यथा- राक्षस- पिशाचादिकेषु दरिदृत्यते। क्षिप्ताद् विशिष्टं विक्षिप्तम्। ईदृशं चित्तं तु देवानां योगिनां वा भवति।एकाग्रचित्तभूमिः तु यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति, क्षिणोति, च क्लेशान्, कर्मबन्धनानि श्लथयति, निरोधमभिमुखं करोति, म सम्प्रज्ञातो योग इत्याख्यायते। निरुद्धचित्तभूमिः तु सर्ववृत्तिनिरोधे त्वसम्प्रज्ञातः समाधिः। स निर्बीजः समाधिः, न तत्र किञ्चित् सम्प्रज्ञायते इत्यसम्प्रज्ञातः।

### योगश्चित्तवृत्तिनिरोधः।

सर्वशब्दाग्रहणात् संप्रज्ञातोऽपि योग इत्याख्यायते। चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात्रिगुणम्। प्रख्यारूपं हि चित्तसत्वं रजस्तमाभ्यां संसृष्टं ऐश्वर्यविषयप्रियं भवति। तदेवतमसाऽनुविद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भवति। तदेव प्रक्षीणमोहावरणं सर्वत्तः प्रद्योतमानमनुविद्धंरजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति।तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्वपुरुषान्यताख्यातिमात्रं धर्ममेधध्यानोपगं भवति। तत्परंप्रसंख्यानमित्याचक्षते ध्यायिनः। चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धचानन्ता च सत्वगुणात्मिका च इयं अतो विपरीता विवेकख्यातिरिति। अतः तस्यां विरक्तं चित्तं तामपि ख्यातिं निरुद्धि। तदवस्थां संस्कारोपगं भवति। स निर्बीजः समाधिः। न तत्र किंचित् संज्ञात इति असंप्रज्ञातःद्विविधः योगचित्तवृत्तिनिरोधः इति।

### वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः।

क्लेशहेतुकाः कर्माशयप्रचये क्षेत्रीभूताः क्लिष्टाः। ख्यातिविषया गुणाधिकारविरोधिन्योऽक्लिष्टाः। क्लिष्टप्रवाहपतिता अप्यक्लिष्टाः। क्लिष्टच्छिद्रेष्वप्यक्लिष्टा

भवन्ति। अक्लिष्टच्छिद्रेषु क्लिष्टा इति। तथाजातीयकाः संस्कारा वृत्तिभिरेव क्रियन्ते। संस्कारैश्च वृत्तय इति। एवं वृत्तिसंस्कारचक्रमनिशमावर्तते। तदेवंभूतं चित्तपसिताधिकारमात्मकल्पेन व्यवतिष्ठते मलयं वा गच्छतीति। ताः क्लिष्टाश्चाक्लिष्टाश्च पञ्चधा वृत्तयः।

**प्रमाणविपर्ययविकल्पनिद्रास्मृतयः।**

वृत्तयः तु प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतिः।

**प्रत्याक्षानुमानागमाः प्रमाणानि।**

इन्द्रिय प्रणालिकया चित्तस्य बाह्यवस्तूपरागात्तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम्। फलमविशिष्टः पौरुषेयचित्तवृत्तिबोधः प्रतिसंवेदी पुरुषइत्युपरिष्टादुपपादयिष्यामः।

अनुमेयस्य तुल्यजातीयेष्वनुवृत्तो भिन्नजातीयेभ्यो व्यावृत्तः संबन्धो यस्तद्विषया सामान्यावधारणप्रधाना वृत्तिरनुमानम्। यथा देशान्तरप्राप्तेर्गतिमच्चन्द्रतारकं चैत्रवत्, विन्ध्यश्चाप्राप्तिरगतिः। आप्तेन दृष्टोऽनुमितो वाऽर्थः परत्र स्वबोधसंक्रान्तये शब्देनोपदिश्यते, शब्दात्तदर्थविषया वृत्तिः श्रोतुरागमः। यस्याश्रद्धेयार्थो वक्ता न दृष्टानुमितार्थः स आगमः प्लवते। मूलवक्तरि तु दृष्टानुमितार्थे निर्विप्लवः स्यात्।

प्रमा करणं प्रमाणं। अत्र इन्द्रिय प्रणालिकया चित्तस्य बाह्यवस्तुपरागात् तद् विषया सामान्य विशेषात्मनः अर्थस्य विशेषावधारणप्रधानवृत्तिः प्रत्यक्षं प्रमाणम्। फलविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः। अनुमेयस्य तुल्यजातियेषु अनुवृत्तो भिन्नजातीयेभ्यो व्यावृत्तः सम्बन्धो यः तद् विषया सामान्यवधारणप्रधाना वृत्तिः अनुमानम्। आप्तेन दृष्टः अनुमितो वा अर्थः परत्र स्वबोध संक्रान्तये शब्देन उपदिश्यते, शब्दाः तदर्थविषयावृत्तिः श्रोतुरागमः।

**विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्।**

स कस्मान्न प्रमाणम्। यतः प्रमाणेन बाध्यते। भूतीर्थविषयत्वात्प्रमाणस्य। तत्र प्रमाणेन बाधनप्रमाणस्य दृष्टम्। तद्यथाद्वितन्द्रदर्शनं सद्विषयेणैकचन्द्रदर्शनेन बाध्यत इति।

सेयं पञ्चपर्वा भवत्यविद्या, अविद्यास्मितारागद्वेषाभिनिवेशाःक्लेशा इति। त एव स्वसमज्ञाभिस्तमो मोहो महामोहस्तामिस्रोऽन्दतामिस्र इति। एते चित्तमलप्रसङ्गेन अभिधास्यन्ते।

विपर्यय इति लक्ष्यनिर्देशः। मिथ्याज्ञानम् इत्यादि लक्षणम्। यज्ज्ञानप्रतिभासिरूपं, तद्रूपप्रतिष्ठमेवातद्रूपप्रतिष्ठम्। अविद्यारूपं मिथ्याज्ञानं एव विपर्ययः। इयमविद्या तु पञ्चपर्वात्मिका भवति। अविद्या-अस्मिता-राग-द्वेष- अभिनिवेशाः क्लेशैः इति। एत एव स्व संज्ञाभिः तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्र इति।

### शब्दज्ञानानुपाति वस्तुशून्यो विकल्पः।

स न प्रमाणोपरोहि न विपर्ययापरोहि च। वस्तुशून्यत्वे अपि शब्दज्ञानमाहात्म्यो निबन्धनो व्यवहारः दृश्यते। तद्यथा चैतन्यं पुरुषस्य स्वरूपं इति। यदा चितिरेव पुरुषस्तदा किमत्र केन व्यपदिश्यते भवति च व्यपदेशे वृत्तिर्यथा चैत्रस्य गौरिति।

भवति च व्यपदेशे वृत्तिः। यथा चैत्रस्य गौरिति। यथा प्रतिषिद्धवस्तुधर्मो निष्क्रियः पुरुषः, तिष्ठति बाणःस्थास्यति स्थित इति, गतिनिवृत्तौ धत्वर्थमात्रं गम्यते। तथाऽनुत्पत्तिधर्मा पुरुष इति उत्पत्तिधर्मस्याभावमात्रमवगम्यते न पुरुषन्वयी धर्मः। तस्मात्विकल्पितः स धर्मस्तेन चास्ति व्यवहार इति ।

### अभावप्रत्ययालम्बना वृत्तिर्निद्रा।

सा च संप्रबोधे प्रत्यवमर्शात् प्रत्ययविशेषः। यथा- सुखमहम् अस्वाप्सम्। प्रसन्नं मे मनः प्रज्ञां मे विशारदी करोति। दुःखमहमस्वाप्सं स्त्यानं मे मनो भ्रमत्यनवस्थितम्। गाढं मूढोऽहमस्वाप्सम्। गुरुणि मे गात्राणि।क्लान्तं मे चित्तम्। अलसं मुषितमिव तिष्ठतीति। स खल्वयं प्रबुद्धस्य प्रत्यवर्मशो न स्वादसति प्रत्ययानुभवे तदाश्रिताः स्मृतयश्च तद्विषया न स्युः। तस्मात् प्रत्ययविशेषो निद्रा।सा च समाधावितरप्रत्ययवन्निरोद्धव्येति ।

### अनुभूतिविषयासंप्रमोषः स्मृतिः।

किं प्रत्ययस्य चित्तं स्मरति आहोस्विद्विषयस्येति। ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासस्तज्जातीयकं संस्कारमारभते। स संस्कारः स्वव्यञ्जकाञ्जनस्त-दाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति। तत्र ग्रहणाकारपूर्वा बुद्धिः। ग्राह्याकारपूर्वा स्मृतिः। सा च द्वयी- भावितस्मर्तव्या चाभावितस्मर्तव्या च। स्वप्ने चाभावितस्मर्तव्या। जाग्रतसमये त्वभावितस्मर्तव्येति। इमाः सर्वाः स्मृतयः प्रमाणविपर्ययविकल्पनिद्रास्मृतीनां अनुभवाद् प्रभवन्ति।सर्वासु एताः वृत्तयः सुख-दुःखमोहात्मिकाः। तत्र सुखानुशयी रागः।

दुःखानुशयी द्वेषः, मोहः पुनरविधेति।एताः सर्वाः वृत्तयः निरोद्धव्याः। आसां निरोधे सम्प्रज्ञातोवा समाधिः भवति असम्प्रज्ञातो वा इति।

**अभ्यासवैराग्याभ्यां तन्निरोधः।**

चित्तनदी नामोभयतोवाहिनी वहति कल्याणाय वहतिपापायच। या तु कैवल्यप्राग्भाराविवेकविषयनिम्ना सा कल्याणवहा। संसारप्राग्भाराऽविवेकविषयनिम्ना पापवहातत्र वैराग्येण विषयस्रोतःखिली क्रियते। विवेकदर्शनाभ्यासेन विवेकस्रोत उद्घड्य इत्युभयाधीनश्चित्तवृत्तिनिरोधः।

**तत्र स्थितौ यत्नोऽभ्यासः।**

चित्तस्यावृत्तिकस्य प्रशान्तवाहिता स्थितिः। तदर्थः प्रयत्नोवीर्यमुत्साहः। तत्संपिपादविषया तत् साधनानुष्ठानमभ्यासः।

**दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्।**

स्त्रियोऽन्नपानमैश्वर्यमिति दृष्टविषये वितृष्णस्य स्वर्गवैदेह प्रकृतिलयत्व प्राप्तावानुश्रविकविषये वितृष्णस्य दिव्यादिव्यादिविषयसंप्रयोगः अपि चित्तस्य विषयदोषदर्शिनः प्रसंख्यानबलादनाभोगात्मिका हेयोपदेशून्या वशीकारसंज्ञा वैराग्यम्।

**वितर्कविचारानन्दास्मितारूपानुगमात्संप्रज्ञातः।**

वितर्कश्चित्तस्याऽऽलम्बने स्थूल आभोगः। सूक्ष्मो विचारः। आनन्दोऽह्लादः। एकात्मिका संविदस्मिता। तत्र प्रथमः चतुष्टयानुगतः समाधिः सवितर्कः। द्वितीयो वितर्कविकलः सविचारः। तृतीयो विचारविकलः सानन्दः। चतुर्थः तत् विकलोऽस्मितमात्र इति। सर्व एते सालम्बनाः समाधयः।

**विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः।**

सर्ववृत्तिसर्वप्रत्यस्तमये संस्कारशेषो निरोधचित्तस्य समाधिः असम्प्रज्ञातः। तस्य परं वैराग्यमुपायः। सालंम्वनो ह्यभ्यासस्तत्साधनाय न कल्पत इति विरामप्रत्ययोमिर्वस्तुक आलम्बनी क्रियते। स चार्थशून्यः। तदभ्यासपूर्वकं हि चित्तं निरालम्बनमभावप्राप्तमिव भवतीत्येष निर्बीजः समाधिरसंप्रज्ञातः।

**ईश्वरप्रणिधानाद्वा।**

प्रणिधानात् भक्तिविषादावर्जित ईश्वरः तम् अनुगृह्णाति अभिध्यानमात्रेण। तत् अभिध्यानमात्रात् अपियोगिनः आसन्नतमः समाधिलाभः समाधिफलं च भवति इति।सुख-दुःखमोहात्मकं एतत् जातीयकं भोगमात्रम् सत्वरजतमोगुणात्मकत्वात्। तत्रापि दुःखानां एव आधिक्यम्।

क्लेशकर्मविपाकाशैरपरामृष्टः पुरुषविशेष ईश्वरः।

अविद्यायाः क्लेशाः। कुशलाकुशलानि कर्माणि। तत्फलं विपाकाः। तदनुगुण वासना आशयाः। ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते, स हि तत् फलस्य भोक्ता इति। यथा जयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते। यो हि अनेन भोगेन परामृष्टा स पुरुषविशेषः ईश्वरः। स तु सदैव मुक्तः सदैव इश्वरः इति। तत् च तस्य ऐश्वर्यं साम्यातिशयविनिर्मुक्तम्।

कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः। ते हि त्रीणि बन्धनानि च्छित्वा कैवल्यं प्राप्ता ईश्वरस्य च तत्सम्बन्धो न भूतो नभावि। यथा मुक्तस्य पूर्वा बन्धकोटिः प्रज्ञायते नैवमाश्वरस्य। यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटिः संभाव्यते नैवमीश्वरस्य। स तु सदैव मुक्तः सत् एव ईश्वरः इति ।

योऽसौ प्रकृष्टसत्वोपादानादीश्वरसदैवेश्वरः सदैव स्य शाश्वतिक उत्कर्षः स किं सनिमित्त आहोस्विन्निर्निमित्त इति। तस्य शास्त्रं निमित्तम्। शास्त्रं पुनः किं निमित्तं, प्रकृष्टसत्वनिमित्तम्।

एतयोः शास्त्रोत्कर्षयोरीश्वरसत्वे वर्तमानयोरनादिः संबन्धः। एतस्मादेतद्भवति सदैवेश्वरः सदैव मुक्तइति। तच्च तस्यैश्वर्यं साम्यातिशयविनिर्मुक्तम्। न तावदैश्वर्यान्तरेण तदतिशय्यते। यदेवातिशयि स्यात्तदेव तत्स्यात्। तस्माद्यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वर इति। न च तत्समानमैश्वर्यमास्ति। कस्मात्,द्वयोस्तुल्ययोरेकस्मिन्युगपत्कामितेऽर्थे नवमिदमस्तु पुराणमिदमस्त्वित्येकस्य सिद्धावितरस्य प्रकाम्यविधातादूनत्वं प्रसक्तम्। द्वयोश्च तुल्ययोर्युगपत्कामितार्थप्राप्तिर्नास्ति। अर्थस्य विरुद्धत्वात्। तस्मद्यस्य साम्याति-शैर्विनिर्मुक्तमैश्वर्य स एवेश्वरः। स च पुरुषविशेष इति।

तावत् ऐश्वर्यान्तरेण तददतिशय्यते। यत् एवं अतिशयि स्यात् तदेव तत् स्यात्। तस्मात् अद्या अत्र काष्ठप्राप्तिः ऐश्वर्यस्य स ईश्वर इति। न च तत् समानमैश्वर्यमस्ति। तस्मात् अद्य अस्य साम्यात् अतिशयैः विनिर्मुक्तं ऐश्वर्यं स एव ईश्वरः।

**पूर्वेषामपि गुरुः कालेनानवच्छेदात्।**

पूर्वे हि गुरवः कालेनामवच्छेद्यन्ते। यन्नावच्छेदार्थेन कालोन्नोपावर्तते स एष पूर्वेषामपि गुरुः। यथाऽस्य सर्गस्यऽऽदौ प्रकर्षगत्या सिद्धस्तथाऽतिक्रान्तसर्गादिष्विव प्रत्येतव्यः।

**तस्य वाचकः प्रणवः।**

वाच्य ईश्वरः प्रणवस्य। किमस्य संकेतकृतं वाच्यवाचकत्वमथ प्रदीपप्रकाशवदवस्थितं इति। स्थितोऽस्य वाच्यस्य वाचकेन सह संबन्धः। संकेतस्त्वीश्वरस्य स्थितमेवार्थम् अभिनयति। यथाऽवस्थितः पितापुत्रयोः संबन्धः संकेतेनावद्योत्यते, अयमस्य पिता , अयमस्य पुत्र इति। सर्गान्तरेष्वपि वाच्यवाचकशक्त्यपेक्षस्तथैव संकेतः क्रियते। संप्रतिपत्तिनित्यतया नित्यः शब्दार्थसंवन्ध इत्यागमिनःप्रतिजानते । तस्य परमगुरोः ईश्वरस्य वाचकः प्रणतः एव अस्ति।

विज्ञातवाच्यवाचकत्वस्य योगिनः -

**तज्जपस्तदर्थभावनम्।**

प्रणवस्य जपः प्रणवाभिधेयस्यच ईश्वरस्य भावनम्। तद् अस्य योगिनः प्रणवंजपतः प्रणवार्थं च भावयतः चित्तमेकाग्रंसंपद्यते।योगदर्शनस्य परमप्रयोजनं तु समाधिलाभः एव अस्ति।

तथा चोक्तम्—

स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् ।
स्वाध्याययगदसंपत्या परमात्मा प्रकाशते ।इति

## पुनरावृत्तिः(Recap)

- चित्तभूमयः-क्षिप्तं, मूढं, विक्षिप्तं, एकाग्रं, निरुद्धचित्तभूमिः च।
- क्षिप्तं- सादैव तेषु विषयेषु क्षिप्यमाणां अत्यन्तमस्थिरम्।
- मूढं-तमः समुद्रेकात् निद्रावृत्तिमत्

- विक्षिप्तचितभूमिः- चिप्ताद विशिष्टं विजितम्।
- एकाग्रचित्तभूमिः- यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति, क्षिणोति, च क्लेशान् कर्मबन्धनानि ष्लथयति, निरोधमभिमुखं करोति, सम्ज्ञातो योग इत्याख्यायते।
- निरुद्धचितभूमिः- सर्ववृत्तिनिरोधे त्वसम्प्रज्ञातः समाधिः।
- चित्तवृत्तिनिरोधः योगः।
- क्लिष्ट अक्लिष्ट भेदात् चित्तवृतयः पञ्चविधाः- प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतिः प्रत्याक्षानुमानागमाः प्रमाणानि।
- यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि।

**वस्तुनिष्ठप्रश्नाः(Objective type questions)**

1. चित्तवृत्तिनिरोधः कः?
2. चित्तवृत्तयः कति?
3. योगदर्शनानुसारं प्रमाणानि?
4. समाधौ कौ?
5. स्थिरसुखम् किम्?
6. क्लेशहेतुकाः कर्माशयप्रचये क्षेत्रीभूताः?
7. योगाङ्गानि कति?

**एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत**
(Answer the following questions in one or two sentences)

1. समाधिः कति? तस्य लक्षणं किम्?
2. अष्टाङ्गानि कानि?
3. प्रत्यक्षप्रमाणस्य लक्षणं?
4. अनुमानप्रमाणस्य लक्षणं?
5. आप्तप्रमाणस्य लक्षणं?

## एकैकया खण्डिकया उत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. योगदर्शने अङ्गानि विशदयत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. ईश्वरस्वरूपं निरूपयत।
2. योगाङ्गानि विशदयत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. योगः।
2. पञ्च
3. प्रत्याक्षानुमानागमाः
4. संप्रज्ञातः, असंप्रज्ञातःच
5. आसनम्
6. क्लिष्टाः
7. अष्टा

## सूचनाग्रन्थाः(References)


1. पातञ्जलयोगसूत्राणि, हरि नारायण आपटे, आनन्दाश्रमसंस्कृतग्रन्थावलिः, 1904
2. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६


## अधिकवाचनग्रन्थौ(Suggested Readings)


1. Patanjalayogasutra of Patanjali
2. Yogasutram of prof. M Krishnan
3. Patanjali Yoga sutras: Sanskrit text with transliteration, translation & commentary by Swami Vivekananda.

# Unit - 4

# अष्टाङ्गमार्गः

## उद्देश्यानि(Learning Outcomes)

- योगाङ्गानि जानाति।
- योगसिद्धिं प्रति अवगच्छति।
- योगदर्शनस्य महत्वं जानाति।
- नूतनपदज्ञानं लभते।
- योगाशास्त्रास्याध्ययनं तदनुसारं सम्यगाचरणं मानवजीवनस्य उद्धाराय स्वस्थसुखप्रापणाय चप्रेरयति।

## प्राग्व्यपेक्षा(Pre Requesites)

सकलभारतीयदर्शनेषु योगस्य स्थानप्रतिमं वर्तते। इदं दर्शनं व्यवहारिकज्ञानपूर्वककर्ममार्गस्य शिक्षां प्रददाति। अस्य योगदर्शनस्य आचार्यः महर्षिः पतञ्जलिः भवति। योगशास्त्रप्रतिपादिताः क्लेशाः- अविद्या- अस्मिता- राग- द्वेष- अभिनिवेशाः। एते पञ्चक्लेशाः मानवानां कृते दुःखप्रदायकाः च सन्ति, सर्वेषां दुःखानां मूले विवेकभावः एवास्ति। विवेकसिद्धये पातञ्जलयोगदर्शने योगस्य अष्टाङ्गिककर्माणि वर्णितानि। योगाङ्गानि अष्टावभिधयिष्यमाणानि। तेषां अनुष्ठानात् पञ्चपर्वणो विपर्ययस्यशुद्धिरूपस्य क्षयो नाशः। तत् क्षये सम्यग्ज्ञानस्याभिव्यक्तिः। यथा यथा च साधनान्यनुष्ठीयन्ते तथा तथा तनुत्वमभुद्धिरापद्यते। यथा यथा क्षीयते तथा तथा क्षयाक्रमानुरोधिनि ज्ञानस्यापि दीप्तिर्विवर्धते। सा खल्वेषा विवृद्धिः प्रकर्षमनुभवत्या विवेकख्यातेः, आगुणपुरुषस्वरूप विज्ञानादित्यर्थः। योगाङ्गानुष्ठानमशुद्धेर्वियोगकारणम्। यथा परशुश्छेद्यस्य विवेकख्यातेषु प्राप्तिकारणं यथा धर्मःसुखस्य नान्यथा कारणम्। शाखे च इतानि कारणानि नव एव। तत्रोत्पत्तिकारणं मनो भवति विज्ञानस्य, स्थितिकारणं मनसः पुरुषार्थता, शरीरस्य एव

आहार इति। अभिव्यक्तिकारणं यथा रुपस्याऽलोकस्तथा रूपज्ञानं, विकारकारणं मनतो विषयान्तरम्। यथाऽग्निः पाक्यस्य । प्रत्ययकारणं धूमज्ञानमग्नितज्ञानम्य । प्राप्तिकारणं योगाङ्गानुष्ठानं विवेकख्यातेः।वियोगकारणं तदेवाशुद्धेः। अन्यत्वकारणं यथा सुवर्णस्य सुवर्णकारः। एवमेकस्यस्त्रीप्रत्ययस्याविद्या मूढत्वे द्वेषो दुःखत्वे रागः सुखत्वे तत्त्वज्ञानं माध्यस्थे। धृतिकारणं शरीरमिन्द्रियाणां। तानि च तस्य। महाभूतानि शरीराणां, तानि च परस्परं सर्वेषां तैर्यग्यानमानुषदैवतानि च परस्परार्थन्तरेष्वपि योजनानि। योगानुष्ठानं तु द्विधैव कारणत्वं लभत इति। ततः योगाङ्गानि अवधार्यन्ते।

**मुख्यविचाराः(Key Concepts)**

यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिः, संयमः, योगसिद्धयः, कैवल्यम्।

## Discussion

## योगाङ्गानि

**यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि।**

तत्र अष्टाङ्गानि- यमः, नियमः आसनम्, प्राणायामः प्रत्याहारः, धारणा, ध्यानम्, समाधिः । यथाक्रमं एषां अनुष्टानं स्वरूपं च वक्ष्यामः ।

**अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।**

तत्र अहिंसा सर्वथा सर्वदा सर्वभूतानामभिद्रोहः। उत्तरे च यमनियमास्तन्मूलास्तत्सिद्धिपरतयैव तत्प्रतिपादनायप्रतिपाद्यन्ते। तदवदातरूप-करणायेवोपादीयन्ते। तथा चोक्तम्- स खल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्तनमान स्तामेवावदातरूपामहिंसां करोति ।

सत्यं यथार्थे वाङ्मनसे। यथा दृष्टं यथाऽनुमितं तथा वाङ्मनश्चेति। परत्र स्वबोधसंक्रान्तये वागुक्ता, सा यदि न वञ्चिताभ्रान्ता वा प्रतिपत्तिवन्ध्या वा भवेदिति। एषा सर्वभूतोपकारार्थे प्रवृत्ता न भूतोपघाताय। यदि चैवमप्यभिधीयमानाभूतोपघातपरैव स्यान्न

सत्यं भवेत्पापमेव भवेत्तेन पुण्याभासेनपुण्यप्रतिरूपकेण कष्टं तपः प्राप्नुयात्। तस्मात्परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात् ।

स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणं, तत्प्रतिषेधःपुनरस्पृहारूपमस्तेयमिति । ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः ।विपयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वी-करणमपरिग्रहइत्येते यमाः।

नसत्यं यथार्थे वाङ्मनसे। यथा दृष्टं यथा अनुमितं तथा वाङ्मनश्चेति। परत्र स्वबोधकसंक्रान्तये वागुक्ता, सा यदि न वाञ्चिता भ्रान्ता वा प्रतिपत्तिबन्ध्या वा भवेदिति। तस्मात् परीक्ष्या सर्वभूतहितं सत्यं ब्रूयात्। स्तेयं शास्त्रपूर्वक द्रव्याणां परतः स्वीकरणं, तत् प्रतिषेधः पुनरस्पृहारूपम् अस्तेयं इति। ब्रह्मचर्य्यं गुप्तेन्द्रियस्योपस्थस्य संयमः। विषयाणां आर्ज-रक्षण-क्षय-सङ्ग-हिंसदोषदर्शनात् अस्वीकरणं अपरिग्रहः इत्येते यमाः।

**जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्।**

जातिदेशकालसमयानवच्छिन्नाः एभिःअहिंसादयः सर्वथैव परिपालनीयाः। सर्वभूमिषु सर्वविषयेषु, सर्वथैवाविदितव्यभिचारः सार्वभौमा महाव्रतमित्युच्यन्ते।

**शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।**

तत्र शौचं मृज्जलादि जनितं मेध्याभ्यवहरणादि च बाह्यम्। आभ्यन्तरं चित्तमलानामाक्षालनम्।संतोषः सन्निहितसाधनादधिकस्यानुपादित्सा। तपः द्वन्द्वसहनम्। द्वन्द्वाश्च जिघत्सापिपासे शीतोष्णे स्थानासनेकाष्ठमौनाकारमौने च। स्वध्यायः मोक्ष-शास्त्राणांअध्ययनं प्रणवजपो वा।ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्मार्पणम्।

**स्थिरसुखमासनम्।**

तद्यथा पद्मासनं भद्रासनं स्वस्तिकं दण्डासनं सोपाश्रयं पर्यङ्कं क्रौञ्चनिषदनं हस्तिनिषदनमुष्ट्रनिषदनं। समसंस्थानं स्थिरसुखं यथासुखं चेत्येवमादीनि।

**तस्मिन्निति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः।**

सत्यासजनये बाह्यस्य वायोराचमनं श्वासः कौष्ठस्य वायोः निस्सरणं प्रश्वासः तयोः गतिविच्छेद उभयाभावः प्राणायामः।

बाह्याभ्यन्तरस्तम्भट्टत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः।

यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः। यत्र वासपूर्वकोगत्यभावः स आभ्यन्तरः। तृतीयः स्तम्भट्टत्तिर्यत्रो भयाभावःसकृत्प्रयत्नाद्भवति । यथा तो न्यस्तमुपले जलं सर्वतः संकोचमापयते तथा द्वयोर्युगपद्रव्यभाव इति। प्रयोऽप्येते देशेन परिदृष्टा इयानस्य विषयो देश इति। कालेन परिदृष्टाः क्षणाना- मियत्तावधारणेनावच्छिन्ना इत्यर्थः। संख्याभिः परिदृष्टश एता- वद्भिः श्वासप्रश्वासैः प्रथम उद्घातस्तद्वन्निगृहीतस्यैतावद्भि- द्वितीय उद्घात एवं तृतीयः। एवं मृदुरेवं मध्य एवं तीत्र इति संख्यापरिदृष्टः। स खल्त्रयमेवमभ्यस्तो दीर्घसूक्ष्म।

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥ ५१ ॥

देशकाल संख्याभिर्बाह्यविषयपरिदृष्ट आक्षिप्तः। तथाऽऽभ्यन्तरविषयपरिदृष्ट आक्षिप्तः। उभयथा दीर्घसूक्ष्मः। तत्पूर्वको भूमिजयात्क्रमेणोभयोर्गत्यभावश्चतुर्थः प्राणायामः। तृतीयस्तुविषयानालोचितो गत्यभावः सकृदारब्ध एवं देशकालसख्याभिः परिदृष्टो दीर्घसूक्ष्मः। चतुर्थस्तु श्वासप्रश्वासयोर्विषयावधारणात्क्रमेण भूमिजयादुभयाक्षेपपूर्वको गत्यभावशतुर्थः प्राणायाम इत्ययं विशेष इति।

ततः क्षीयते प्रकाशावरणम् ॥ ५२ ॥

प्राणायामानभ्यस्यतोऽस्य योगिनः क्षीयते विवेकज्ञानावरणीयं कर्म। यत्तदाचक्षते - महामोहमयेनेन्द्रजालेन प्रकाशशीलं सत्त्वमावृत्य तदेवाकार्ये नियुक्त इति। तस्य प्रकाशा- वरणं कर्म संसारनिबन्धनं प्राणायामाभ्यासाहर्बलं भवति प्रतिक्षणं च क्षीयते तथा च उक्तम्— " तपो न परं प्राणायामाची विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्य " इति ।

धारणासु च योग्यता मनसः ।

प्राणायामाभ्यासादेव।" प्रच्छर्दनविधारणाभ्यां वा प्राणस्य" इति वचनात् ।

स्वविषयासंप्रयोगे चित्तं स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः।

स्वविषयसंप्रयोगाभावे चित्तस्वरुपानुकार इवेति, चित्तनिरोधे चित्तवन्निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवदुपायान्तरं उपेक्षन्ते। यथा- मधुकरराजं मक्षिका उत्पतन्तम अनूत्पतन्ति निविशमानं अनुनिविशन्ते तथेन्द्रियाणि चित्तनिरोधे निरुद्धानीत्येव प्रत्याहारः।

देशबन्धश्चित्तस्य धारणा ।

नाभिचक्रे हृदयपुण्डरीके मूर्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्रे इत्येवमादिषु देशेषु बाह्यो वा विषये चित्तस्य वृत्तिमात्रेण बन्ध इति धारणा।

तत्र प्रत्ययैकतानता ध्यानम्।

तस्मिन् देशे ध्येयावलम्बनस्य प्रत्ययस्यैकतानता सदृशः प्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्।

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।

ध्यानमेव ध्येयकार्यनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावेशात्तदा समाधिरित्युच्यते।

सा एव सबीजः समाधिः।

ताश्चतस्रः समापत्तये बहिर्वस्तुबीजा इति समाधिरपि सबीजा इति समाधिरपि सबीजः। तत्र स्थूलाऽर्थे सवितर्को निर्वितर्कः, सूक्ष्मेऽर्थे सविचारो निर्विचार इति चतुर्धोपसंख्यातः समाधिरिति ।

तज्जः संस्कारोऽनेयसंस्कारप्रतिबन्धी

समाधिप्रज्ञाप्रभवः संस्कारो व्युत्थानसंस्काराशयं बाधते। व्युत्थान संस्काराभिभवात्तत्प्रभवाः प्रात्यया न भवन्ति। प्रत्ययनियोधे समाधिरुपतिष्ठते ।ततः समाधिजा प्ज्ञा, ततः प्रज्ञाकृताः संस्कार इति नवो संस्काराशयो जायते। ततश्च प्रज्ञा, ततश्च संस्काराइति। कथमसौ संस्कारातिशयश्चित्तं साधिकारं न करिष्यतीति। न त् प्रज्ञाकृताः संस्काराः क्लेशक्षयहेतुत्वाच्चित्तमधिकीकविशिश्टं कुर्वन्ति। चित्तं हि ते स्वकार्यादवसादयन्ति। ख्यातिपर्यवसानं हि चित्तचेष्टितमिति ।

तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ।

स न केवलं समाधिप्रज्ञाविरोधी प्रज्ञाकृतानामपि संस्काराणां प्रतिबन्धी भवति। कस्मात्, निरोधजः संस्कारः समाधिजान्संस्काराबाधत इति।

निरोधस्थितिकालक्रमानुभवेन निरोधचित्तकृतसंस्कारास्तित्वमनुमेयम्। व्युत्थान निरोधसमाधिप्रभवैः सह सह कैवल्यभागीयैः संस्कारैश्चित्तं स्वस्यां प्रकृताववस्थितायां

प्रविलीयते। तस्मात्ते संस्काराश्चित्तस्याधिकारविरोधिनो न स्थितिहेतवो भवन्तीति। यस्मात् अवसिताधिकारं सह कैवल्यभागायैः संस्कारैश्चित्तं निवर्तते, तस्मिन्निवृत्ते पुरुषः स्वरूपमात्रप्रतिष्ठोऽतः शुद्धः केवलो मुक्त इत्युच्यत इति।

**त्रयमेकत्र संयमः।**

तदेतद्धारणाध्यान समाधित्रयमेकत्र संयमः। एकविषयाणि त्रीणि साधनानि संयम इत्युच्यते।तदस्य त्रयस्य तान्त्रिकी परिभाष संयम इत्युच्यते।

**त्रयमन्तरङ्गं पूर्वेभ्यः ।**

तदेतद्धारणाध्यानसमाधित्रयमन्तरङ्गं संप्रज्ञातस्य समाधेः पूर्वेभ्यो यमादिभ्यः पञ्चभ्यः साधनेभ्यः इति।

**तदपि बहिरङ्गं निर्बीजस्य ।**

तदप्यन्तरङ्गं साधनत्रयं निर्बीजस्य योगस्य बहिरङ्गं भवति। तदभावे भावादिति।

तथोक्तम् योगसिद्धिः-

**शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्**
**प्रविभागसंयमात्सर्वभूतरुतज्ञानम्।।**

शब्दार्थप्रत्ययानां इतरेतराध्यासात् संस्कारः तत् प्रविभागसंयमात् रुतज्ञानं लभते। शब्दार्वप्रत्ययाः पृथक् इति ज्ञानं लभते।

**संस्कारसाक्षात्कारणात् पूर्वजाति ज्ञानम्।**

संस्कारः स्मृतिफ्लेशहेतवो वासनारूपा विपाकहेतवो धर्माधर्मरूपाः ते पूर्वभवाभिनासंस्कृताः परिणामचेष्टा निरोधनशक्तिजीवनधर्मवेदपरिदृष्टश्चित्तधर्मः तेषु संयमः संस्कारसाक्षात्क्रियायै समर्थः। तस्मात् संस्कारसक्षातकरणा पूर्वजाति ज्ञानम् लभते।

**प्रत्ययस्य परचित्तज्ञानम्।**

प्रत्यये संयमात् प्रत्ययस्य साक्षात्कारणात्ततः परचित्तज्ञानम् लभते।सोपक्रमं निरुपक्रमं च कर्मसंयमादपरादन्तज्ञानमरीष्टभ्यो वा ।आयुर्विपाककर्मस्य सोपक्रमनिरूपक्रमयोः इत्यनयोः संयमात् अपरान्तज्ञानं लभते।

**पुनरावृत्तिः(Recap)**

- यम नियमः आसनः प्राणायामः प्रत्याहारः धारणा ध्यानं समाधिः अष्टावङ्गानि।

- यमस्तु पञ्चधा अहिंसा सत्यं अस्तेयं ब्रह्मचर्या अपरिग्रहाः।
- नियमः तु पञ्चधा शौचः संतोषः तपः स्वाध्यायः ईश्वरप्रणिधानानि।
- शब्दार्थप्रत्ययानां इतरेतराध्यासात् संस्कारः तत् प्रविभागसंयमात् रुतज्ञानं लभते।
- संस्कारस्य साक्षात्करणात् पूर्वजाति ज्ञानम् ।
- प्रत्यये संवमात् प्रत्ययस्य साक्षात्करणात्ततः परचित्तज्ञानम् लभते ।
- आयुर्विपाककर्मस्य सोपक्रमनिरूपक्रमयोः इत्यनयोः संयमात् अपरान्तज्ञानं लभते।
- सूर्येसंयमात् भुवनज्ञानं लभते। चन्द्रे संयमं कृत्वा ताराणां व्यूहं विजानीयेत्।
- ध्रुवे संयम कृत्वे ताराणां गतिज्ञानम्।
- नाभिचक्रे संयमं कृत्वा कायव्यूहज्ञानम्।
- मूर्धज्योतिषि संयमं कृत्वा सिद्धदर्शनम्।
- हृदये संयमं कृत्वा चित्तज्ञानम्।
- स्थूल, स्वरूप, सूक्ष्म इत्येतयोः समन्वयात् अर्थवत्त्वे संयमं कृत्वा भूतजयः जायते।
- अणिमादिः अष्ठा। अणिमा, महिमा, लधिमा, गरिमा, प्राप्तिः, प्राकाम्या, वशित्वा ईशित्वाच।
- सरूपता, लावण्यं, बलं, वज्रसहननत्त्वश्चेति समर्थाः कायसम्पत्युच्यते।
- ग्रहणं स्वरूपं अस्मित अन्वयार्यवत्त्व संयामात् इन्द्रियजयः।
- सर्वज्ञातृत्त्वं सर्वात्मनां गुणानां शान्तोदिताव्यपदेश्यधर्मत्त्वेन व्यवस्थापितानामक्रमोपारुढंविवेकजं ज्ञानमित्यर्थः इत्येषा विशाका नाम सिद्धिर्यां प्राप्य योगी सर्वज्ञः।
- सत्त्वपुरुषाणां शुद्धिसाम्ये कैवल्यं प्राप्यते।

## वस्तुनिष्ठप्रश्नाः(Answer to Objective type questions)

1. यमः कति विधम् ?

2. नियमः कति विधम् ?
3. अहिंसा नाम किम्?
4. सत्यस्य लक्षणम् ?
5. धारणायाः लक्षणम् ?
6. कायसम्पत्तिः कः?
7. अणिमादयः कति?
8. कायाकाशयोः सम्बन्धसंयमात् किं प्राप्यते?
9. स्थूलस्वरूपसूक्ष्मान्वयार्यवत्त्वासंयमाद् किं प्राप्यते?
10. आसनस्य लक्षणम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत ।

**(Answer the following questions in one or two sentences)**

1. अष्टाङ्गानि कानि ?
2. समाधेः लक्षणम् ?
3. अणिमादयः काः?

## निर्दिष्टाभ्यासः (Assignments)

1. ईश्वरस्वरूपं निरूपयत

## वस्तुनिष्टप्रश्नानाम् उत्तराणि(Answer to Objective type questions)

1. पञ्चधा
2. पञ्चधा
3. तत्र अहिंसा सर्वथा सर्वदा सर्वभूतानामभिद्रोहः
4. सत्यं यथार्थे वाङ्मनसे।

5. देशबन्धश्चित्तस्य धारणा
6. सरूपता, लावण्यं, बलं, वज्रसहननत्त्वश्चेति समर्थाः कायसम्पत्युच्यते।
7. अणिमादिः अष्टा।
8. कायाकाशयोः सम्बन्धसंयमात् गतिज्ञानम् प्राप्यते
9. भूतजयः
10. स्थिरसुखमासनम्।

## सूचनाग्रन्थाः(References)


1. पातञ्जलयोगसूत्राणि, हरि नारायण आपटे, आनन्दाश्रमसंस्कृतग्रन्थावलिः, 1904
2. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६, पुटानि ८५-१४७


## अधिकवाचनग्रन्थौ (Suggested Readings)


1. Patanjalayogasutra of Patanjali
2. Yogasutram of prof. M Krishnan
3. Patanjali Yoga sutras: Sanskrit text with transliteration, translation & commentary by Swami Vivekananda

BLOCK -3

# न्यायवैशेषिकौ

SGOU

# Unit-1
# पदार्थविचारः

## उद्देश्यानि (Learning Outcomes)

- भारतीयदर्शनं प्रति ज्ञानं लभते
- न्यायदर्शनस्य गहनावबोधः जायते।
- न्यायवैशेषिकयोः महत्वं जानाति ।
- पदार्थानां विभागं ज्ञास्यति।

## प्राग्व्यापेक्षा(Prerequisites)

मानवस्य उत्कृष्टतमं दर्शनमेव न्यायदर्शनम्। प्रमाणैः अर्थपरीक्षणं न्यायः। नीयन्ते विवक्षितार्थः येनेति न्यायः। षोडशपदार्थज्ञानेन निश्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिका:। प्रमाण प्रमेय- संशय- प्रयोजन- दृष्टान्त- सिद्धान्तावयव- तर्क निर्णय- वाद- जल्पवितण्डा हेत्वाभासच्छलजाति-निग्रहस्थानानां तत्त्वज्ञानात् निश्रेयसाधिगमः। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः द्रव्यादिसप्तपदार्थाः। तेषां संग्रहः संक्षेपेण स्वरूपकथन तर्कसंग्रहः। बहुषु तर्कग्रन्थेषु सत्स्वपि शास्त्रग्रहणपटूनां छात्राणां अनायासेन तर्कशास्त्रप्रवेशनाय तर्कसंग्रहः प्रयोजकमेव। अतः जगन्नियन्तारं शिवं हृदये नितरां स्थापयित्वा विद्यागुरून् नमस्कृत्य तर्कसंग्रहरचनाम् अन्नम्भट्टः आरभते ।

## मुख्यविचाराः(Key Concepts)

द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय: ,पृथिवी, आपः, तेजः, वायुः, आकाशः, कालः, दिक्, आत्मा, मनः,अव्याप्तिः, अतिव्याप्तिः, असंभवः, उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनं, प्रसारणं, गमनं, प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः।

## Discussions

### पदार्थाः

**तर्कसंग्रहः** – द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः।

द्रव्य, गुणः, कर्म, सामान्यं, विशेषः, समवायः, अभावाः सप्त पदार्थाःइति नैयायिकमतम्।

द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् पदार्थाः इति वैशेषिकाः कथयन्ति।

**दीपिका-** पदार्थान् विभजते द्रव्येति। पदस्यार्थः पदार्थः इति व्युत्पत्तिः। अभिधेयत्वं सर्वपदार्थानां सामान्यलक्षणम्। अत्र पूर्वपक्षः एवं पृच्छति। विभागादेव सप्तत्वे लब्धे पुनः सप्तग्रहणं व्यर्थम् इति ।

अत्रेदं समाधानम्। अधिकसंख्याव्यवच्छेदार्थत्वात् इति। पदार्थत्वं द्रव्यादिसप्तान्यतमत्वे व्याप्तम्। द्रव्यादिभेदसप्तकाभावत्वमिति तदर्थत्वात्। तर्कसंग्रहः तत्र द्रव्याणि सप्तान्यतमत्वं पृथिव्यतेजोवाय्वाकाशकालदिगात्ममनांसि नवैव।

द्रव्याणि नव एव। तानि पृथिवी, आपः, तेजः, वायु;, आकाशः, कालः, दिक्, आत्मा, मनः च।

**दीपिका-**द्रव्यं विभजते तत्रेति। तत्र द्रव्यादिमध्ये द्रव्याणि नव एवं इत्यन्वयः। कानि तानि इत्यत आह पृथिव्यादि।

तत्र पूर्वपक्षः एवमभिप्रैति- तमसो दशमद्रव्यस्य विद्यमानत्वात् कथं नव द्रव्याणि तथा हि नील तम चलति इति अबाधितप्रतीतिबलात् नीलरूपस्याधारतया क्रियाभारतया च तमसो द्रव्यत्वं तावत्सिद्धम् (अबाधितप्रतीतिबलात् इत्यस्य अनुभवप्रतीतिः वर्तमानत्वात्)। नीलरूपत्वात् आकाशादिपञ्चके तमः नान्तर्भवति। अर्थात् आकाशे काले दिशि आत्मनि मनसि तमः नान्तर्भवति। अत एव वायौ स्पर्शाभावात् सदागतिमत्वाभावाच्च। रूपरहित सति स्पर्शवत्वं वायोः लक्षणम्। अत्र तमस रूपवत्वं स्पर्शाभावः च वर्तते। तेजसि सम नान्तर्भवति। उष्णस्पर्शवत् तेजः इति लक्षणम्। भास्वररूपाभावात् पभावाच्च तमः ने तेजः। तमः जले न अन्तर्भवति। शीतस्पर्शवत्यापः इति लक्षणम्। शीतस्पर्शाभावात् नीलरूपाश्रयत्वात्य तमः न जलम्। तमः पृथिव्यां नान्तर्भवति। 'गन्धवती पृथिवी' इति लक्षणम्। गन्धवत्त्वाभावात् स्पर्शरहितत्वाच्च तमः न पृथिवी। तस्मातमो दशमद्रव्यम् इति पूर्वपक्षअवेद सिद्धान्तपक्षः। तमसः तेजोऽ भावरूपत्वात्। तमो हि न रुपद्रव्यम् आलोकासहकृत चक्षुर्गाध्यत्वात्। प्रकाशस्य

साहाय विना चक्षुरिन्द्रियेण गृहीतुं योग्यं भवति तमः। रूपिद्रव्यं द्रष्टुं तस्मिन् द्रव्ये प्रकाशस्पर्शमावश्यकमेव अतः प्रौढप्रकाशकतेज समान्याभावः तमः। अपि च नील तमश्चलतीति प्रत्ययः भ्रमः। अतः नवद्रव्याणि ।

### 2.3.1 लक्षणस्य लक्षणं किम् ?

असाधारणो धर्मः लक्षणम्। दोषत्रयरहितः धर्मः असाधारण धर्मः। द्रव्यजातिमत्वं गुणवत्वं वा द्रव्यसामान्यलक्षणम्। लक्षणे कदाचित् त्रयः दोषाः संभवेयुः। ते अव्याप्ति, अतिव्याप्तिः, असंभवः च।

#### अव्याप्तिः।

लक्ष्यैकदेशावृत्तित्वं अव्याप्तिः। यथा गोः कपिलत्वम् इति गोः लक्ष्यम्। कपिलत्वं लक्षणम्। कपिलवर्णत्वं सर्वेषु गोषु न वर्तते इत्यतः कपिलत्वम् इति लक्षणे अव्याप्तिः।

#### अतिव्याप्तिः।

अलक्ष्यवृत्तित्वम् अतिव्याप्तिः।यथा गोः श्रृङ्गित्वम्। लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वमतिव्याप्तिः। श्रृङ्गित्वमिति लक्षणं गवि वर्तते, अलक्ष्ये महिषादिष्वपि वर्तते। अतः अतिव्याप्तिः नाम दोषः।

#### असंभवः ।

लक्ष्यमात्रावर्तनमसंभवः ।यथा गोरेकशफवत्वम्। अत्र 'मात्र' इति पदं कृत्स्नमित्यर्थे प्रयुक्तम्। एकशभवत्वं गोः लक्षणमित्युच्यते चेत् इदं लक्षणं लक्ष्ये गवि कदापि न संभवति। अतः असंभवः। अतः किं लक्षणमित्युच्यते चेत् अव्याप्त्यतिव्याप्त्यसंभवरुपापरहितः धर्मः लक्षणम्।

गोः सास्नादिमत्वम्। सर्वेषु गोषु सास्नादिमत्वमस्ति। गोभिन्नेषु सास्नादिमत्वं नास्ति असाधारण धर्मः लक्षणम्। लक्ष्यतावच्छेदकसमनियतत्वम् असाधारणत्वम्। सास्नावाच गोत्वं च गोषु एवं दृश्यते। सास्नाव लक्ष्यतावच्छेदकस्य गोत्वस्य समनियतत्वात असाधारणधर्ममेव। व्यावर्तकमेव लक्षणमिति केचन। लक्ष्यम्अलक्ष्येभ्यः भिन्नम्। व्यावृत्तिः इतरभेदः। व्यावर्तक व्यवहारप्रयोजन च लक्षणमिति अपरे केचन। व्यावर्तकमेव लक्षणमित्युच्यते चेत्

व्यावृतौअभिधेयत्वादौ अतिव्याप्तिवारणाय तदभिन्नत्वे सति लक्ष्यतावच्छेदकसमनियतत्त्व लक्षणमितिवक्तव्यम्।

**पूर्वपक्षः** - गुणवत्वं द्रव्यस्य सामान्यलक्षणम् गुणवत्वम् इति लक्षणं द्रव्ये इव गुणेऽपि स्यात् । एक रूपं रसात्पृथगिति व्यवहारात् रुपादौ अतिव्याप्तिः ।गुणे गुणानङ्गीकारात् पूर्वपक्षेण सूचितः दोषः न।

## 2.3.2 गुणविभजनम् ।

**तर्कसंग्रहः-** रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्व स्नेहशब्दबुद्धिसुखदुःखइच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिः गुणाः ।

**दीपिका-**गुणं विभजते रूपेति द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः ।गुणत्वजातिमान् गुणः।

**पूर्वपक्षं-** लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात् कथं चतुर्विंशति गुणाः इति। समाधानपक्षः गुरुत्वाभावरूप लघुत्वम्। अवयवसंयोगविशेषत्वात् मृदुत्वं कठिनत्वं चसिद्ध्यति ।

## 2.3.3 कर्मविभजनम् ।

**तर्कसंग्रहः-** उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि। तानिउत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनं, प्रसारणं, गमनं च।

**दीपिका-** कर्म विभजते उत्क्षेपणेति संयोगभिन्नत्वे सति संयोगसमवायिकारणं कर्म। कर्मत्वजातिमत् कर्म ।

**पूर्वपक्षः-**भ्रमणम् इति अतिरिक्तस्य कर्मणः सत्त्वात् कथं पञ्चकर्माणि इति ।

**समाधानपक्षः-**भ्रमणादीनामपि गमने अन्तर्भावः ।अतः पञ्च कर्माणि ।

## 2.3.4 सामान्यविभजनम् ।

**तर्कसंग्रहः-** परमपरं चेति द्विविधं सामान्यम्। परम् अपरं चेति सामान्यं द्विविधम्।

**दीपिका-** सामान्यं विभजते परमिति । परमधिकदेशवृत्ति अपरं नामदेशति द्रव्याणां सामान्यं वर्तते। एषु प्रयोगेऽपि वर्तमान सामान्यं परम् । सामान्यादिचतुष्टये जातिः नास्ति । अर्थात् सामान्ये, विशेषे, समवाये, अभावे च जाति: न वर्तते। अनुमितिविषयः धर्मः जातिः।

### 2.3.5 कियन्तो विशेषाः?

**तर्कसंग्रहः-**नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव।

**दीपिका -** विशेषं विभजते- नित्येति। पृथिव्यादिचतुष्टयस्य परमाणवः, आकाशादिपञ्चकं च नित्यद्रव्याणि।

### 2.3.6 समवायः ।

**तर्कसंग्रहः-** समवायस्त्वेक एव ।

**दीपिका-** समवायस्य भेदो नास्तीत्याह- समवायस्त्विवति ।

### 2.3.7 अभावविभजनम् ।

**तर्कसंग्रहः-** अभावः चतुर्विधः। प्रागभावः, प्रध्वंसाभावो ऽत्यन्ताभावोऽन्योन्याभावश्चेति।

अभावः चतुर्विधः। प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः चेति। अनादिः सान्तः प्रागभावः, उत्पतेः पूर्व कार्यस्य सादिरनन्तः प्रध्वंसः, उत्पत्यनन्तरं कार्यस्य त्रैकालिकसंसर्गाविच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। नित्य संसर्गाभावःअत्यन्ताभावः त्रैकालिकः इत्यस्य नित्यमित्यर्थः । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताको अन्योन्याभावः। यथा घटः पटो न।

अभावः।

**अभावश्चतुर्विधः- प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावो- ऽन्योन्याभावश्चेति।**

दीपिका-अभावं विभजते- अभाव इति ।

**शक्तिसादृश्यादीनाम् अतिरिक्तपदार्थत्वम् आशङ्कते ।**

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः इत्युक्तम्। प्राभाकरमते शक्तेः अतिरिक्तपदार्थत्वात् आलङ्कारिकमते सादृश्यस्यातिरिक्तपदार्थत्वात् कथं सप्तपदार्थाः इति। तथा हि मण्यादिसमवहितेन वह्निना दाहो न जन्यते। तत्र मण्यादिना वहनी दाहानुकूला

शक्ति नश्यते। उत्तेजकेन मण्याद्यपसारणेन च जन्यते इति कल्प्यते । एवं सादृश्यमप्यतिरिक्तः पदार्थः। तद् हि षट्सु भावेषु अन्तर्भवति सामान्येऽपि सत्वात्। यथा गोत्वं नित्यं तथा अवत्वमपि नित्यमिति सादृश्यप्रतीतेः। अभावे सादृश्यं नान्तर्भवति। सत्वेन प्रतीयमानत्वात्।

### 2.3.8 शक्तेः अतिरिक्तपदार्थत्वनिराकरणम्।

अत्रेदं समाधानम्। अतिरिक्तशक्तिकल्पनां नाश्यनाशकभावकल्पनां चापेक्ष्य लाघवात् दाहत्वावच्छितं प्रति मण्यभावविशिष्टवह्नित्वादिनैव हेतुताकळ्पनमुचितम्। (दाहादिकं प्रति मण्यभावादे हेतुत्वम्)। उत्तेजके सति प्रतिबन्धकसद्भावेऽपि दाहः जायते। उत्तेजकाभाव-विशिष्टमण्यभावस्य कारणत्वात्। अतः शक्तिः न पदार्थान्तरम्।

### 2.3.9 सादृश्यस्य अतिरिक्तपदार्थत्वनिराकरणम् ।

सादृश्यं न पदार्थान्तरम्। सादृश्यं नाम, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। चन्द्रसदृशं मुखम् इत्यत्र चन्द्रभिन्नत्वे सति चन्द्रगताहलादकत्वादिमत्वं मुखम् इत्यर्थः। अतः सादृश्यं न पदार्थान्तरम्।

## (२) द्रव्यलक्षणप्रकरणम् ।

**पृथिव्याःकिंलक्षणम्, कति च भेदाः ?**

**तत्र गन्धवती पृथ्वी। सा द्विविधा - नित्याऽनित्या च। नित्या – परमाणुरूपा। अनित्या 'कार्यरूपा। पुनस्त्रिविधा-शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादिः।**

दीपिका-तत्रोद्देशादिक्रमानुसारात् पृथिव्याः लक्षणमाह - गन्धवतीति। पृथिवीं विभजते-सा द्विविधेति। नित्यत्वं ध्वंसाप्रतियोगित्वम्।अनित्यत्वं ध्वंसप्रतियोगित्वम्। प्रकारान्तरेण विभजते- पुनरिति। आत्मनो भोगायतनं शरीरम्। यदवच्छिन्नात्मनि भोगो जायते तद्भोगायतनम्। सुख-दुःख साक्षात्कारो भोगः। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम्। शरीरेन्द्रियभिन्नो विषयः। एवं च गन्धवच्छरीरं पार्थिवशरीरम्। गन्धवदिन्द्रियं पार्थिवेन्द्रियम्। गन्धवान् विषयः पार्थिवविषयः इति तत्तल्लक्षणं बोध्यम्। पार्थिववशरीरं दर्शयति-शरीरमिति। पार्थिवेन्द्रियं दर्शयति -

इन्द्रियमिति। गन्धग्राहकमिति प्रयोजनकथनम्। घ्राणमिति संज्ञा। नासाग्रवर्त्याश्रयोक्तिः। एवमुत्तरत्रापि ज्ञेयम्। पार्थिवविषयं दर्शयति-विषय इति।

**जलस्य किं लक्षणम्, कति च भेदाः ?**

**शीतस्पर्शवत्यापः। ता द्विविधा-नित्या अनित्याश्च। नित्याः- परमाणुरूपाः, अनित्याः कार्यरूपाः। पुनस्त्रिविधा-शरीरेन्द्रिविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्तिं। विषयः -सरित्समुद्रादिः।**

**दीपिका -** अपां लक्षणमाह- शीतेति। उत्पन्नविनष्टजलेऽव्याप्तिवारणाय शीतस्पर्श समानाधिकरणद्रव्यत्वापरजातिमत्त्वे तात्पर्यम्। शीतं शिलातलमित्यादौ जलसम्बन्धादेव शोतस्पर्शभानमिति नातिव्याप्तिः। अन्यत्सर्वं पूर्वरीत्या व्याख्येयम्।

**तेजसः किंलक्षणं, कति च भेदा; ?**

**उष्णस्पर्शवत्तेजः। तच्च द्विविधम् - नित्यमनित्यं च। नित्यं –परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधं – शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षु कृष्णताराग्रवर्ति। विषयश्चतुर्विधो-भौम दिव्योदर्याकरजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरुदर्यम्। आकरजं सुवर्णादि।**

**दीपिका-** तेजसो लक्षणमाह - उष्णेति। उष्णं जलमिति प्रतीतेस्तेजः- सम्बन्धानु-विधायित्वान्नातिव्याप्तिः। विषयं विभजते - भौमेति।

नन सुवर्णं पार्थिवं पीतत्वाद् गुरुत्वाद्वा हरिद्रादिवदिति चेन्न, अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशादर्शनेन, जलमध्यस्थधृते द्रवत्वनाशादर्शनेन, असति प्रतिबन्धके पार्थिवद्रव्यवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात्, सुवर्णस्यात्यन्तानल संयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः। तस्मात्पीतद्रव्य द्रवत्वनाशप्रतिबन्धकतया द्रव्यद्रव्यान्तरासिद्धो नैमित्तिकद्रवत्वाधिकरणतया जलत्व अनुपपत्ते, रूपवत्तया वाय्वादिष्वनम्तर्भावात्तैजसत्वसिद्धिः। तत्रोष्णस्पर्शभास्वररूपयोः उपष्टम्भकपार्थिव रूपस्पर्शाभ्यां प्रतिबन्धादनुपलब्धिः। तस्मात्सुवर्णं तैजसमिति सिद्धम्।

**वायोः किं लक्षणं, कति च भेदाः ?**

**रूपरहितस्पर्शवान् वायुः। स द्विविधः नित्योऽनित्यश्च। नित्यः - परमाणुरूपः। अनित्यः - कार्यरूपः। पुनस्त्रिविधः शरीरेन्द्रियविषय भेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते ।**

**दीपिका -** वायूं लक्षयति- रूपेति। आकाशादौ अवतिव्याप्तिवारणाय स्पर्शवानिति। पृथिव्यादौ अतिव्याप्तिवारणाय - रूपरहितेति ।

**आकाशस्य किं लक्षणं, कतिविधं च तत् ?**

**शब्दगुणकमाकाशम्। तच्चैकं विभुः नित्यं च।**

**दीपिका-** आकाशं लक्षयति - शब्देति। नन्वाकाशमपि किं पृथिव्यादिवन्नाना ?नेत्याह-- तच्चैकमिति। भेदे प्रमाणाभावात् इत्यर्थः। एकत्वादेव सर्वत्र शब्दोपलब्धेर्विभुत्वम् अङ्गीकर्तव्यम् इत्याह- बिम्विति। सर्वभूतद्रव्यसंयोगित्वं विभुत्वम्। मूर्तत्वं परिच्छन्न परिमाणवत्त्वं वा। विभुत्वादेवात्मवन्नित्यमित्याह - नित्यं चेति।

**कालस्य किं लक्षणं, कति च भेदाः?**

**अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च।**

**दीपिका-** कालं लक्षयति -अतीतेति। सर्वाधारः कालः सर्वकार्यनिमित्तकारणं च।

**दिशः किं लक्षणं, कतिविधा च सा ?**

**प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च।**

**दीपिका-** दिशो लक्षणमाह-प्राचीति। दिगपि कार्यमात्रे निमित्तकारणम्।

**आत्मनः कि लक्षणं, कतिविधश्च सः ?**

**ज्ञानाधिकरणमात्मा। स द्विविधः- जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।**

**दीपिका -** आत्मनो लक्षणमाह-ज्ञानेति। आत्मानं विभजते - स द्विविध इति। परमात्मनो लक्षणमाह - तत्रेति। नित्यज्ञानाधिकरणत्वमीश्वरत्वम्। नन्वीश्वरस्य सद्भावे किं प्रमाणम्? न तावत्प्रत्यक्षम्। तद्धि बाह्यम्? आभ्यन्तरं वा? नाद्यम्, अरूपिद्रव्यत्वात्। नान्त्यम्, आत्मसुखादिव्यतिरिक्तत्वात्। नाप्यनुमानम्, लिङ्गाभावात्। नाप्यागमः, तथाविधागमाभा- वात् इति चेन्न, क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात्, घटवदित्यनुमानस्य प्रमाणत्वात्। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम्। उपादानं समवायिकारणम्। सकलपरमाण्वादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वम्। 'यः सर्वज्ञः स सर्ववित्' इत्याद्यागमोऽपि तत्र प्रमाणम्।

जीवस्य लक्षणमाह- जीवेति। सुखाद्याश्रयत्वं जीवलक्षणम्। ननु 'मनुष्योऽहं ब्राह्मणोऽहम्' इत्यादौ सर्वत्राहं प्रत्यये शरीरस्यैव विषयत्वाच्छरीरमेवात्मेति चेन्न, शरीरस्यात्मत्वे करपादादिनाशे सति शरीरनाशादात्मनोऽपि नाशप्रसङ्गात्। न अपि इन्द्रियाणामात्मत्वम्, तथात्वे 'योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामि' इत्यनुसन्धानाभावप्रसङ्गात्, अन्यानुभूतेऽन्यस्यानुसन्धानायोगात्। तस्माद् देहेन्द्रिय व्यतिरिक्तो जीवः सुखदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः। सच न परमाणुपरिमाणः - (सर्वं) शरीरव्यापिसुखाद्यनुपलब्धिप्रसङ्गात्। न मध्यमपरिमाणः, तथा सत्यनित्यत्व प्रसङ्गेन कृतनाशकृताभ्यागमप्रसङ्गात्। तस्मान्नित्यो विभुर्जीवः।

**मनसः कि लक्षणं, कतिविधं च तत् ?**

**सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्चप्रत्यात्मनियतत्वादनन्तं परमाणरूपं नित्यञ्च।**

**दीपिका-** मनसो लक्षणमाह- सुखेति। स्पर्शरहितत्वे सति क्रियावत्वं मनसो लक्षणम्। मनो विभजते- तच्चेति। एकैकस्यात्मन एकैकं मन आवश्यकम् इत्यात्मनोऽनेकत्वात् मनसोऽप्यनेकत्वमित्यर्थः। परमाणुरूपमिति। मध्यमपरिमाणत्वेऽनित्यत्वप्रसङ्गादि इत्यर्थः ।

## पुनरावृत्तिः (Recap)

- द्रव्याणि नव । पृथिवीः, आपः, तेजः, वायुः, आकाशं कालः, दिक्, आत्मा, मनः च।
- पदार्थविभजनं सप्त पदार्थाः ।
- द्रव्यत्वजातिमत्वं गुणवत्वं वा द्रव्यसामान्यलक्षणम् ।
- लक्षणे अव्याप्तिः, अतिव्याप्तिः, असंभवः इति दोषाः कदाचित् भवेयुः ।
- लक्ष्यैकदेशवृत्तित्वम् अव्याप्तिः ।
- अलक्ष्यवृत्तित्वम् अतिव्याप्तिः ।
- लक्ष्यमात्रावर्तनम् असंभवः ।
- असाधारणः धर्मः लक्षणम्।
- चतुर्विंशतिः गुणाः ।
- उत्क्षेपणा-ऽपक्षेपणाऽऽ-कुञ्चन-प्रसारण गमनानि पञ्च कर्माणि ।
- परं अपरं चेति सामान्यं द्विविधम् ।
- समवायः एकः एव।
- अभावश्चतुर्विधः- प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावो- ऽन्योन्याभावश्चेति।
- शीतस्पर्शवत्यापः।
- तत्र गन्धवती पृथ्वी।
- उष्णस्पर्शवत्तेजः।
- रूपरहितस्पर्शवान् वायुः।
- शब्दगुणकमाकाशम् ।
- अतीतादिव्यवहारहेतुः कालः।
- प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च।
- ज्ञानाधिकरणमात्मा । स द्विविधः- जीवात्मा परमात्मा चेति।
- सुखाद्युपलब्धिसाधनमिन्द्रियं मनः।
- शक्तिः सादृश्यं च न पदार्थान्तरम् ।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. न्यायमतानुसारं कति पदार्थाः सन्ति ?
2. वैशेषिकमतानुसारं कति पदार्थाः सन्ति ?
3. लक्षणं नाम किम् ?
4. कति द्रव्याणि सन्ति ?
5. कति गुणाः सन्ति?
6. कति कर्माणि सन्ति?
7. सामान्यं कति विधम् ? कानि च तानि ?
8. कियन्तो विशेषाः?
9. समवायः कति विधः?
10. अभावः कति विधः?
11. तर्कसंग्रहदीपिकयाः कर्ता कः ?
12. लक्ष्यैकदेशावृत्तित्वं किम् ?
13. लक्षणे कति दोषाः सन्ति? कानि च तानि ?
14. असाधारण धर्मः कः?
15. पृथिव्याः लक्षणं किम्?
16. जलस्य लक्षणं किम्?
17. तेजसः लक्षणं किम्?

18. वायोः लक्षणं किम्?

19. आकाशस्य लक्षणं किम्?

20. कालस्य लक्षणं किम्?

21. दिशः लक्षणं किम्?

22. मनसः लक्षणं  किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

1. द्रव्याणि कति? कानि च तानि?
2. कति गुणाः ?कानि च तानि?
3. अभावः कति विधः ?कानि च तानि?
4. कति कर्माणि ?कानि च तानि?
5. किम् नाम सादृश्यम् ?
6. आत्मनः किं लक्षणम्,कति  विधः च सः?
7. द्रव्यसामान्यलक्षणं किम् ?

## एकैकया खण्डिकयाउत्तराणि लिखत ।

(Answer the following questions in a paragraph)

1. नैयायिकमते दोषत्रयं विशदयत ।
2. न्यायदर्शने पदार्थाः विशदयत ।
3. पृथिव्याः किं लक्षणम्, कति च भेदाः?

4. जलस्य लक्षणं किं, कति च भेदाः?
5. तेजसः लक्षणं किं, कति च भेदाः?
6. वायोः लक्षणं किं, कति च भेदाः?
7. आकाशस्य लक्षणं किं, कतिविधं च तत् ?

## निर्दिष्टाभ्यासाः(Assignments)

1. न्यायवैशेषिकदर्शने पदार्थानां विभजनं विशदयत।
2. न्यायदर्शने गुणाः विशदयत ।
3. न्यायदर्शने द्रव्याणि विशदयत ।
4. शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वम् आशङ्क्य निराकुरुत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. सप्त ।
2. षट् ।
3. असाधारणधर्म ।
4. नव ।
5. चतुर्विंशतिः ।
6. पञ्च।
7. द्वे,परम् अपरम्।
8. नित्यद्रव्यवृत्तयोः विशेषस्त्वनन्ता एव ।
9. समवायस्तु एक एव ।
10. चत्वारि ।
11. अन्नम्भट्टः ।

12. अव्याप्तिः ।

13. त्रयः। अव्याप्ति,अतिव्याप्ति,असंभवः।

14. दोषत्रयरहितः धर्मः।

15. गन्धवती पृथ्वी ।

16. शीतस्पर्शवत्यापः ।

17. उष्णस्पर्शवत्तेजः ।

18. रूपरहितस्पर्शवान् वायुः ।

19. शब्दगुणकं आकाशम् ।

20. अतीतादिव्यवहारहेतुः कालः ।

21. सुखाद्युपलब्धिसाधनमिन्द्रियं मनः ।

22. प्राच्यादिर्व्यवहारहेतुर्दिक् ।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी, २०१६, पुटानि ८५-१४७
2. टि.के. रामचन्द्र अय्यर, ए षोर्ट् हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्ट् सन्स्, पालक्काट, २०१८ पुटानि १९३-२११
3. विश्वनाथः, कारिकावली, चौखम्बा कृष्णदास् अक्कादमी, वारणासि 2012.


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahityaAcademy, Thrissur.

# Unit - 2
# प्रामाण्यविचारः

**उद्देश्यानि(Learning Outcomes)**

- भारतीयदर्शनं प्रति परिचयः जायते।
- न्यायदर्शनस्य गहनतां जानाति।
- प्रमाणानां ज्ञानं जायते।
- न्यायमतानुसारं प्रामाण्यविचारं अवगाहते ।

**प्राग्व्यपेक्षाः(Prerequisites)**

नित्यजीवनेवस्त्ववबोधार्थंप्रमाणानांमहत्त्वंअत्यधिकंअस्ति। न्यायवैशेषिकदर्शनयोः प्रमाणानां विचारः सूक्ष्मतया क्रियते। ज्ञानसाधनरुपेणप्रमाणानां परिचयः कुर्मः। अत्र प्रामाण्यविचारः प्रतिपादयति । इदं ज्ञानमप्रमेति ज्ञानेन प्रामाण्यग्रहाद् बाधवारणाया- ऽप्रामाण्याग्राहकेति।

**मुख्यपदानि(Key words)**

ज्ञानं, प्रत्यक्षम्, अनुमानं, पदीर्थं, करणम्, कार्यम्, कारणम्, कारणत्रैविध्यम्, समवायिकारणम्, इन्द्रियार्थसन्निकर्षः, निर्विकल्पकम्, सविकल्पकम् ।

**Discussion**

(अथ प्रामाण्यविचारः)

अथ ज्ञानानां तद्वति तत्प्रकारकत्वं स्वतो ग्राह्यं, परतो वेति विचार्यते, तत्र विप्रतिपत्तिः- ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं, न वा इति ?अत्र विधिकोटिः

स्वतस्त्वम्। निषेधकोटिः परतस्त्वम्। अनुमानादिगाह्यत्वेन सिद्धसाधनत आवारणाय यावदिति। इदं ज्ञानमप्रमेति ज्ञानेन प्रामाण्यग्रहाद् बाघवारणायाऽप्रामाण्या- ग्राहकेति। इदं ज्ञानमप्रमेत्यनुव्यवसाय निष्ठप्रामाण्य ग्राहकस्याप्रामाण्या ग्राहकत्वाभावात् स्वतस्त्वंनस्यादतस्तदिति। तस्मिन् ग्राह्यग्रामाण्याश्रयेऽ प्रामाण्यग्राहक इत्यर्थः। उदाहृत-स्थले व्यवसायेऽप्रामाण्यग्राहकस्याप्यनुव्यवसाये तदग्राहकत्वात्स्वतस्त्वसिद्धिः। तनु स्वत एव प्रामाण्यं गृह्यते। घटमहं जानामित्यनुव्यवसायेन घटघटत्वयोरिव तत्सम्बन्धस्यापि विषयीकरण द्वयवसायरूपप्रत्यासत्तेस्तुळ्यत्वात् पुरोवर्तिनी प्रकारसम्बन्धस्यैव प्रमात्यपदार्थत्वादिति चेन्न स्वतःप्रामाण्यग्रहे जलज्ञानंप्रमा न वेत्यनभ्यासदशायां प्रमात्वसंशयो न स्यात्। अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वाद्। तस्मात्स्वतो ग्राह्यत्वाभावात् परतो ग्राह्यत्वम्, तथाहि- प्रथमं जलज्ञानानन्तरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानंप्रमा,समर्थं- प्रवृत्तिजनकत्वात्। यन्नैवं तन्नैवम्। यथाऽप्रमेति व्यतिरेकिणा प्रमात्वं निश्चीयते। द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टान्तेन तत्सजातीयत्वलिङ्गेनान्वय-व्यतिरेकिणापि गृह्यते। प्रमाया गुणजन्यत्वमुत्पत्तौ परतस्त्वम्। प्रमाऽसाधारणं गुणः। अप्रमाऽसाधारणकारणं दोषः। तत्र प्रत्यक्ष विशेषणवद्विशेष्यसन्निकर्षो गुणः। अनुमितौ व्यापकवति व्याप्यज्ञानम्। उपमितौ यथार्थ सादृश्यज्ञानम्। शाब्द ज्ञाने-यथार्थयोग्यताज्ञानम्। इत्याद्यूहनीयम्। पुरोवर्तिनि प्रकाराभावस्यानुव्यसायेनानुपस्थितत्वादप्रमात्वं परत एव गृह्यते। पित्तादिदोषजन्यत्वादुत्पत्तौ परतस्त्वम् ।

## पुनरावृत्तिः(Recap)

- इदंज्ञानमप्रमेतिज्ञानेनप्रामाण्यग्रहाद्बाघवारणायाऽप्रामाण्याग्राहकेति ।
- इदंज्ञानमप्रमेत्यनुव्यवसायनिष्ठ प्रामाण्यग्राहकस्याप्रामाण्याग्राहकत्वाभावात् स्वतस्त्वं न स्यादतस्तदिति।
- अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वाद् ।
- प्रथमं जलज्ञानानन्तरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानंप्रमा।
- द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टान्तेन तत्सजातीयत्वलिङ्गेनान्वयव्यतिरेकिणापि

गृह्यते।

- प्रमाऽसाधारणं गुणः ।
- अप्रमाऽसाधारणंकारणं दोषः।
- उपमितौ यथार्थ सादृश्यज्ञानम्।
- शाब्द ज्ञाने-यथार्थयोग्यताज्ञानम्।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. गुणः किम्?
2. दोषः किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

1. उपमानं नाम किम् ?
2. प्रत्यक्षं नाम किम्?

## एकैकया खण्डिकयाउत्तराणि लिखत ।

**(Answer the following questions in a paragraph)**

1. अनुमान प्रमाणं लिखत ।
2. शब्दप्रमाणं लिखत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. तर्कशास्त्रे प्रामाण्यविचारः ।
2. प्रत्यक्षप्रमाणं निरूपयत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. प्रमाऽसाधारणं गुणः ।
2. अप्रमाऽसाधारणकारणं दोषः।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी, २०१६, पुटानि ८५-१४७
2. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन् सन्स, पालक्काट, २०१८ पुटानि १९३-२११
3. अन्नम्भटः, तर्कसंग्रहः, भूमिका ।


## अधिकवाचनग्रन्थौ(Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahityaAcademy, Thrissur.

# Unit-3
# प्रत्यक्षप्रमाणम्

## उद्देश्यानि(Learning Outcomes)

- दर्शने प्रमाणज्ञानं अवगाहते ।
- न्यायदर्शने प्रत्यक्षप्रमाणं ज्ञायते ।

## प्राग्व्यपेक्षाः(Pre requisites)

हे पठितारः, स्मृतिः,अनुभवः, प्रत्यक्षादिभेदान्, प्रत्यक्षप्रमाणम् इत्यादिकं सलक्षणोदाहरणम् अस्माभिः पठितम्।प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षप्रमाणम् । निष्प्रकारकं ज्ञानं निर्विकल्पकम् । सप्रकारकं ज्ञानं सविकल्पकम् । प्रत्यक्षज्ञानहेतुः इन्द्रियार्थसन्निकर्षः षड्विधः इत्यादि विषयः प्रत्यक्षप्रमाणे अन्तर्भवति ।

## मुख्यपदानि (Key words)

निर्विकल्पकं, सविकल्पकं,इन्द्रियार्थसन्निकर्षजन्यज्ञानं, संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः समवायः,समवेतसमवायः, विशेषणविशेष्यभावः

## Discussion

### प्रत्यक्षलक्षणं विभागश्च ।

प्रत्यक्षज्ञानकरणं प्रत्यक्षम्। प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षप्रमाणस्य लक्षणमिति।

**तर्कसंग्रहः -** इन्द्रियार्थसन्निकर्षजन्यज्ञानं प्रत्यक्षम्। (ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्। तद् द्विविधम् निर्विकल्पकं सविकल्पकं चेति।इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षज्ञानस्य लक्षणम्।

**दीपिका-** तत्र प्रमाणचतुष्टयमध्ये इन्द्रियं चक्षुरादिकम्, अर्थः घटादि, तयोः. सन्निकर्षः (सम्बन्धः) संयोगादिः तज्जन्यं ज्ञानं प्रत्यक्षमिति विशेषणविशेष्यसम्बन्धानवमहि ज्ञानमित्यर्थः।

**निर्विकल्पकस्य लक्षणम्**

तर्कसंङ्ग्रहः- तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्।यथा- किञ्चिदिदमिति।

**सविकल्पकस्य लक्षणम्**

सप्रकारकं ज्ञानं सविकल्पकम् । यथा डित्थोऽयं ब्रह्मणोऽयं श्यामोऽयमिति ।

**दीपिका -**न तु निर्विकलपके किं प्रमाणमिति चेत् न । गौरिति विशिष्टज्ञानम्। विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दण्डीति ज्ञानवत् इत्यनुमानस्य प्रमाणत्वात्। विशेषणज्ञानस्यापि सविकल्पकत्वे अनवस्थाप्रसङ्गात् निर्विकल्पकसिद्धिः। नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहिज्ञानं सप्रकारकम् इति ।

व्याख्या - इन्द्रियस्य वस्तुना सह सन्निकर्ष जाते प्रथमक्षणे निष्प्रकारकं निर्विकल्पकज्ञानमिति। द्वितीयक्षणे विशेषणविशेष्यसम्बन्धज्ञानं सम्भवति तत् सविकल्पकज्ञानम्। यथा घटत्वविशिष्टघटः। अत्र घटत्वं विशेषणं घटः विशेष्यः तयोः सन्निकर्षः समवायः। नामजात्यादिसम्बन्धावगृहित जानम् नाम-जाति गुणः क्रिया इत्यादि सम्बन्धवान् इत्यर्थः। यथा डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयं गच्छन्नयम् इत्यत्र डित्थ इति नामवानयं ब्राह्मणत्वजातिमानय, श्यामवर्णोऽयं, गच्छन् गमनक्रियायुक्तः पुरुषोऽयम् इत्यादि विशेषणविशेष्यसम्बन्धत्वात् अत्र सविकल्पकज्ञानं भवति ।

**प्रत्यक्षज्ञानहेतुः इन्द्रियार्थसन्निकर्षः ।**

**तर्कसंग्रहः-** चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः। घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः, चक्षुसंयुक्ते घटे घटरूपस्य समवायात्। रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः। चक्षुसंयुक्ते घटे रूपं समवेत तत्र रूपत्वस्य समवायात्। श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात्,शब्दस्याकाशगुणत्वात्, गुणगुणिनोश्च समवायात्। शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः। कारे समवाय साधकः।

कर्णविवस्वत्र्त्याकाशस्य श्रोत्वात् शब्दस्याकाशगुणत्वात्, पत्रे समवेतसमवाय सन्निकर्षः। श्रोत्रसमवेते शब्देशब्दत्वस्य समवायात्।

अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। घटाभाववद् भूतलमित्यत्र धटाभावरूप विशेषणत्वात्। एवं सन्निकर्षषट्कजन्यज्ञानं प्रत्यक्षम्। तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्। प्रत्यक्षं व्याख्यातम्।

कादियापि विभजते- प्रत्यक्षेति। संयोगसन्निकर्षमुदाहरति चक्षुषेति। द्रव्यप्रत्यक्षे इत्यर्थः। आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थं च। तत यसनमुच्यते। संयुक्तसमवायमुदाहरति घटरूपेति। तत्र युक्तिमाह चक्षुसंयुक्तेति। समवायमुदाहरति रूपत्वेति। समवायमुदाहरति श्रोत्रेति। तदुपपादयति कर्णेति। दस्मन् इति चेत् व वीचीतरङ्गन्यायेनकदम्बमुकुलन्यायेन वा मन्दात् शान्तमेण श्रोत्रदेशे जातस्य श्रोत्रसम्बन्धात् प्रत्यक्षत्वसंभवात्। ववमुदाहत इन्दति। विशेषणविशेष्यभावमुदाहरति अभावेति। तदुपपादयति दिति। मूल विशेष्य घटाभावो विशेषणम्। भूतले घटो नास्ति इत्यत्र अभावस्य प्रष्टव्यम्। एतेन अनुपलब्ध प्रमाणान्तरत्वं निरस्तम् । यद्यत्र घटोऽभविष्यत् तदाकारे समवाय साधकः। कर्णविवस्वत्र्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात्, पत्रे समवेतसमवाय सन्निकर्ष। श्रोत्रसमवेते शब्द समवायात्। अभावप्रत्ययो विशेषणविशेष्यभावः सन्निकर्षः। घटाभाववद् भूतलमित्यत्र भूवरूप विशेषणत्वात्। एवं सन्निकर्षकजन्यं ज्ञानं प्रत्यक्षम्। तत्करणमिन्दर्द्धियम्। माणमिति सिद्धम्। प्रत्यक्ष व्याख्यातम् ।

काइदयापि विभजते- प्रत्यक्षेति। संयोगसन्निकर्षमुदाहरति चक्षुषेति। द्रव्यप्रत्यक्षे इत्यर्थः। आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन च। तत यसनमुच्यते। संयुक्तसमवायमुदाहरति घटरूपेति। तत्र युक्तिमाह चक्षुसंयुक्तेति। समवायमुदाहरति रूपत्वेति। समवायमुदाहरति श्रोचेति। तदुपपादयति कर्णेति। दस्मन् इति चेत् व चोचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा मन्दात् शान्तमेण श्रोत्रदेशे जातस्य श्रोत्रसम्बन्धात् प्रत्यक्षत्वसंभवात्। ववमुदाहत इन्दति। विशेषणविशेष्यभावमुदाहरति अभावेति। तदुपपादयति इति। मूल विशेष्य घटाभावो विशेषणम्। भूतले घटो नास्ति इत्यत्र अभावस्य प्रष्टव्यम्। एतेन अनुपलब्ध प्रमाणान्तरत्वं निरस्तम्। यद्यत्र घटोऽभविष्यत्

नदाभूतल मिवाद्रक्ष्यत्, दर्शनाभावान्नास्ति इति। तर्कितप्रतियोगिसमत्व विरोध्यनुपलब्धिसहकृतेन इन्द्रियेणैवअभावज्ञानोपपत्तौ अनुपलब्धेः प्रमाणान्तरत्वासम्भवात्। अधिकरणत्वज्ञानार्थम् अपेक्षणीयेन्द्रियस्यैवकरणत्वोपपत्तौ अनुपलब्धेः करणत्वस्यायुक्तत्वात्। विशेषणविशेष्यभावो विशेषणविशेष्यस्वरूपमेवनातिरिक्तः सम्बन्धः। प्रत्यक्षज्ञानमुपसंहरन् तस्य कारणमाह एवमिति। असाधारणकरणत्वादिन्द्रिय प्रत्यक्षज्ञानकरणमित्यर्थः। प्रत्यक्षमुपसंहरति तस्मादिति। इति प्रत्यक्षपरिच्छेदः। व्याख्याप्रत्यक्षज्ञानहेतुः इन्द्रियार्थसन्निकर्षः संयोगादिभेदेन षड्विधः। चक्षुरिन्द्रियेण घटे प्रत्यक्षे जाते संयोगः सन्निकर्षः। अर्थात् द्रव्यप्रत्यक्षे संयोगः सन्निकर्षः इति। आत्मा मनसा संयुज्यते मनः इन्द्रियेण संयुज्यते ततः प्रत्यक्षज्ञानमितिघटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः यतः चक्षुषा अथवा इन्द्रियेण संयुक्ते घटे घटरूपं समवाय सन्निकर्षेण तिष्ठति। रूपत्वसामान्यप्रत्यक्ष संयुक्तसमवेतसमवायः। यतः चक्षुरिन्द्रियेण संयुक्त घटे घटरूपं समवेतं समवायसम्बद्धं तत्र घटरूपे रूपत्वस्यापि समवायात्।श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवर्त्याकाशः श्रोत्रेन्द्रियः। शब्दस्य इन्द्रियार्थसन्निकर्षः इत्यादयः भागेऽस्मिन् प्रतिपादिताःआकाशगुणत्वात्। गुणस्य शब्दस्य गुणिनः आकाशस्य च समवायात्। ननु दूरस्थशब्दस्य कथं श्रोत्रसम्बन्ध इति चेन्न शब्दात् शब्दान्तरोत्पतिक्रमेण श्रोत्रजातस्य शब्दस्य श्रोत्रेन्द्रियेण सम्बन्धात् प्रत्यक्षत्वसम्बन्धः। शब्दत्वसाक्षात्कारे समवेतसमवायसन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।

अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। घटाभाववभूतलमित्यत्र भूतलं विशेष्यं घटाभावो विशेषणं च। भूतले घटो नास्ति (भूतले घटाभावः) इत्यत्र भूतले इति विशेषणं घटाभावः विशेष्यं च द्रष्टव्यम्। एतेनानुपलब्धेः प्रमाणान्तरत्वं निरस्तम् अत्र उभयमपि विशेषणविशेष्यभावः सम्बन्धः। एवं अभावग्रहणे विशेषणविशेष्यभावः सन्निकर्षः। एवं सन्निकर्षड्कजन्यं ज्ञानं प्रत्यक्षम् तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।

## पुनरावृत्तिः(Recap)

- इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षज्ञानस्य लक्षणम्।
- निर्विकल्पकं सविकल्पकं चेतिद्विविधम् ।

- निष्प्रकारकं ज्ञानं निर्विकल्पकम्।
- सप्रकारकं ज्ञानं सविकल्पकम्। नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहि ज्ञानं सप्रकारकम् इति ।
- प्रत्यक्षज्ञानहेतुः इन्द्रियार्थसन्निकर्षः षड्विधः- संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावः चेति।
- चक्षुरिन्द्रियेण घटे प्रत्यक्षे जाते संयोगः सन्निकर्षः ।
- रूपत्वसामान्यप्रत्यक्ष संयुक्तसमवेतसमवायः।
- श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः।
- शब्दत्वसाक्षात्कारे समवेतसमवायसन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्।
- अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. प्रत्यक्षप्रमाणलक्षणं किम् ?
2. प्रत्यक्षं कति विधम्?
3. निर्विकल्पकस्य लक्षणम् किम्?
4. सविकल्पकस्य लक्षणम् किम्?
5. सन्निकर्षः कति विधः ?
6. प्रत्यक्षे कः सन्निकर्षः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. सन्निकर्षः कति विधः ? कानि च तानि?
2. रूपगुणप्रत्यक्षे कः सन्निकर्षः ?
3. शब्दप्रत्यक्षे कः सन्निकर्षः ?

4. शब्दत्वसाक्षात्कारे कः सन्निकर्षः ?
5. अभावप्रत्यक्षे कः सन्निकर्षः ?

## एकैकया खण्डिकयाउत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. प्रत्यक्षप्रमाणं विभागं च समर्थयत ।
2. समवायः सन्निकर्षः विशदयत ।
3. विशेणविशेष्यभावः सन्निकर्षः विशदयत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. प्रत्यक्षप्रमाणं विशदयत ।
2. सोदाहरणसहितं सन्निकर्षः प्रतिपादयत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् ।
2. द्विविधम् ।
3. निष्प्रकारं ज्ञानं निर्विकल्पकम् ।
4. सप्रकारकं ज्ञानं सविकल्पकम् ।
5. षड् विधः ।
6. चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः ।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६, पुटानि ८५-१४७
2. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८ पुटानि १९३-२११
3. अन्नम्भटः, तर्कसंग्रहः, भूमिका ।

## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahityaAcademy, Thrissur

# BLOCK - 4

# परोक्षप्रमाणानि

SGOU

# Unit-1
# अनुमानप्रमाणम्

## उद्देश्यानि(Learning Outcomes)

- तर्कसंग्रहस्य सामान्य ज्ञानं अवबोधयते ।
- अनुमानप्रमाणस्य तद्भेदानां च अवगमनाय।
- पञ्चावयवानां ज्ञानाय।
- हेत्वाभासानां अवबोधाय।

## प्राग्व्यपेक्षाः(Pre requisites)

हे पठितारः, स्मृतिः,अनुभवः, प्रत्यक्षादिभेदान्, प्रत्यक्षप्रमाणम् इत्यादिकं सलक्षणोदाहरणम् अस्माभिः पठितम्। पुनः अनुमानप्रमाणं पठितुमवसरः जातः।अनुमानप्रमाणे परामर्शः, व्याप्तिः, पक्षधर्मता अनुमानस्य भेदाः , पञ्चावयवाः इत्यादि विषयाः प्रतिपाद्यन्ते ।

## मुख्यपदानि(Key words)

अनुमितिः, अनुमानं, परामर्शः, पक्षता, संशयोत्तरप्रत्यक्षः, व्याप्तिः, स्वार्थानुमानं, परार्थानुमानं, व्यभिचारज्ञानं, पञ्चावयवाः, लिङ्गम्, पक्षः, सपक्षः, विपक्षः, हेत्वाभासः।

## Discussion

**अनुमानभेदः ।**

यथार्थानुभवः चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम्। प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दमिति भेदात् इत्युक्त किल।

तर्कसंग्रहः- अनुमितिकरणम् अनुमानम्। परामर्शजन्यं ज्ञानम् अनुमितिः।

व्याख्या- अनुमितिकरणत्वं अनुमानस्य लक्षणम्। परामर्शजन्यत्वे सति ज्ञानत्वम् अनुमितेःलक्षणम्।

**दीपिका -** अनुमानं लक्षयति- अनुमितिकरणं अनुमानमिति। अनुमितेर्लक्षणमाह परामर्शेति।ननुसंशयोत्तरप्रत्यक्षे अतिव्याप्तिः स्थाणुपुरुषसंशयानन्तरं पुरुषत्वव्याप्यकरादि-मानयम् इति परामर्शे सति पुरुष एव इति प्रत्यक्षजननात् । न च तत्रानुमितिरेवेति वाच्यम्। 'पुरुषं साक्षात्करोमि' इति अनुव्यवसायविरोधादिति चेत् न, पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात्। सिषाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता। साध्यसिद्धिरनुमिति प्रतिबन्धिका। सिद्धिसत्वेऽपि अनुविनुयाम् इतीच्छायामनुमितिदर्शनात् सिषाधयिषोतेजिका। साध्यसिद्धिरनुमिति प्रतिबन्धिका। सिद्धिसत्वेऽप्यनु-विनुयामनुमितिदर्शनात्सिषा-धयिषोत्तेजिका। ततश्चोतेजकाभावविशिष्टमण्यभावस्य दाहकारणत्ववत् सिषाधयिषाविरह-सहकृतसिद्ध्यभावस्यापि अनुमितिकारणत्वम् ।

**दीपिका -** परामर्शं लक्ष्ययति व्याप्तीति। व्याप्तिविषयकं यत् दर्शयति तथेति अनुमितिमनिमीय दर्शयति तज्जन्यमिति परामर्शजन्यमित्यर्थः ।

**तर्कसंग्रहः-** यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः।

**दीपिका-**व्याप्तेर्लक्षणमाह- यत्रेति यत्र धूमः तत्राग्निरिति व्याप्तेरभिनयः साहचर्यनियमः इति लक्षणम्। साहचर्य सामानाधिकरण्यम् तस्य नियमः हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगि साध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः।

**व्याख्या-**सहचरतीति सहचरी तयोर्भावः साहचर्यम्। साहचर्य सामानाधिकरण्यमिति। तस्य नियमः साहचर्यनियमः। साहचर्यनियमः व्याप्तिः इतिः। उदा- यत्र यत्र धूमः तत्र तत्र वह्निः इति साहचर्यनियमः व्याप्तिः।

यथा महानसः इति साहचर्यनियमः व्याप्तिः हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगि साध्यसामानाधिकरण्यं व्याप्तिरिति अर्थः। हेतुः धूमः हेतुसमानाधिकरणं पर्वतः तत्रात्यन्ताभावः घटात्यन्ताभावः घटात्यन्ताभावस्य प्रतियोगि घटः अप्रतियोगि साध्यो बहिनः इति वहनौ धूमस्य च समानाधिकरणत्वमस्ति इति व्याप्तिः।

**तर्कसंग्रहः-** व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।

**दीपिका-** पक्षधर्मतास्वरूपमाह व्याप्यस्येति।

**व्याख्या-** साध्यव्याप्तो हेतुः पक्षे वर्तते इति पक्षधर्मता वह्निधूमयोः पर्वतादि वृत्तित्वं पक्षधर्मताइति ।

## अनुमानभेदाः

**तर्कसंग्रहः-** अनुमानं द्विविधं स्वार्थं परार्थं च।

**दीपिका-**अनुमानविभागमाह अनुमानमिति । द्वैविध्यं दर्शयति स्वार्थं, परार्थमित्यादिना ।

**व्याख्या** -अनुमानं द्विविधम्। स्वार्थानुमानं, परार्थानुमानं च।

**तर्कसंग्रहः-** तत्र स्वार्थं स्वानुमितिहेतुः। तथाहि स्वयमेव भूयोदर्शनेन यत्र यत्र धूमः तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्ङ्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र यत्र धूमः तत्र तत्राग्निरिति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्शं इत्युच्यते। तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते ।तदेतत् स्वार्थानुमानम्।

ननु सकलवह्निधूमयोरसन्निकर्षात्कथं व्याप्तिग्रह इति चेन्न,

वह्नित्वधूमत्वरूपसामान्यलक्षणप्रत्यासत्या सकलवह्निधूमज्ञानसंभवात् ।

तस्मादिति।लिङ्गपरामर्शादित्यर्थः।

**व्याख्या -** स्ानुमितिहेतुत्वं स्वार्थानुमास्य लक्षणम्। तथाहि कश्चित् भूयो दर्शनेन पुनः पुनः दर्शनेन यत्र धूम तत्राग्निरिति महानसादौ व्याप्तिं गृह्णाति । ततः पर्वतसमीपं गतः। तत्र पर्वते अग्निं सन्दिहानः धूमं पश्यति। सः व्याप्तिंस्मरति यत्र यत्र धूमः तत्र तत्र वह्निरिति। ततः वह्निव्याप्यधूमवानय पर्वत इति जानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् 'पर्वतो वह्निमान्' अनुमितिजानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमान् इति अनुमितिज्ञानमुत्पद्यते। तदेतत् स्वार्थानुमानम्।न पार्थिवत्वस्य लोहलेख्यत्वस्य च शतशः सहचारदर्शनेऽपि वज्रमणौ व्यभिचारात् कथं व्याप्तिग्राहक इति चेन्न। व्यभिचारज्ञानविरहसहकृत सहकारजानस्य व्याप्तिग्राहकत्वात्। व्यभिचारजानं द्विविधम्। निश्चयः शङ्का चेति। तद्विरहः क्वचित् तर्कात् क्वचित् स्वतः सिद्ध एव। घूमारन्यो

व्याप्तियोकार्यकारणभावभङ्गासङ्गलक्षण तर्कः। ननु सकलवह्नि धूमयोः सन्निकर्षरहितत्वात् कथं व्याप्तिग्रह इति चेन्न, बह्नित्वधूमत्वरुपसामान्यलक्षणप्रत्यासत्वा सकलवह्निधूमज्ञान सम्भवात् ।

**परार्थानुमानम् ।**

**तर्कसंग्रहः-** यत्तु स्वयं धूमादग्निमनुमाय परं प्रतिबोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्। यथा पर्वतो वहिनमान् धूमवत्वात्, यो यो धूमवान् स स वहिनमान् यथा महानसः तथा चायं, तस्मात्तथेति। अनेन प्रतिपादिताल्लिंगात् परोऽप्यग्निं प्रतिपद्यते ।

**दीपिका-** परार्थानुमानमाह- यत्विति। यच्छब्दस्य तत्परार्थानुमानमिति तच्छब्देनान्वयः । पञ्चावयववाक्यमुदाहरति - यथेति।

## पञ्चावयवाः

**तर्कसंग्रहः-** प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमानिति प्रतिज्ञा, धूमवत्वात् इति हेतुः, यो यो धूमवान् स वह्निमान् यथा महानस इत्युदाहरणम्। तथा चायं इत्युपनयः, तस्मात्तथेति निगमनम्।

**दीपिका-** अवयवस्वरूपमाह प्रतिज्ञा इति। उदाहृतवाक्येषु प्रतिज्ञादिविभागमाह पर्वतो वह्निमानिति। साध्यवत्तया पक्षवचनं प्रतिज्ञा। पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं हेतुः। व्याप्तिप्रतिपादकं वचनमुदाहरणम्। व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनमुपनयः। हेतुसाध्यवतया पक्षप्रतिपादकवचनं निगमनम्। पक्षज्ञानं प्रतिज्ञाप्रयोजनम्। लिङ्गज्ञानं हेतुप्रयोजनम्। व्याप्तिज्ञानमुदाहरणप्रयोजनम्। पक्षधर्मताज्ञानमुपनयप्रयोजनम्। अबाधित्वादिकं निगमनप्रयोजनम्।

**तर्कसंग्रहः** - स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एवं करणम्। तस्माल्लिङ्गपरामर्शो ऽनुमानम् ।

**दीपिका-** अनुमितिकरणमाह स्वार्थेति। ननु व्याप्तिस्मृतिपक्षधर्मता ज्ञानाभ्यामेव अनुमितिसम्भवे व्याप्तिविशिष्टलिङ्गपरामर्शः किमर्थमङ्गीकर्तव्य इति चेन्न वह्निव्याप्यधूमवानयमिति शब्दपरामर्शस्थले परामर्शस्यावश्यकतया लाघवेन सर्वत्र

परामर्शस्यैव कारणत्वात्। लिङ्गंनकरणम् - अतीतानागतादौ व्यभिचारात्। व्यापारत्कारणम्करणमिति मते परामर्शद्द्वारा व्याप्तिज्ञानं करणम्। तज्जन्यत्वे सति तज्जन्यजनको व्यापारः अनुमानमुपसंहरति तस्मादिति।

**व्याख्या** व्याप्तिस्मरणेन पक्षधर्मताज्ञानेन च अनुमितिमानसम्भवे किमर्थ व्याप्तिविशिष्टलिङ्गपरामर्शः इति चेन्न बहिनव्याप्यधूमवानयमिति इति शब्दबोधपरामर्शस्थले परामर्शस्यावश्यकतया,सर्वत्र परामर्शस्य कारणत्वे लाघवम् ।

## लिङ्गम् - तद्भेदाश्च।

**तर्कसंग्रहः -** लिङ्गं त्रिविधम्। अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति। अन्वयेनव्यतिरेकेण व व्याप्तिमदन्वयव्यतिरेकि। यथा वह्नौ साध्येघूमत्वम्।

यत्र धूमः तत्र अग्निर्यथा महानसमित्यन्वयव्याप्तिः यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा हृद इति व्यतिरेकव्याप्तिः।

**दीपिका-** लिङ्गं विभजते लिङ्गमिति। अन्वयव्यतिरेकि लक्षयति अन्वयेनेति। हेतुसाध्ययोव्याप्तिः अन्वयव्याप्तिः । तदभावयोःव्याप्तिः व्यतिरेकव्याप्तिः।

**तर्कसंग्रहः-** अन्वयमात्रव्याप्तिकं केवलान्वयि।यथा घटोऽभिधेयः प्रमेयत्वात् पटवत्। अत्र प्रमेयत्वाभिधेयत्ययी व्यतिरेकव्याप्तिः नास्ति । सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।

**दीपिका-** केवलान्वयिनो लक्षणमाह अन्वयेति। केवलान्वयिसाध्यकं लिङ्ङ्ग केवलान्वयि । अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्। केवलान्वयिनमुदाहरति यथा घटोऽभिधेयः प्रमेयत्वादिति। ईश्वरप्रमाविषयत्वं सर्वपदाभिधेयत्वंच सर्वत्रास्तीति व्यतिरेकाभावः।

**तर्कसंग्रहः-** व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्वात्, यदितरेभ्यो न भिद्यते न तद् गन्धवत्, यथा- जलम्। न चेयं तथा। तस्मान्न तथेति अत्र यत् गन्धवत् तदितरभिन्नमिति अन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात्।

**दीपिका -** केवलव्यतिरेकिणो लक्षणमाह व्यतिरेकीति। तदुदाहरति पृथिवीति ननु इतरभेदः प्रसिद्धो वा न वा ?आद्ये यत्र प्रसिद्धिस्तत्र हेतुसत्वेऽन्वयित्वम्। असत्वेऽसाधारण्यम्। द्वितीये साध्यज्ञानाभावात्कथं तद्विशिष्टानुमितिः। विशेषेण ज्ञानाभावे विशिष्टज्ञानानुदयात्,

प्रतियोगिज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपि न स्यादिति चेन्न। जलादित्रयोदशान्योन्याभावानां त्रयोदशासु प्रत्येकप्रसिद्धानां मेलनं पृथिव्या साध्यते। त्रयोदशत्वावच्छिन्नभेदात्मक साध्यस्यैकाधिकरण वृत्तित्वाभावान्नान्वयि त्वासाधारण्ये, प्रत्येकाधिकरणप्रसिद्ध्या साध्यविशिष्टानुमितिः साध्याभावव्यापकीभूताभाव प्रतियोगित्वमिति व्यतिरेकव्याप्ति निरूपणम् चेति व्याख्या व्याप्तिः हेतोः धर्मः व्याप्तिः। व्याप्तिः द्विविधा अन्वयव्याप्तिः, व्यतिरेकव्याप्तिः च। हेतुसाध्ययोः व्याप्तिः अन्वयव्याप्तिः यत्र हेतुः तत्र साध्यः इति व्याप्तिः। यथा यत्र धूमः तत्र वहिनः यथा महानस इति। साध्यभावहेत्वभावयोः व्याप्तिः व्यतिरेकव्याप्तिः यत्र साध्यः नास्ति तत्र हेतुरपि नास्ति इति व्याप्तिः ।यथा यत्र वह्निः नास्ति तत्र धूमोऽपि नास्ति यथा ह्रदः इति ।

लिङ्गम्। लीनमप्रत्यक्षमर्थगमर्थयति बोधयति इति लिङ्गम् त्रिविधम्। अन्वयव्यतिरेकिलिङ्गम्, केवलान्वयिलिङ्गम्, केवलव्यतिरेकिलिङ्गञ्चेति। अन्वयव्यतिरेकि यस्य हेतोः अन्वयव्याप्तिः व्यतिरेकव्याप्तिः च स हेतुः अन्वयव्यतिरेकिलिङ्गम्। यथा साध्ये धूमत्वात् इति हेतुः। यथा यत्र यत्रधूम तत्र तत्र वहिह्नः यथा महानस इति। यथा वह्नि साध्ये धूमत्वात् इति हेतुः। यथा यत्र यत्र तत्र तत्र वहिनः यथा महानस इति अन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रदः इति व्यतिरेकव्याप्तिः। अत्र धूमत्वात् इति हेतौ अन्वयव्याप्तिः व्यतिरेकव्याप्तिश्च स्तः। अतः धूमत्वात् इति हेतु अन्वयव्यतिरेकिलिङ्गस्य उदाहरणम्।

केवलान्वयि यस्य हेतोः अन्वयव्याप्तिमात्रं स्यात् स हेतु केवलान्वयिलिङ्गम्। यथा घटः अभिधेयाः प्रमेयत्वात् पटवत्। यत्राभिधेयत्वम् तत्र प्रमेयत्वम् इति प्रमेयत्वस्य अन्वयव्याप्तिः। किन्तु प्रमेयत्वाभिधेयत्वयो व्यतिरेकव्याप्ति नास्ति। सर्वस्यापि प्रमेयत्वादभिधेयत्वात् च। केवलव्यतिरेकि यस्य हेतौ व्यतिरेकव्याप्तिमात्र स्यात् स हेतुः केवलव्यतिरेकिलिङ्गम्। यया पृथिवी इतरेभ्यो भिद्यते गन्धवत्वात् तदितरेभ्यो न भिद्यते न तद् गन्धवत् तद् इतरभिन्नम् इति अन्वयव्याप्तः दृष्टान्तो नास्ति। पृथिवीमात्रस्य पक्षत्वात् ।

**पक्षः।**

**तर्कसंग्रहः-** सन्दिग्धसाध्यवान् पक्षः। यथा धूमत्वे हेतौ पर्वतः ।

**दीपिका-** पक्षलक्षणमाह - सन्दिग्धेति ननु श्रवणानन्तरभाविमननस्थलेऽतिव्याप्तिः, तत्र वेदवाक्यैरात्मनो निश्चितत्वेन सन्देहभावात् किञ्च प्रत्यपि वह्नौ यत्रेच्छयानुमितिस्तत्राप्य व्याप्तिरिति चेन्न उक्तपक्षलताश्रयत्वस्य पक्षलक्षणत्वात्।

**तर्कसंग्रहः-** निश्चितसाध्यवान् सपक्षः। यथा तत्रैवमहानसः।

**दीपिका -**पक्षलक्षणमाह निश्चितेति।

**व्याख्या-** निश्चितसाध्यवत्वं सपक्षस्य लक्षणम्। यथा - यत्र धूमः तत्र वह्निः, यथा महानसः।

**तर्कसंग्रहः-** निश्चितसाध्याभावान् विपक्षः। यथा- महाह्रदः।

**दीपिका-**विपक्षमाह निश्चितेति।

## हेत्वाभासाः

अनुमितिप्रनिचयथार्यज्ञानविषयत्वं हेत्वाभासत्वम् हेतुवादाभासन्ते इति हेत्वाभासाः। दुष्टहेतसर्वः सव्यभिचारविरुद्धामिक्षासिद्धयाचिताः पञ्च हेत्वाभासाः। एवं सद्धतृन्निरूप्यातद्धेतून् (हेत्वाभासान्) निरूपयितुं विभजते- सव्यभिचारेति। अनुमितिप्रतियान्ययथार्थ ज्ञानविषयत्वं हेत्वाभासत्वम्। हेत्वाभासाः पञ्च सव्यभिचार, विरुद्धः सत्प्रतिपक्षः असिद्धः बाधितः चेति ।

## सव्यभिचारः ।

**तर्कसंग्रहः-**सव्यभिचारोऽनैकान्तिकः स त्रिविधः साधारणासाधारणानुपसंहारिभेदात् ।

**दीपिका -** सव्याभिचार विभजते विविध इति ।

**तर्कसंग्रहः-** तत्र साध्याभाववद्वृतिः साधारणोऽनैकान्तिकः। यथा पर्वतो वह्निमान्प्रमेयत्वादिति । तत्र प्रमेयत्वस्य वह्न्यभाववति हृदे विद्यमानत्वात् ।

**दीपिका-** साधारणं लक्षयति तत्रेति। उदाहरति यथेति।

**तर्कसंग्रहः-** सर्वपक्षविपक्षव्यावृतः पक्षमात्रवृत्तिरसाधारणः। यथा शब्दो नित्यः शब्दत्वादिति। शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृति।

**दीपिका-** असाधारणं लक्षयति सर्वेति।

**तर्कसंग्रहः-**अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तो नास्ति।

**दीपिका-** अनुपसंहारिणो लक्षणमाह अन्वयेति ।

**व्याख्या-** अनैकान्तिकत्वं सव्यभिचारस्य लक्षणम्। न एकान्तिक अनेकान्तिकः। एकान्ते साध्यवति न वर्तते इति अनैकान्तिकः। अनैकान्तिकः सव्यभिचारः। सव्यभिचारः त्रिविधः। साधारणसव्यभिचारः असाधारणसव्यभिचार, अनुपसंहारिसव्यभिचार चेति। साध्याभाववहतित्वं साधारणसव्यभिचारस्य लक्षणम्।

यथा- पर्वतो वह्निमान् प्रमेयत्वात् इति। अत्र हेतुः प्रमेयत्वात् साध्याभाववति वहन्यभाववति ह्रदे विद्यते। अतः प्रमेयत्वात् इति हेतुः साधारणसव्यभिचारः।

सर्वसपक्षविपक्षव्यावृतत्वे सति पक्षमात्रवृत्तित्वं असाधारणसव्यभिचारस्य लक्षणम्। यथा शब्दो नित्यः शब्दत्वात् इत्यत्र शब्दत्वात् इति हेतुः। अत्र शब्दत्व हि सर्वेभ्यो नित्येभ्यो अनित्येभ्यश्च व्यावृतं पक्षे शब्दे एवं वर्तते । अन्वयव्यतिरेकदृष्टान्तरहितत्वं अनुपसहारिणः लक्षणम्। यथा सर्वमनित्यं प्रमेयत्वात् इत्यत्र प्रमेयत्वात् इति हेतु: वाक्येऽस्मिन् सर्वस्य पक्षत्वात् अन्वयव्याप्तेः व्यतिरेकव्याप्तेः च दृष्टान्तो नास्ति। अतः प्रमेयत्वात् इति हेतु अनुपसंहारि।

**विरुद्धः।**

**तर्कसंग्रहः-** साध्याभावव्याप्तो हेतुः विरुद्धः।

यथा शब्दो नित्यः कृतकत्वादिति। कृतकत्वं हि नित्यत्वाभावनानित्यत्वेन व्याप्तम् ।

**दीपिका-** विरुद्धम् लक्षयति साध्येति।

**व्याख्या-**साध्याभावव्याप्तो हेतुः विरुद्धः।

यथा- शब्दो नित्यः कृतकत्वात् इत्यत्र कृतकत्वात् इति हेतुः। कृतकत्वात् जन्यत्वात् इत्यर्थः। अत्र कृतकत्व साध्याभावेन नित्यत्वाभावेन अनित्यत्वेन व्याप्तम्। अत: कृतकत्वात् विरुद्धः। सत्प्रतिपक्षःतर्कः यस्य साध्याभावसाधके हेत्वन्तरे विद्यते स सत्प्रतिपक्ष: ।। यथा शब्दोनित्यःकृतकत्वात् इति।

**दीपिका–**सत्प्रतिपक्षं संशयति यस्येति ।

**तर्कसंग्रहःतर्कसंग्रहः**-यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा- शब्दो नित्यः श्रावणत्वात् शब्दवत्। शब्दोऽनित्यः कार्यत्वात् घटवत्।

**असिद्धः ।**

**तर्कसंग्रहः-** असिद्ध:त्रिविध:। आश्रयासिद्ध: स्वरूपासिद्धः व्याप्यत्वासिद्धश्चेति।

**दीपिका-** असिद्धं विभजते असिद्ध इति।

**आश्रयासिद्धः।**

**तर्कसंग्रहः–**आश्रयासिद्धो यथा गगनारविन्दं सुरभिः अरविन्दत्वात् सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः स च नास्त्येव।

**दीपिका-** आश्रयासिद्धमुदाहरति गगनेति।

यथा-गगनारविन्दं सुरभिः अरविन्दत्वात् सरोजारविन्दवत् इत्यत्र अरविन्दत्वात् इति हेतुः। अथ गगनारविन्दो पक्षः। अतः अरविन्दत्वात् इति हेतु आश्रयासिद्धः।

**स्वरुपासिद्धः ।**

**तर्कसंग्रहः-** स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात्।

**दीपिका-** स्वरूपासिद्धमुदाहरति शब्देति।

**व्याख्या-** यः हेतुः पक्षे नास्ति स हेतुः स्वरूपासिद्ध, स्वरूपस्य असिद्धत्वात्स्वरूपासिद्धः। यथा शब्दः गुणः चाक्षुषत्वात् इत्यत्र चाक्षुषत्वात् इति हेतु: पक्षे शब्दे नास्ति शब्दस्य श्रावणत्वात् ।

**व्याप्यत्वासिद्धः**

**तर्कसंग्रहः -** सोपाधिको हेतुः व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वम् पाधित्वम्। साध्यसमानाधिकरणात्यन्ताभावऽप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठाऽ-त्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्। यथा- पर्वतो धूमवान् वह्निमत्वात् इत्यत्र आर्देन्धनसंयोग इति साध्यव्यापकत्वम्। यत्रवहि्नस्तत्रार्देन्धनसंयोगो नास्ति, अयोगोलके आर्द्रेन्धनसंयोगा- भावादिति साधनाऽव्यापकत्वम्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्देन्धनसंयोगः उपाधिः। सोपाधिकत्वावहि्नमत्वंव्याप्यत्वासिद्धम् ।

**दीपिका-**व्याप्यत्वासिद्धस्य लक्षणमाह सोपाधिक इति। उपाधेर्लक्षणमाह साध्येति। उपाधिश्चतुर्विधः - केवलसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्नसाध्य व्यापकः, उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति। आद्यः आर्देन्धनसंयोगः। द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र बहिर्द्रव्यतावच्छिन्न प्रत्यक्षत्वव्यापकमुद्भूत रूपवत्वम्। तृतीयो यथा प्रध्वंसो विनाशी जन्मत्वादित्यत्र जन्यत्वावाच्छिन्ननित्यत्वव्यापकं भावत्वम्। चतुर्थो यथा प्रागभावो विनाशी प्रमेयत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्व व्यापकत्वभावत्वम् ।

**व्याख्या-** सोपाधित्वे सति हेतुत्वं व्याप्यत्वसिद्धस्यलक्षणम्।साध्यव्यापकत्वे सति साधनाव्यापकत्वं उपाधिः। साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। यथा- पर्वतो धूमवान् वह्निमत्वात् इत्यत्र साध्यो धूमः साध्यसमानाधिकरणं पर्वतः साध्यसमानाधिकरणात्यन्ताभावः घटात्यन्ताभावः घटात्यन्ताभावस्य प्रतियोगी घटः अप्रतियोगी आन्धनसंयोगःइति आर्द्रेन्धनसंयोगस्य साध्यव्यापकत्वम्। साधनो वह्नि साधनवन्निष्ठात्यन्ताभावः आर्द्रेन्धनसंयोगाभावः (तप्तायोगोलके वह्निः अस्ति)। आर्द्रेन्धनसंयोगाभावस्य प्रतियोगी आर्द्रेन्धनसंयोगः इति आर्द्रेन्धनसंयोगस्य साधनाव्यापकत्वम्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वात् आर्द्रेन्धनसंयोगः उपाधिः। उपाधिसहितत्वात् वह्निमत्वात् इति हेतुः व्याप्यत्वासिद्धः।

**बाधितः ।**

**तर्कसंग्रहः-**यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स वाधितः। यथा वह्निरनुष्णो द्रव्यत्वादिति। अत्र अनुष्णत्वं साध्यं, तदभावः उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यत इति बाधितत्वम्।

**दीपिका-** बाधितस्य लक्षणमाह यस्येति। अत्र बाधस्य ग्राहयाभावनिश्चयत्वेन सत्प्रतिपक्षस्य विरोधजानसामग्रीत्वेन साक्षादनुमितिप्रतिबन्धकत्वम्। इतरेषां तु परामर्शप्रतिबन्धकत्वम्। तत्रापि साधारणस्याव्यभिचाराभाववत्तया, विरुद्धस्य सामानाधिकरण्याभाववतया, व्याप्यत्वासिद्धस्यविशिष्टव्याप्त्यभाववतया असाधारणानुपसंहारिणोः व्याप्तिसंशयाधायकत्वेन

च व्याप्तिज्ञानप्राप्तिबन्धकत्वम्। आश्रयासिद्धस्वरूपासिद्धयो पक्षधर्मताज्ञानंप्रतिबन्धकत्वम्। उपाधिस्तुव्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकः। सिद्धसाधनं तु पक्षतादिघटकतयाः आश्रयासिद्धेऽन्तर्भवतीतिप्राञ्चः,निग्रहस्थानान्तरमिति नवीनाः।

**व्याख्या-** यस्य साध्यस्व अभावः प्रमाणान्तरेण निश्चितः सः बाधितः। यथा वह्निः अनुष्णः द्रव्यत्वादित्यत्र द्रव्यत्वात् इति हेतुः। अत्र अनुष्णत्वं साध्यसाध्याभावः उष्णत्वं तदुष्णत्व स्पर्शनप्रत्यक्षप्रमाणेन इति प्रमाणान्तरेण गृह्यते। अतः द्रव्यत्वादिति हेतुः बाधितः। इति हेत्वाभासो समाप्तः ।

## पुनरावृत्ति(Recap)

- अनुमितिकरणम् अनुमानम्। परामर्शजन्यं ज्ञानम् अनुमितिः।
- व्याप्तिविषयकं यत् दर्शयति तथेति अनुमितिमनिमीय दर्शयति तज्जन्यमिति परामर्शजन्यमित्यर्थः।
- यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः ।
- यत्र धूमः तत्राग्निरिति व्याप्तेरभिनयः साहचर्यनियमः इति लक्षणम्।
- व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।
- अनुमानं द्विविधम्। स्वार्थानुमानं, परार्थानुमानं च।
- स्वानुमितिहेतुत्वं स्वार्थानुमास्य लक्षणम् ।
- प्रतिज्ञाहेतुदाहरणोपनयतिगमनानि पञ्चावयवाः।
- साध्यवत्तया पक्षवचन प्रतिज्ञा।
- पञ्चम्यन्त लिङ्गप्रतिपादक वचनं हेतुः।
- व्याप्तिप्रतिपादक वचनमुदाहरणम्।
- व्याप्तिविशिष्टलिङ्गप्रतिपादक वचनमुपनय।
- हेतुसाध्यवतया पक्षप्रतिपादकवधनं निगमनम्।
- लिङ्गं त्रिविविधम्- अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति।

- अन्वयमात्रव्याप्तिकं केवलान्वयि।
- व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि ।
- व्याप्तिः द्विविधा अन्वयव्याप्तिः, व्यतिरेकव्याप्तिः च ।
- हेतुसाध्ययोः व्याप्तिः अन्वयव्याप्तिः यत्र हेतुः तत्र साध्यः इति व्याप्तिः ।
- सन्दिग्धसाध्यवान् पक्षः ।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. अनुमानं नाम किम् ?
2. अनुमानं कति विधम्?
3. अनुमितिः नाम किम्?
4. परामर्शस्य स्वरूपं किम्?
5. पक्षधर्मतायाः लक्षणं किम्?
6. पञ्चावयवाः के?
7. स्वार्थानुमितिपरार्थानुमित्योः कारणं किम्?
8. लिङ्गं कति विधम्?
9. पक्षस्य लक्षणं किम्?
10. स पक्षस्य लक्षणं किम्?
11. विपक्षस्य लक्षणं किम्?
12. हेत्वाभासः कति विधाः?
13. सव्यभिचारः कति विधः?
14. विरुद्धस्य लक्षणं किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. का नाम व्याप्तिः ?
2. लिङ्गं कतिविधम्? के च ते?
3. साधारणस्य लक्षणं किम्?
4. असिद्धः कति विधः के चते?
5. आश्रयासिद्धः कः?
6. स्वरूपासिद्धस्य रूपं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

1. स्वार्थानुमानं नाम किम्?
2. अवयवाः कति विधः के च ते?
3. अन्वयव्यतिरेकिलक्षणं लिखत।
4. केवलान्वयि लक्षणं लिखत।
5. केवलव्यतिरेकिलक्षणं लिखत
6. विरुद्धस्य लक्षणं उदाहरणं च लिखत।
7. व्याप्यत्वासिद्धः कः?
8. बाधितस्य लक्षणं किम्?

## निर्दिष्टाभ्यासाः(Assignments)

1. आश्रयासिद्धस्य भेदाः विशदयत।
2. हेत्वाभासाः प्रतिपादयत।
3. न्यायरीत्या अनुमानप्रमाणं विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. अनुमितिकरणं अनुमानम्
2. द्विविधम्
3. परामर्शजन्यं ज्ञानं अनुमितिः
4. व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः।
5. व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।
6. प्रतिज्ञाहेतूदाहरणौपनयनिगमनानि।
7. स्वार्थानुमितिपरार्थानुमित्योःलिङ्गपरामर्शं एव कारणम्।
8. त्रिविधम्।
9. सन्दिग्धसाध्यवान् पक्षः।
10. निश्चितसाध्यवान् सपक्षः।
11. निश्चितसाध्याऽभाववान् विपक्षः।
12. पञ्चविधः।
13. त्रिविधः।
14. साध्याभावव्याप्तो हेतुर्विरुद्धः।

## सूचनाग्रन्थाः(References)

१. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६, पुटानि ८५-१४७

२. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८ पुटानि १९३-२११

३. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका।

## अधिकवाचनग्रन्थाः(Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahityaAcademy, Thrissur.


SGOU

# Unit-2
# उपमानप्रमाणम्

## उद्देश्यानि(Learning Outcomes)

- न्यायरीत्या उपमानप्रमाणज्ञानम् अवगाहते ।
- सर्वे दर्शनानां प्रमाणज्ञानं अवगाहते ।

## प्राग्व्यपेक्षाः(Pre requisites)

उपमीयते इति उपमानम् । उपमानं नाम अतिदेश वाक्यार्थज्ञानम् ।उपमिति लक्षयति संज्ञा संज्ञीति । संज्ञा नाम पदम् । संज्ञि नाम अर्थः । तयोः सम्बन्धः शक्तिः ।

## मुख्यपदानि(Key words)

उपमितिकरणं , उपमानम्, संज्ञा-संज्ञिसंबन्धं,गवयः, सादृश्यज्ञानम्

## Discussion

उपमानलक्षणं किम् ?

उपमितिकरणम् उपमानम् । संज्ञा-संज्ञिसम्बन्धज्ञानमुपमितिः तत्करणं सादृश्यज्ञानम् (अतिदेशवाक्यार्थस्मरणम्-अवान्तरव्यापारः)। तथाहिकश्चिद् गवयशब्दवाच्य- (पदार्थ)-मजानन्- कुतश्चिदारण्यकपुरुषात्-गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति । तदनन्तरमसौ'अयं गवयशब्दवाच्य, इत्युपमितिरुत्पद्यते ।

दीपिका - उपमानं लक्षयति-उपमिती'ति ।

उपमानं लक्षयति- उपमिति करणमिति। उपमिति लक्षयति संज्ञा संज्ञीति। संज्ञा नाम पदम्। संज्ञि नाम अर्थः। तयोः सम्बन्धः शक्तिः। तथा च पदपदार्थसम्बन्धज्ञानम् उपमितिरित्यर्थः। उपमानं नाम अतिदेश वाक्यार्थज्ञानम् ।अतिदेश वाक्यार्थस्मरण व्यापारः। उपमिति फलम्। गोसदृशो गवयपदवाच्य इत्याकारकवाक्याद् गोसदृशावच्छिन्न विशेष्यक गवयपदवाच्यत्व प्रकारेण यज्ज्ञानं जायते, तदेव करणम् ।

## पुनरावृत्ति(Recap)

- उपमानं लक्षयति- उपमिति करणमिति ।
- उपमितिंलक्षयति संज्ञा संज्ञीति ।
- संज्ञा नाम पदम् । संज्ञि नाम अर्थः । तयोः सम्बन्धः शक्तिः ।
- तथा च पदपदार्थसम्बन्धज्ञानम् उपमितिरित्यर्थः ।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. उपमानं नाम किम्?
2. संज्ञा नाम किम्?
3. संज्ञि नाम किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. उपमानस्य लक्षणं उदाहरणं च लिखत ।

## एकैकया खण्डिकयाउत्तराणि लिखत ।

**(Answer the following questions in a paragraph)**

1. सोदाहरणसहितम् उपमानं लिखत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. न्यायदर्शने उपमानं विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. उपमितिकरणं उपमानं ।
2. पदम् ।
3. अर्थं ।

## सूचनाग्रन्थाः(References)

1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६, पुटानि ८५-१४७
2. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८ पुटानि १९३-२११
3. अन्नम्भटः, तर्कसंग्रहः, भूमिका ।

## अधिकवाचनग्रन्थौ(Suggested Readings)

1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahityaAcademy, Thrissur.

# Unit-3
# शाब्दप्रमाणम्

Unit – 3 शाब्दप्रमाणम्

## उद्देश्यानि(Learning Outcomes)

1. तर्कशास्त्रग्रन्थैः साकं परिचयं प्राप्स्यति।
2. प्रमाणानां सामान्य ज्ञानाय ।
3. शाब्दबोधस्य शब्दप्रमाणस्य चावबोधाय ।
4. अयथार्थानुभवभेदानां ज्ञानाय ।
5. कर्मादि पञ्चपदार्थानाम् अवगमनाय ।

## प्राग्व्यपेक्षाः(Pre requisites)

बुद्धेः लक्षणं, कारणत्रैविध्यं, प्रत्यक्षप्रमाणम्, अनुमानं, हेत्वाभासादिकं च अस्माभिः पठितं खलु। सर्वव्यवहारहेतुः गुणो बुद्धिः ज्ञानम्। कारणं त्रिविधम् समवायि-असमवायि-निमित्तभेदात्। प्रमाणानि चतुर्धा प्रत्यक्षम् अनुमानम्-उपमानम्-शब्दः चेति। इन्द्रियार्थसन्निकर्षजन्यज्ञानं प्रत्यक्षम्। अनुमितिकरणं अनुमानम्। ततः उपमानं, शब्दप्रमाणम्, अयथार्थानुभवादिकं च पठामस्तावत् ।

## मुख्यपदानि(Key words)

आप्तवाक्यं, पदसमूहः, शक्तिः,जहल्लक्षणा, अजहल्लक्षणा, जहदजहळलक्षणा, आकाङ्क्षा, योग्यता , सन्निधिः, वाक्यार्थज्ञानं, वैदिकं,लौकिकं, शब्दज्ञानम्

## Discussion

**शब्दप्रमाणस्य किं स्वरूपम् ?**

आप्तवाक्यं शब्दः; आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। यथा गामानयेति शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः।

**दीपिका-** शब्दं लक्षयति - आप्तेति। पदलक्षणमाह- शक्तिमिति। अर्थस्मृत्यनुकूलः पदपदार्थसम्बन्धः शक्तिः। सा च पदार्थान्तरमिति मीमांसकः। तन्निरासार्थमाह- अस्मादिति। डित्यादीनामिव घटादीनामपि संकेत एव शक्तिः,नतु पदार्थान्तरमित्यर्थः। गवादिशब्दानां जातावेव शक्तिः विशेषणतया जातैः प्रथममुपस्थितत्वात्। व्यक्तिलाभस्त्वाक्षेपादिनेति केचित्। तन्न, गामानयेत्यादौ वृद्धव्यवहारात्सर्वत्रा नयनादेःव्यक्तावेव संभवेन जातिविशिष्ट-व्यक्तावेव शक्तिकल्पनात्। शक्तिग्रहस्तु वृद्धव्यवहारेण। तथाहि व्युत्पित्सुर्बालो गामानयेत्युत्तमवृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं दृष्ट्वा मध्यमवृद्धप्रवृत्ति जनकज्ञानान्तरान्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य'अश्वमानय, गां बधाने'ति वाक्यान्तरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः, अश्वशब्दस्य अश्वत्वविशिष्टे शक्तिरिति व्युत्पद्यते।

ननु सर्वत्र कार्यपरत्वाद्वयवहारस्य कार्यवाक्ये एव व्युत्पत्तिर्न सिद्धपर इति चेन्न, 'काञ्च्यां त्रिभुवनतिलको भूपतिः' इत्यादौ सिद्धेऽपि व्यवहाराद् 'विकसितपद्मे मधूनि पिवति मधुकरः' इत्यादौ प्रसिद्धपदसमभिव्याहारात्सिद्धेऽपि मधुकरादिपदे व्युत्पत्तिदर्शनाच्च ।

लक्षणापि शब्दवृत्तिः। शक्यसम्बन्धो लक्षणा। गङ्गायां घोष इत्यत्र गंगापदवाच्यप्रवाहसंबन्धादेव तीरोपस्थितौ तीरेऽपि शक्तिर्नकल्प्यते। सैन्धवादौलवणाश्वयोः परस्परसंबन्धाभावान्ना- शक्तिकल्पनम्। लक्षणा त्रिविद्या--(१) जहल्लक्षणा, (२) अजहल्लक्षणा (३) जहदजहलक्षणा चेति। यत्र वाच्यार्थस्यान्वयाभावस्तत्र जहदिति। यथा 'मञ्चाः क्रोशन्ति इति। यत्र वाक्यार्थस्याप्यन्वयस्तत्राजहदिति। यथा'छत्त्रिणौ गच्छन्तीति। यत्र वाच्यैकदेशत्यागेनैकदेशान्वयस्तत्र जहदजहदिति। यथा'तत्वमसि' इति। गौण्यपि लक्षणैव लक्ष्यमाणगुणसम्वन्धरूपा। यथा 'अग्निर्माणवक' इति व्यञ्जनापि शक्तिलक्षणान्तर्भूता-

शब्दशक्तिमूला, अर्थशक्तिमूलाच अनुमानादिनाऽन्यथासिद्धा । तात्पर्यानुपपत्तिर्लक्षणाबीजम्। तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यज्ञानं वाक्यार्थज्ञाने हेतु नानार्थानुरोधात्तु प्रकरणादिकं तात्पर्यम्। द्वारमित्यादौ पिधेहीति शब्दाध्याहारः। नन्वर्थज्ञानार्थत्वाच्छब्दस्य अर्थम् अविज्ञाय शब्दाध्याहारसंभवादर्थाध्याहार एव युक्त इति चेन्न, पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञानहेतुत्वात्। अन्यथा'घट' 'कर्मत्वम्' 'आनयन' 'कृतिः इत्यत्रापि शाब्दज्ञानप्रसंगात्। पंकजादिपदेषु योगरूढिः। अवयवशक्तिर्योगः समुदायशक्तिः, अन्यथा कुमुदेऽपि प्रयोगप्रसंगः। इतर।न्विते शक्तिरिति प्रभाकराः। अन्वयस्य वाक्यार्थ तया मानसंभवादन्वयांशेऽपि शक्तिर्न कल्पनीयेति गौतमीयाः।

**वाक्यार्थज्ञाने के हेतवः ?**

आकाङ्क्षायोग्यतासन्निधिश्च वाक्यार्यज्ञाने हेतुः ।

पदस्य पदान्तरव्यतिरेकप्रयुक्ताऽननुभावकत्वमाकाङ्क्षा। अर्थाऽबाधो योग्यता। पदानामविलम्बेनोच्चारणं सन्निधिः। तथा च आकाङ्क्षादिरहितं वाक्यमप्रमाणम्। यथा 'गौरश्वः पुरुषो हस्ती'ति नप्रमाणम्-आकांक्षाविरहात्। 'वह्निना सिञ्चती'ति न प्रमाणम्-योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि 'गामानयेत्यादिपदानि न प्रमाणम्-सान्निध्याभावात्।

दीपिका- आकाङ्क्षेति। आकांक्षादिज्ञानमित्यर्थः। अन्यथाकाङ्क्षादि- भ्रमाच्छाब्दभ्रमो न स्याद्।आकाङ्क्षां लक्षयति पदस्येति। योग्यता लक्षणमाह- अर्थेति। संनिधिलक्षणमाह- पदानामिति । अविलम्बेन पदार्थोपस्थितिः सन्निधिः। उच्चारणं तु तदुपयोगितया युक्तम्। गौरश्व इति । घटः कर्मत्व- मित्यनाकांक्षोदाहरणं द्रष्टव्यम् ।

**वाक्यं कतिविधम् ?**

वाक्यं द्विविधम् - वैदिकं-लौकिकं च। वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम् । लौकिकं त्वाप्तोक्तं प्रमाणम् । अन्यदप्रमाणम् ।

दीपिका- वाक्यं विभजते वाक्यमिति। वैदिकस्य विशेषमाह-वैदिकमिति। ननु वेदस्याऽनादित्वात् कथमीश्वरोक्तमिति चेन्न, वेदः पौरुषेयो वाक्यसमूहत्वात्, भारतादिवदित्यनुमानेन पौरुषेयत्वसिद्धेः। नच स्मर्यमाणकर्तृकत्वमुपाधिः । गौतमादिभिः शिष्यपरम्परया वेदेऽपि कर्तुः स्मर्यमाणत्वेन साधनव्यापकत्वात्, 'तस्मात 'तपस्तपनात्त्रयोवेदा अजायन्त इति श्रुतेश्च। ननु वर्णा नित्याः 'स एवायं गकार' इति प्रत्यभिज्ञाबलात्;तथा च कथं वेदस्यानित्यत्वमिति चेन्न, उत्पन्नो गकारो, नष्टो गकार इति प्रतीत्या वर्णानामनित्यत्वात् सोऽयं गकार इति प्रत्यभिज्ञायाः सेयं दीपज्वालेतिवत् साजात्यावलम्बनत्वात्। वर्णानां नित्यत्वेऽप्यनुपूर्वीविशिष्ट वाक्यस्यनित्यत्वाच्च। तस्मादीश्वरोक्तो वेदः। मन्वादिस्मृतीनामाचाराणां च वेदमूलतया प्रामाण्यम्। स्मृतिमूलवाक्यानामिदानीमध्ययनात्तन्मूलभूत। काचिच्छाखोच्छिन्नेति कल्प्यते। ननु पठ्यमानवेदवाक्योत्सादस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्यायुक्तत्वान्नित्यानुमेयो वेदो मूलमिति चेन्न, तथापि वर्गानुपूर्वीज्ञानाभावेन बोधकत्वासम्भवात्। नन्वेति पदानि स्वस्मारितार्थसंसर्गवन्त्याकाङ्क्षादिमत्पदकम्बकत्वात् सद्वाक्य- वदित्यनुमानादेव संसर्गज्ञानसम्भवाच्छब्दोन प्रमाणान्तरमिति चेन्न, अनुमित्यपेक्षया शाब्दज्ञानस्य विलक्षणस्य शब्दात्प्रत्येमीत्य नुव्यवसायसाक्षिकस्य सर्वसंमतत्वात्। नन्वर्थापत्तिरपि प्रमाणान्तरमस्ति, पीनो देवदत्तो दिवा न भुङ्क्ते इति दृष्टे श्रुते वापीनत्वान्यथानुपपत्त्या कल्प्यत इति चेन्न, देवदत्तो रात्रौभुङ्क्ते दिवाऽभुञ्जानत्वे सति पीनत्वादि इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात्। शते पञ्चाशदिति सम्भवोऽप्यनुमानमेव। इह वटे यक्षस्तिष्ठतीत्येतिह्यमज्ञातमूलकवस्तृकः शब्द एव। चेष्टापि शब्दानुमानद्वाराव्यवहारहेतुरिति न मानान्तरम्। तस्मात्प्रत्यक्षनुमानोपमान शब्दाश्चत्वार्येव प्रामाणानि ।

## पुनरावृत्तिः(Recap)

- आप्तवाक्यं शब्दः; आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः।
- लक्षणापि शब्दवृत्तिः। शक्यसम्बन्धो लक्षणा।
- लक्षणा त्रिविद्या--(१) जहल्लक्षणा, (२) अजहल्लक्षणा (३) जहाजहलक्षणा चेति।
- आकाङ्क्षायोग्यतासन्निधिश्च वाक्यार्यज्ञाने हेतुः।
- पदस्य पदान्तरव्यतिरेकप्रयुक्ताऽननुभावकत्वमाकाङ्क्षा।
- अर्थाऽबाधो योग्यता।
- पदानामविलम्बेनोच्चारणं सन्निधिः।
- वाक्यं द्विविधम् – वैदिक,लौकिक च।
- वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम्।
- लौकिकं त्वाप्तोक्तं प्रमाणम्।
- वाक्यार्थज्ञानं शब्दज्ञानम्। तत्करणं तु शब्दः।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. आप्तः कः?
2. वाक्यं नाम किम्?
3. आप्तवाक्यं किम्?
4. लक्षणा कति विधाः?
5. योग्यता नाम किम्?
6. सन्निधिः नाम किम्?
7. वाक्यं कतिविधम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. लक्षणा कति विधाः? काःच ताः?
2. वाक्यार्थज्ञाने हेतवःके?
3. आकाङ्क्षा नाम किम् ?
4. वाक्यं कतिविधम् ? कानि च तानि?

## एकैकया खण्डिकयाउत्तराणि लिखत ।

**(Answer the following questions in a paragraph)**

1. लक्षणा विशदयत ।
2. वाक्यार्थज्ञाने हेतवःके? लिखत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. तर्कसंग्रहरीत्या शब्दप्रमाणं विशदयत ।
2. न्यायदर्शने लक्षणा विशदयत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. यथार्थवक्ता ।
2. पदसमूहः ।
3. शब्दः ।
4. त्रिविधाः ।
5. अर्थाऽबाधो योग्यता।
6. पदानामविलम्बेनोच्चारणं सन्निधिः।
7. द्विविधम् ।

## सूचनाग्रन्थाः(References)

1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६, पुटानि ८५-१४७
2. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८ पुटानि १९३-२११
3. अन्नम्भटः, तर्कसंग्रहः, भूमिका ।

## अधिकवाचनग्रन्थाः (Suggested Readings)

1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

BLOCK - 5

# मीमांसा वेदान्तश्च

SGOU

# Unit-1
# मीमांसादर्शनस्य मौलिकतत्त्वानि

## उद्देश्यानि(Learning Outcomes )

- दर्शनं प्रति ज्ञानं लभते।
- मीमांसादर्शनं प्रति परिचयः प्राप्नोति ।
- नवीनाशयान् गृह्णाति ।
- जीवनमूल्यानि प्राप्नोति।

## प्राग्व्यपेक्षाः(Pre requisites )

जीवनस्य उद्देश्यानि कानि ? मरणानन्तरं जीवः अस्ति वा नास्ति वा? अहं कः अस्मि? इत्यादि संशयानां अन्वेषणं तेषां निवृत्तिः च भवति दर्शनम् । येन उपायेन सांसारिकाणाम् पदार्थानां वास्तविकं स्वरूपं ज्ञायते तदेव दर्शनम् । आस्तिकनास्तिकभेदेन भारतीयदर्शनं द्विविधं दृश्यते । यानि दर्शनानि वेदान् प्रमाणरूपेण स्वीकुर्वन्ते तानि आस्तिकदर्शनानि भवन्ति। यानि च वेदानां प्रमाण्यं निराकुर्वन्ति तानि नास्तिकदर्शनानि सन्ति। सांख्य - योग-न्याय - वैशेषिक - मीमांसा-वेदान्तदर्शनानि आस्तिकदर्शनानि सन्ति। चार्वाक-बौद्ध-जैनदर्शनानि च नास्तिकरूपे प्रतिष्ठितानि सन्ति।

षडास्तिकदर्शनेषु मीमांसा नाम दर्शनम् अन्यतमं अस्ति। मीमांसाशब्दस्य अर्थः तु पूजितो विचारः इति । मीमांसायाः पूर्वमीमांसोत्तरमीमांसारूपौ द्वौ भागौ स्तः। प्रथमं भागमेव वास्तविकम् एतत् नामधेयं दर्शनम् । इदमेव कर्ममीमांसा इति रूपेण प्रसिद्धम्। मीमांसादर्शने प्रमुखतः वेदानां यज्ञसंबन्धीवाक्यानां सम्यक् व्याख्यानमेव अस्ति। आचार्यः जैमिनिः अस्य दर्शनस्य उपज्ञाता भवति। श्रीकृष्णयज्वविरचित मीमांसा परिभाषा अस्य दर्शनस्य संग्रहः भवति ।

## मुख्यपदानि(Key words)

मीमांसा, कर्म, यज्ञादयः, अपूर्वः, प्रमाणानि, धर्मः, अधर्मः, विधिवाक्यानि, अर्थवादः, मन्त्ररूपः, ब्राह्मणरूपः, अर्थकर्म, गुणकर्म।

## Discussions

### 5.1.1 मीमांसादर्शनस्य मौलिकतत्त्वानि

भारतीयदर्शनेषु मीमांसादर्शनस्य महत्त्वपूर्णं स्थानं वर्तते। वैदिककर्मकाण्डरूपेण वाक्यशास्त्ररूपेण च इदम् दर्शनम् सहायकम् वर्तते। मीमांसायाः लक्ष्यं धर्मविषयप्रतिपादनमेव । अतः हि मीमांसकाः कर्मवादिनः । इदं शास्त्रं न केवलं दार्शनिकसाहित्याय अपितु व्याकरणधर्मशास्त्रादीनां अध्ययनाय अपि अत्यन्तं एव उपादेयं भवति। विचारोपायभूतं न्यायनिबन्धनं मीमांसाशास्त्रम्। पद-वाक्य - प्रमाणशास्त्रेषु च इदं शास्त्रं वाक्यशास्त्रस्य रूपेणापि विदुषां शोभते। शास्त्रे प्रकरणादिभिः वाक्यार्थानां नियमनम्, अथ च उपक्रमोपसंहारादिभिः लिङ्गैः ज्ञानस्य अनिवार्यतां साधितं वर्तते। अत एव इदं शास्त्रं वाक्यशास्त्ररूपेण अत्यन्तमेव महत्त्वपूर्णं वर्तते। मीमांसा नाम पूजितो विचारः। विचारो नाम मननम्। मानवः मननशीलप्राणिरस्ति। विचारस्य उत्कर्षेण मानवस्य मानवतायाश्चोत्कर्षः संभवति। अयमेव विचारः परिपक्वतामाप्नोति तदा आचाररूपेण परिणमति। यो हि विचारः आचारो वा भारतीयमनीषिभिः कर्तव्यः धर्मः उक्तः।अयमेव विचारख्यः धर्मः मीमांसापदवाच्यः।अर्थात् पूजितो विचारः नाम धर्म इति फलति।स एव मीमांसायाः प्रतिपाद्यविषयः। आचार्यमाधवेन जैमिनिन्यायमालायाः जिज्ञासाधिकरणे शास्त्रमिदमभिलक्ष्य विचारशास्त्रशब्दः प्रयुक्तः। वेदे अनेकेषु स्थलेषु उक्तविचाराः प्रवर्तिताः सन्ति। पार्थसारथिमिश्रेण स्वकीये श्लोकवार्तिकव्याख्याने मीमांसायाः अनादितां साधयता एवमुद्धृता - ब्रह्म प्रजापतये मीमांसा प्रोवाच। सोऽपि इन्द्राय। सोऽप्यादित्याय। स च वसिष्ठाय । सोऽपि पराशराय। पराशरः कृष्णद्वैपायनाय। सोऽपि जैमिनये।स च स्वोपदेशानन्तरमिमं मीमांसासूत्रं ग्रन्थे निबन्धवानिति।आचार्यः जैमिनिः पूर्वमीमांसादर्शनतत्त्वानि सूत्ररूपेण अलिखत्। कृष्णयज्वा अस्य दर्शनस्य मौलिकसिद्धान्तानां परिज्ञानाय प्रकरणग्रन्थः वर्तते मीमांसापरिभाषा। अस्यां परिभाषायां मीमांसादर्शनस्य मौलिकतत्त्वानां विचारः क्रियते।

### 5.1.2 धर्मः

मीमांसायाः प्रतिपाद्यविषयः धर्मः एव। तदेव च वेदस्य कर्मकाण्डभागेन अपि प्रतिपाद्यं विद्यते। वेदप्रतिपाद्यौ प्रयोजनवदर्थो धर्मः। अत एव चोदनालक्षणोऽर्थो धर्म इति धर्मस्य लक्षणं

विधीयते। चोदना नाम प्रवर्तना । प्रवर्तनैव धर्मः। धर्मस्य मीमांसा ,विचारः एव मीमांसादर्शनस्य प्रयोजनम्। अत एव विद्यते मीमांसासूत्रम् आम्नायस्य क्रियार्थत्वादानर्थक्यमत दर्शनम्। आम्नायो नाम वेदः। वेदो हि क्रियार्थः। अस्मात् कारणात् वेदस्य येन भागेन वाक्येन वा क्रिया न प्रतिपाद्यते तेषामपि सर्वेषां वाक्यानां निरर्थकता भवतीति अस्य सूत्रस्य अभिप्रायः। अतः वेदप्रतिपादिष्टसाधनमेव धर्मः तद्विपरीतः अधर्मः।

### 5.1.3 कर्म

मीमांसादर्शनम् कर्ममीमांसा इति नाम्नापि ख्यातम्। विश्वेऽस्मिन् कर्मैव श्रेष्ठं वस्तु। कर्मणा फलमवश्यमेव जायते। आचार्यजैमिनिः कर्मैव फलदायको इति मन्यते। यज्ञैरेव तत्तत्फलानामुत्पत्तिः भवति। यद्यपि कर्मानुष्ठानस्य फलप्राप्तेः च समये व्यवधानं दृश्यते, कर्मानुष्ठानम् अद्य सम्पद्यते फलप्राप्तिस्तु बहुकालानन्तरं भवति। वैषम्यमिमं दूरीकर्तुं मीमांसादर्शने अपूर्व नामको सिद्धान्तः प्रतिपादितः ।कर्मणः अपूर्वं जायते, तेन च फलप्राप्तिः भवति। इत्थम् अपूर्वमेव कर्मफलञ्च बाधयितृश्रृंगला वर्तते।

वेदविहितकर्मफलानां विषयेमीमांसकाः द्विधा विचारयन्ति। आचार्यः कुमारिलः तु धार्मिककृत्याणाम् अनुष्ठाने इष्टसाधनज्ञानमेव कारणम्। प्राभाकरमते तु कार्यताज्ञानमेव कारणपदेन व्यपदिश्यते।अनेन मतेन वेदविहितकृत्यानामनुष्ठानं कर्तव्यबुद्ध्या करणीयम् न सुखोपलब्धिबुद्ध्या । परन्तु कुमारिलमते इच्छाविशेषस्य सिद्ध्यर्थमेव कर्मविशेषं कर्तव्यम्। कुमारिलमतेन नित्यकर्माणां सन्ध्यावन्दनादीनामनुष्ठानैः पापक्षयो भवति तदभावे च प्रत्यवायो दोषो उत्पद्यते। प्रभाकरमते वेदविहितत्वाद् नित्यकर्माणि कर्तव्यानि सन्ति। वेदाः ज्ञेयमस्ति यत् अहरहः सन्ध्यामुपासीत। अतः कर्त्तव्यत्वादेव कृत्यानां सम्पादनं करणीयम् । प्रभाकरमते निष्कामकर्मयोगदृष्ट्यैव कार्याणि कर्तव्यानि।

वेदेषु काम्यप्रतिषिद्धनित्यनैमित्तिकानि त्रिविधानि कर्माणि दृश्यन्ते। तत्र काम्यस्तु तदेव कथ्यते यत् कयाचित् कामनया क्रियते यथा - स्वर्गकामो यजेत इति वाक्यानुसारं स्वर्गप्राप्तेः कामनया यजनरूपं कर्म कर्तव्यम्। कलञ्जं न भक्षयेत् इत्यादिरूपम् अनर्थजनकं कर्मवर्जनं कृतं वेदेषु। कलञ्जभक्षणं कर्म सुतरां निन्दितमस्ति अतः प्रतिषिद्धम्। नैमित्तिकं कर्म तु विशेषावसरे समापन्ने करणीयम्। सन्ध्यावन्दनादीनि अहैतुकरूपाणि कर्माणि तु नित्यकर्माणि सन्ति। किमपि कर्म अनुष्ठीयमानमेव सद्यः फलदायकं न भवति प्रत्युत तत्कर्मफलं कालान्तरे सम्भवति। यद्यपि फलोपगमकाले कर्माभावे सति तस्य फलोत्पादकत्वं न सिद्ध्यति, परं प्रश्नस्यास्य समाधानमेव मीमांसकाः अपूर्वरूपविशेषपदार्थं फलोत्पादकत्वं मन्यते।कर्मकारणात् अपूर्वः जायते, अपूर्वाच्च

फलमुत्पद्यते। अपूर्वस्य कल्पना तु मीमांसकानां मूलभूतमस्ति।

सर्वेषां भारतीयदर्शनानां मोक्षप्राप्तिरेव मूलोद्देश्यम् । प्रपञ्चसम्बन्धविलयो मोक्षः इति मोक्षस्वरूपमुक्तं मीमांसकैः। जगदनेन सह आत्मनः सम्बन्धविनाशस्यैव संज्ञा मोक्षः । अस्मिन् मते काम्यनिषिद्धकर्माणि बन्धनके भवतः। परन्तु नित्यनैमित्तिककर्माणि एतेभ्यः दोषेभ्यः रहितानि सन्ति। अतः एतानि कर्माण्येव मोक्षप्रदायकानि सन्ति मीमांसामते।

मीमांसकमते कर्माणि एव मोक्षसाधनानि सन्ति । परन्तु आत्मज्ञानमपि अनुपेक्षणीयम्। मोक्षप्राप्तौ प्रधानकारणं कर्म, अप्रधानकारणं च ज्ञानमेवास्ति। अतः कर्तव्यशास्त्रदृष्ट्या मीमांसा ज्ञानकर्मसमुच्चयं मन्यते।

## पुनरावृत्तिः(Recap )

- कृष्णयज्वायाः प्रकरणग्रन्थः भवति मीमांसापरिभाषा।
- मीमांसा कर्ममीमांसा इति रूपेण ज्ञायते।अतः हि मीमांसकाः कर्मवादिनः ।
- वेदप्रतिपादितेष्टसाधनमेव धर्मः ।
- तद्विपरीतोऽधर्मः।
- अपूर्वो नामको सिद्धान्तः प्रतिपादितः।
- काम्यनिषिद्धनित्यनैमित्तिकर्माणि
- कर्माणि एव मोक्षसाधनानि।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. मीमांसापरिभाषायाः कर्ता कः?
2. मीमांसापदस्य अर्थः कः?
3. वेदप्रतिपादितेष्टसाधनम् किम् ?
4. कर्मणः किम् जायते ?
5. चोदना नाम का ?
6. कुमारिलमते धार्मिककृत्यानां अनुष्ठाने किम् कारणम् ?
7. कर्माणि कति भवन्ति ?
8. किम् न भक्षयेत् ?
9. अपूर्वात् किम् उत्पद्यते ?
10. भारतीयदर्शनानां मूलोद्देश्यं किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. भारतीयदर्शनानां मूलोद्देश्यं किम् ?
2. त्रिविधानि कर्माणि कानि ?
3. प्रभाकरमते किम् कारणपदेन व्यपदिश्यन्ते ?

## एकैकया खण्डिकयाउत्तराणि लिखत ।

**(Answer the following questions in a paragraph)**

1. धर्मः नाम किम् ?
2. त्रिविधानि कर्माणि कानि ?
3. प्रभाकरमते किम् कारणपदेन व्यपदिश्यन्ते ?

## निर्दिष्टाभ्यासाः(Assignments)

1. मीमांसादर्शनम् संक्षिप्य लिखत।
2. मीमांसादर्शने कर्माणि विशदयत ।
3. मीमांसादर्शनस्य मौलिकतत्त्वानिप्रतिपादयत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. कृष्णयज्वा
2. पूजितो विचारः
3. धर्मः
4. अपूर्वः
5. प्रवर्तका
6. इष्टसाधनज्ञानम्
7. त्रीणि
8. कलञ्जम्
9. फलम्
10. मोक्षः

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६, पुटानि ८५-१४७
2. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८ पुटानि १९३-२११


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.

# Unit-2
# ग्रन्थकाराः विशिष्टग्रन्थाश्च

## उद्देश्यानि(Learning Outcomes)

- दर्शनं प्रति ज्ञानं लभते।
- मीमांसादर्शनग्रन्थकारान् प्रति परिचयः प्राप्नोति ।
- मीमांसादर्शनग्रन्थान् प्रति परिचयः प्राप्नोति
- नवीनाशयान् गृह्णाति ।
- जीवनमूल्यानि प्राप्नोति।

## प्राग्व्यपेक्षाः(Pre requisites)

जीवनस्य उद्देश्यानि कानि ? मरणानन्तरं जीवः अस्ति वा नास्ति वा? अहं कः अस्मि? इत्यादि संशयानां अन्वेषणं तेषां निवृत्तिः च दार्शनिकानाम् मुख्यविषयः । येन उपायेन सांसारिकाणाम् पदार्थानां वास्तविकं स्वरूपं ज्ञायते तदेव दर्शनम् । आस्तिकनास्तिकभेदेन भारतीयदर्शनं द्विविधं दृश्यते । यानि दर्शनानि वेदान् प्रमाणरूपेण स्वीकुर्वन्ते तानि आस्तिकदर्शनानि भवन्ति। यानि च वेदानां प्रमाण्यं निराकुर्वन्ति तानि नास्तिकदर्शनानि सन्ति। सांख्य - योग-न्याय - वैशेषिक - मीमांसा-वेदान्तदर्शनानि आस्तिकदर्शनानि सन्ति । चार्वाक-बौद्ध-जैनदर्शनानि च नास्तिकरूपे प्रतिष्ठितानि सन्ति।षडास्तिकदर्शनेषु मीमांसा नाम दर्शनम् अन्यतमं अस्ति। मीमांसाशब्दस्य अर्थः तु पूजितो विचारः इति । मीमांसायाः पूर्वमीमांसोत्तरमीमांसारूपौ द्वौ भागौ स्तः। प्रथमं भागमेव वास्तविकम् एतत् नामधेयं दर्शनम्। इदमेव कर्ममीमांसा इति रूपेण प्रसिद्धम्। मीमांसादर्शने प्रमुखतः वेदानां यज्ञसंबन्धीवाक्यानां सम्यक् व्याख्यानमेव अस्ति। अनेके आचार्याः अस्य दर्शनस्य उपज्ञाताः प्रचारकाः आसन् । ते अमूल्यान् ग्रन्थान् विरचितवन्तः। तेषां प्रभावः भारते अद्यापि सन्ति। जैमिनिः, कुमारिलभट्टः, प्रभाकरः, प्रमुखाः सन्ति।

## मुख्यपदानि(Key words)

जैमिनिः, मीमांसासूत्रम्, पूजितो विचारः, शबरभाष्यम्, कुमारिलभट्टः, प्रभाकरः, भाट्टमतम्, गुरुमतम्।

### 5.2.1जैमिनेः मीमांसासूत्रम्

मीमांसासूत्राणां रचयिता महर्षिः जैमिनिः वर्तते। अस्य दर्शनस्य मूलग्रन्थः भवति जैमिनिसूत्रम्। तत्र 2745सूत्राणि सन्ति. मीमांसासूत्रं द्वादशाध्यायेषु विभक्तं वर्तते। अतः एवेदं द्वादशलक्षणी नाम्नापि ज्ञायते।महर्षिः जैमिनिः देवताकाण्डाख्योऽन्येषां चतुर्णामध्यायनामपि रचनामकरोत्। एषु सूत्राणां संख्या वर्तते 436 । मीमांसा नाम पूजितो विचारः। विचारो नाम मननम्। विचारस्य उत्कर्षेण मानवस्य मानवतायाः च उत्कर्षः संभवति। अयमेव विचारः परिपक्वतामाप्नोति तदा आचाररूपेण परिणमति।यो हि विचारः आचारो वा भारतीयमनीषिभिः कर्तव्यः धर्मः उक्तः।अयमेव विचाराख्यः धर्मः मीमांसापदवाच्यः। अर्थात् पूजितविचारो नाम धर्म इति फलति। स एव मीमांसायाः प्रतिपाद्यविषयः।

जैमिनेः समयःक्रिस्त्वब्दे द्वीतीयशताब्दीतः पूर्वं भवितुं नार्हति, यतो हि स बादरायणस्य समकालीकः आसीत्। नागार्जुनेन प्रवर्तितं शून्यवादं स वेत्ति स्म इति प्रो.यकोबीमहोदयः प्रतिपादयति। पण्डितः उमेशमिश्रः जैमिनेः कालः क्रिस्तोः शतद्वयवर्षाणि पूर्वं निर्धारयति। तैः उक्तं यत् जैमिनीयसूत्राणां प्रथमो व्याख्याता उपवर्षो बभूव। एवं पतञ्जलेः कालात् पूर्वं उपवर्षस्य, तस्मात् पूर्वं जैमिनेः कालः इति विचारः युक्तियुक्तः।

### 5.2.2 भर्तृमित्रः

भर्तृमित्रस्य भाष्यस्य वर्णनं श्लोकवार्तिकस्य दशमे श्लोके प्राप्यते। परन्तु तद्भाष्यं अनुपलब्धं वर्तते।भर्तृमित्रः तत्त्वशुद्धिनाम्न्यः वृत्तेः रचनां कृतवान् तत्र चार्वाकसिद्धान्तस्य समर्थनं वर्तते।मीमांसा हि भर्तृमित्रादिभिरलोकायतीव लोकायती कृता।परन्तु भर्तृमित्रेण तस्य निराकरणं कृतम्।

### 5.2.3 शबरस्वामिः

शाबरस्वामिनः पूर्वं मीमांसाशास्त्रस्य स्थितिः अनिश्चितायां अवस्थायां आसीत्। केवलं याज्ञिकपरम्पराणां समीकरणे एव तस्याः शक्तिः निहिताः आसन्।आचार्यशबरस्योदयं यावत् ईदृशाः अपि सम्प्रदायाः समुदिताः आसन् ये वेदान् आक्षिपन्ति स्म। यदर्थं शबरस्वामिने कटिबद्धता आवश्यकी अभूत्। आत्मतत्त्वविवेचनावसरे विज्ञानवादस्य खण्डनम् अस्य प्रत्यक्षं प्रमाणं वर्तते। अत्रैव मीमांसाशास्त्रं यत् पूर्वं केवलं याज्ञिकविचारधारायाः एकं शास्त्रमासीत्,वेदस्य रक्षाव्रतं धारयति। यस्य निर्वाहाय अस्य दर्शनस्य समग्रविशेषतानां निधित्वेन कर्तव्यता समापन्ना।

शबरस्वामिनः जीवनविषये निश्चिततथ्यानि न प्राप्तः। कतिपयानां विदुषां मन्तव्यमस्ति

यत् शबरस्वामिनः प्रथमं नाम आदित्यादेव आसीत्। शबरस्वामिनः देशकालविषये अस्ति विद्वत्सु विप्रतिपत्तिः। शबरस्वामिनः एकः एव रचना मीमांसासूत्रोपरि शाबरभाष्यं विद्यते। या च तेषां ख्यातये तान् च सरस्वत्या वरदपुत्रसाधनाय पर्याप्ता विद्यते। मीमांसायाः क्षेत्रे जैमिनिसूत्रानन्तरं सर्वतः प्रथमा कृतिरियमेवोपलभ्यते। अत एवास्य प्राचीनतमत्वं सुस्पष्टमेव। शबरस्वामिः कथयति- धर्मः प्रसिद्धो अप्रसिद्धो वा प्रसिद्धश्चेन्न जिज्ञासितव्यः। अप्रसिद्धश्चेन्नेतराम्।

### 5.2.4. कुमारिलभट्टः

शबरस्वामि यां धारां प्रावहयत् तस्य विकासे कुमारिलभट्टस्य अद्वितीयं स्थानं अस्ति।कुमारिलभट्टस्य प्राक् मीमांसादर्शनस्य स्थितिः अत्यन्तमेव दयनीया आसीत्।बौद्धसिद्धान्तस्य प्रभावेण वेदसंस्कृतिः दर्शनं च क्षीणताम् याति स्म। अस्मिन् संकटापन्ने काले अस्य दर्शनस्य संरक्षणाय कुमारिलभट्टसदृशानां विदुषां आविर्भावः जातः। एतेषां कालः अनेकेषां प्रमाणानां समर्थनेन 700ई.निर्धारयितुं शक्यते।एते शङ्कराचार्यस्य समकालिकाः आसन्निति शंकरदिग्विजये अस्ति उल्लेखः। कुमारिलभट्टः मीमांसायाः कर्मसिद्धान्तस्य प्रतिपादकः आसीत्। एवं श्रूयते यत्यदा कुमारिलभट्टः शास्त्रार्थे शंकरेण पराजितः जातः तदा वेदान्तसिद्धान्तस्य अनुगामी अवर्तत।

मीमांसादर्शने शाबरभाष्यस्योपरि कुमारिलस्य त्रयः महत्त्वपूर्णाः टीकाग्रन्थाः प्रसिद्धाः सन्ति। शाबरभाष्यं त्रेधा विभज्य ते व्याख्यामकुर्वन्। तेषु प्रथमः श्लोकवार्तिकाख्यः।अयं व्याख्याग्रन्थः शाबरभाष्यस्य तर्कपादोपरि वर्तते। द्वितीयः व्याख्याग्रन्थः वर्तते तन्त्रवार्तिकाख्यः। अयम् ग्रन्थः प्रथमाध्यायस्य द्वितीयपादादारभ्य तृतीयाध्यायं यावत् वर्तते। तृतीयः टुप्टिकानाम्ना विख्यातः वर्तते। अयम् शाबरभाष्यस्य अन्तिमेषु नवषु अध्यायेषु वर्तते। अस्याः टुप्टिकायाः उपरि वेंकटदीक्षितस्य वार्तिकाभरणनाम्नी टीका वर्तते।

### 5.2.5 मण्डनमिश्रः

कुमारिलभट्टस्य अनुयायिषु मण्डनमिश्रस्य ऐतिहासिकं स्थानमस्ति। मण्डनमिश्रस्य जीवनकालसन्दर्भे शङ्करेण सह यः शास्त्रार्थः संजातः स एव निर्णायकत्वेन स्वीकर्तव्यो भवति। शास्त्रचर्चायाः परिणामः परस्परगुरुशिष्यभावस्वीचकार एव पर्यवस्यति। शास्त्रस्य निर्णायिका मण्डनमिश्रस्य पत्नी भारत्येवासीत्। शास्त्रस्य पराजयानन्तरं मण्डनमिश्रः शङ्कराचार्यस्य शिष्यत्वमङ्गीकृत्य मीमांसकोऽपि सन् परिनिष्ठितो वेदान्तविज्ञः अभूत्। कुमारिलभट्टस्य शिष्योऽपि सन् मण्डनमिश्रः विधिविवेके तत्र तत्र भट्टपादमतं समालोचयन् प्रतिभाति तथापि अलं वा गुरुभिर्विवादेन इत्यादि वाक्येन ज्ञायतेयत् मण्डनमिश्रः कुमारिलभट्टे पूज्यत्वबुद्धिम् आदधाति इति।

मण्डनमिश्रप्रणितेषु ग्रन्थेषु अप्रतिहतवैदुष्यं स्फुरति। तेषु मीमांसायां विधिविवेकः,विभ्रमविवेकः, भावनाविवेकः, मीमांसानुक्रमणिका चेति प्रसिद्धाः सन्ति। नैष्कर्म्यसिद्धि इत्यादि वेदान्तग्रन्थाः अनेन रचिताः। यद्यपि मण्डनमिश्रः कुमारिलभट्टस्य शिष्यः वर्तते तथापि विधिविवेके स्वकीयं स्वतन्त्रं मतमुपस्थापयति। विभ्रमविवेके ख्यातीनां विचारः क्रियते।भावनाविवेके प्राधान्येन भावनायाः विचारः वर्तते। मीमांसानुक्रमणिका तस्य प्रकरणग्रन्थः वर्तते। यश्च मण्डनमिश्रस्य वैदुष्यं द्योतयति।अत्र मण्डनमिश्रस्य इदं वैशिष्ट्यं यत् एकैकेन पादेन तत्तदधिकरणसिद्धान्तः प्रदर्शितः। एवं क्रमेण मण्डनमिश्रः मीमांसादर्शने उन्नतशिखरं अस्ति। ब्रह्मसिद्धिः नैष्कर्म्यसिद्धिः ग्रन्थप्रणयनावसरे अयं सुरेश्वराचार्यनाम्ना वेदान्ती जातः।

### 5.2.6 पार्थसारथिमिश्रः

मीमांसादर्शने पार्थसारथिमिश्रस्य स्थानमपि अत्युन्नतं अस्ति। सः भाट्टमतानुयायी आसीत्।मीमांसादर्शने पार्थसारथीमिश्रस्य चत्वारो ग्रन्थाः सन्ति द्वौ ग्रन्थौ भट्टपादव्याख्यारूपौ द्वौ मौलिकौ च। न्यायरत्नाकरः तन्त्ररत्नश्च श्लोकवार्तिकस्य टुप्टीकयोः व्याख्यारूपौ ,न्यायरत्नमाला,शास्त्रदीपिका चेति स्वतन्त्रौ ग्रन्थौ वर्ततः।न्यायरत्नमालायां भट्टप्रभाकरयोः विवादास्पदानां विषयाणां प्राधान्येन निरूपणं वर्तते।

### 5.2.7 कृष्णयज्वा

मीमांसादर्शनस्य मौलिकसिद्धान्तानां परिज्ञानाय मीमांसादर्शनस्य प्रकरणग्रन्थः वर्तते मीमांसापरिभाषा। अस्य परिभाषाग्रन्थस्य कर्ता भवति श्रीमद् कृष्णयज्वा।

### 5.2.8 अप्पयदीक्षितः

आचार्य अप्पयदीक्षितस्य मीमांसादर्शनस्य चत्वारः प्रमुखाः ग्रन्थाः सन्ति। विधिरसायनम्, उपक्रमपराक्रमः, वादनक्षत्रावलिः, चित्रकूटः। ततश्च आचार्यलौगाक्षी -भास्करस्य तर्कसंग्रहः, मीमांसादर्शनस्य अत्यन्तमेव महत्वपूर्णः ग्रन्थः वर्तते। आचार्योऽन्नंभट्टकृत तन्त्रवार्तिकस्य सुबोधिनीटीका, आचार्यरामेश्वरसूरिणः द्वादशलक्षण्याः सुबोधिनीटीका इत्यादयः मीमांसादर्शनस्य महत्तवपूर्णाः ग्रन्थाः सन्ति।

### 5.2.9 प्रभाकरमिश्रः

कुमारिलभट्टानन्तरं मीमांसादर्शनस्य प्रभावी आचार्यः वर्तते आचार्यप्रभाकरः। मीमांसादर्शने आचार्यप्रभाकरनाम्ना स्वतन्त्रः सम्प्रदायः प्राचलत्। दार्शनिकदृष्ट्या शास्त्रीयाधारेण च सम्पन्नत्वादियं परम्परा भारतीयवाङ्मये उच्चावस्थां प्राप्ता।कुमारिलवत् प्रभाकरोऽपि

शबरस्वामिभाष्यस्य व्याख्यां कृतवान् । प्रभाकरमिश्रः शबरभाष्यस्योपरि बृहतीनाम्नी टीकां प्रणितवान्। अस्याः बृहतीटीकायाः अपरं नाम निबन्धनोऽपि वर्तते। अत एव प्रभाकरमिश्रः निबन्धकारः। शबरभाष्योपरि लघ्वीनाम्नी टीकायाः उल्लेखोऽपिविद्यते प्रभाकरस्य। यस्यापरं नाम विवरणं वर्तते।प्रभाकरमिश्रमतप्रतिष्ठापकाचार्यः आचार्यशालिकनाथमिश्रः बृहतेःउपरि ऋजुविमलापञ्जिका , लघ्वेः उपरि च दीपशिखापञ्जिका टीकाकृता। अथ च प्रकरणपञ्जिका नामकस्य प्रकरणग्रन्थस्य प्रणयनमपि कृतम्।

### 5.2.10 मुरारिमिश्रः

भट्टप्रभाकरसम्प्रदायातिरिक्तो यः सम्प्रदायः मीमांसादर्शने प्रचलितः वर्तते तस्य प्रवर्तकः वर्तते आचार्यः मुरारिमिश्रः। अत एव अयं सम्प्रदायः मुरारिनाम्ना मीमांसा जगति प्रसिद्धः वर्तते। मुरारेः तृतीयः पन्था इति प्रसिद्धमाभाणकं वर्तते।आसु तिसृषु परम्परासु भाट्टपरम्परायाः सर्वाधिकप्रचारोऽभूत्। इयं तृतीयं मुरारिपरम्परा तु नाममात्रावशिष्टैव। अस्य कारणं वर्तते एतत् परम्परालिखितस्य साहित्यस्य लोपः। तथापि एतस्याः परम्परायाः शास्त्रीयं स्वरूपं तु यत्र तत्र अस्माभिः प्राप्यते।

एवं मीमांसादर्शनस्य विविधदार्शनिककारान् तेषां सम्प्रदायभेदान् च परिचयं प्राप्ताः।

### पुनरावृत्तिः(Recap)

- मीमांसादर्शने प्रमुखाः दार्शनिकाः सन्ति।
- जैमिनिः मीमांसासूत्रम् रचितवान्।
- मीमांसासूत्रं द्वादशाध्यायी नाम्ना अपि प्रसिद्धम्।
- शबरस्वामिः मीमांसासूत्रोपरि भाष्यं रचितवान्।
- शाबरभाष्यस्योपरि कुमारिलः त्रयः टीकाग्रन्थाः अरचयत्।
- श्लोकवार्तिकम्, तन्त्रवार्तिकम्, टुप्टिका च कुमारिलस्य टीकाग्रन्थाः।
- प्रभाकरः शाबरभाष्यस्योपरि बृहतीनाम्नि टीका प्रणीतवान्।
- मीमांसादर्शने भाट्टमतं, गुरुमतं, मुरारीमतं इति त्रयः सम्प्रदायाः सन्ति।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. मीमांसासूत्रस्य कर्ता कः?
2. मीमासासूत्रे कति सूत्राणि सन्ति?
3. मीमांसाशब्दस्य अर्थः कः?
4. शबरस्वामिः कस्योपरि भाष्यं लिखितवान्?
5. कुमारिलभट्टस्य जीवनकालः कदा भवति?
6. कुमारिलभट्टस्य मतम् केन नाम्ना प्रसिद्धम् भवति?
7. प्रभाकरस्य टीकायाः नाम किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. लघ्वी नाम्नि टीका कः लिखितवान् ?
2. कुमारिलभट्टस्य टीकानां नामानि कानि?
3. मीमांसादर्शने तृतीयं कस्य मतम् भवति?

## एकैकया खण्डिकयाउत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. लघ्वी नाम्नि टीका कः लिखितवान् ?
2. कुमारिलभट्टस्य टीकानां नामानि कानि?
3. मीमांसादर्शने तृतीयं कस्य मतम् भवति?
4. भाट्टमतमनुसृत्य मीमांसायाः कर्मसिद्धान्तं प्रतिपादयत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. मीमांसादार्शनिकाः तेषां ग्रन्थाः च।
2. भाट्टमतमनुसृत्य मीमांसायाः कर्मसिद्धान्तं प्रतिपादयत ।
3. मीमांसाशास्त्रे मुरारिमतस्य प्राधान्यं लिखत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. जैमिनिः
2. 2745
3. पूजितो विचारः
4. मीमांसासूत्रस्योपरि
5. 700ई
6. भाट्टमतम्
7. बृहती

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६, पुटानि ८५-१४७
2. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८ पुटानि १९३-२११


## अधिकवाचनग्रन्थाः(Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.

# Unit - 3

# वेदान्तः, प्रस्थानत्रयं, ब्रह्म, अविद्या च

## उद्देश्यानि(Learning Outcomes)

After successful completion of the course,

- दर्शनं प्रति ज्ञानं लभते।
- वेदान्तदर्शनम् ज्ञानं लभते।
- वेदान्तदर्शनग्रन्थान् प्रति परिचयः प्राप्नोति।
- नवीनाशयान् गृह्णाति ।
- जीवनमूल्यानि प्राप्नोति।

## प्राग्व्यपेक्षाः(Pre requisites)

आस्तिकनास्तिकभेदेन भारते मुख्यतया नवदर्शनानि सन्ति। यानि दर्शनानि वेदान् प्रमाणरूपेण स्वीकुर्वन्ते तानि आस्तिकानि। यानि च वेदानां प्रामाण्यं न स्वीकुर्वन्ते तानि नास्तिकदर्शनानि भवन्ति। साङ्ख्ययोगन्यायवैशेषिकमीमांसावेदान्तदर्शनानि आस्तिकदर्शनानि सन्ति। चार्वाकजैनबौद्धदर्शनानि नास्तिकदर्शनानि सन्ति। आस्तिकदर्शनेषु वेदान्तः अन्यतमः अस्ति। वेदेषु अन्तः भवन्ति उपनिषदः । अतः उपनिषदः वेदान्तरूपेण ज्ञायन्ते। वेदान्तदर्शनस्य अन्तिमलक्ष्यः ब्रहमप्राप्तिः। “वेदान्तो नाम उपनिषत् प्रमाणं” इति वेदान्तसारवाक्यानुसारं वेदानामन्तो वेदान्तः अर्थात् उत्तरभागः उपनिषद्भागो निश्चीयते।

## मुख्यपदानि(Key words)

शङ्कराचार्य्रः,उपनिषद्, ब्रह्मसूत्रं,भगवद्गीता, प्रस्थानत्रयम्, ब्रह्म, अज्ञानं, अविद्या, अधिकारी, विषयः, सम्बन्धः, प्रयोजनं, साधनचतुष्टयं, अनुबन्धचतुष्टयं, ज्ञानयोगः, कर्मयोगः, भक्तियोगः, बादरायणः।

## Discussions

### 5.3.1 वेदान्तः

वेदान्तदर्शनं सर्वदर्शनमूर्धन्यम्। वेदस्यान्तिमसिद्धान्तस्य निरूपकत्वात्उपनिषादाम् वेदान्तः इत्येषा संज्ञार्था। उपनिषद एव वेदान्तशब्दवाच्याः। वेदानाम् अन्तः सारभूतः अर्थः यत्र इति वेदान्तशब्दस्यार्थःसाम्प्रदायिकैः कल्पितः।औपनिषादानां वचनानां मिथो विरोधेन अवभासमानानां सिद्धान्तानां विरोधपरिहाराय बादरायणः ब्रह्मसूत्रं व्यरचयत्।उपनिषद्, ब्रह्मसूत्रं, भगवद्गीता च वेदान्तदर्शनस्य आधारग्रन्थाः भवन्ति । एते प्रस्थानत्रयम् इति नाम्ना प्रसिद्धाः। आचार्यशङ्करः, रामानुजः,मध्वः, निम्बार्कः इत्यादयः प्रस्थानत्रयस्य भाष्याणि रचितवन्तः। भाष्येष्वेतेषु शाङ्करभाष्यमाद्यं प्राचीनतमंच अस्ति। ज्ञानमार्गस्य चरमं लक्ष्यम् अद्वैतमिति स मन्यते।

सदानन्दरचितवेदान्तसारानुसारं ब्रह्म एव सत्यं,तद्रूपत्वात् आत्मापि सदेव । तद्भिन्नं सर्वमेव अज्ञानजन्यं भ्रमरूपमेवास्ति। यथा रज्जौ सर्पस्य, शुक्तौ रजतस्य भ्रान्तिः जायते। तथैव अत्रापि नित्यशुद्धबुद्धब्रह्मणि जगतः भ्रम उत्पद्यते। तद् भ्रान्त्यनुकूळमेव सुखदुःखमोहादयः जायन्ते। पूर्वजन्मसंस्कारवशात् सच्छास्त्राभ्यासेन च सांसारिक सुखदुःखमोहेभ्यः सन्तप्तः सन् परमशान्तिलाभाय श्रद्धया गुरुचरणशरणागतो जिज्ञासुर्यदा तमनुवर्तते,तदा तदुपदेशात् अध्यारोपापवादन्यायेन ,अहं ब्रह्मास्मिस्वयम् अनुभवति, कर्मबन्धनात् मुच्यते च।अतः क्रियमाणानि कर्माणि तं न अनुबध्नन्ति। प्रारब्धकर्माणां तु भोगेन क्षयो भवति एव। यथा भस्मीभूतानि बीजानि न पुनरंकुरोत्पादने समर्थानि भवन्ति,तथैव भस्मीभूतानि संचितकर्माणि न पुनः फलोन्मुखाः भवन्ति। एवं त्रिविधकर्मक्षये जाते कर्मफलरूपककारणाभावात् पुनर्जन्मरूपकार्याभावः स्वयमेव सिद्धः ,अयमेव ब्रह्मभावः मोक्षः इत्युच्यते।

वेदान्तसारे प्रथमं अधिकारीविषयसंबन्धप्रयोजनरूपेण अनुबन्धचतुष्टयं प्रतिपादयति। साधनचतुष्टयसम्पन्नः प्रमाता वेदान्तशास्त्रस्य अधिकारी भवति। नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसंपत्तिः, मुमुक्षुत्वं च साधनचतुष्टयम्। अध्यारोपापवादन्यायेन ब्रह्मतत्त्वं प्रतिपादयति। वस्तुनि अवस्त्वारोपः अध्यारोपः। अत्र ब्रहमैव सद्वस्तु, अन्यत्सर्वं अवस्तु एव। अत ब्रह्मणि जगत्प्रपञ्चस्य आरोपः अध्यारोपः इति उच्यते। एवं

अज्ञानलक्षणं प्रतिपाद्यते। अज्ञानं तु सदसद्भ्यां अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञः इत्याद्यनुभवात्। अज्ञानस्य आवरणविक्षेपेति द्वे शक्तिविशेषे स्तः। आवरणशक्त्या ब्रह्मणः यथार्थस्वरूपं आवृणोति। विक्षेपशक्त्या अन्यत् किञ्चित् रूपेण अवभासते। तदनन्तरं सृष्टिक्रमं प्रतिपाद्यते। अपवादेन ब्रह्मणः यथार्थं स्वरूपस्य विवरणं करोति। रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्वम् अपवादः।जहदहलक्षणेन तत्त्वमसि वाक्यस्य प्रदर्शनं करोति। अन्ते जीवन्मुक्तस्वरूपं निरूपयति।

### 5.3.2 अद्वैतवेदान्तः

आचार्यशङ्करस्य अद्वैतविषयकस्य सिद्धान्तस्य प्रभावः सर्वत्रैव सान्द्रतया घनीभूततया चात्यन्ताधिकतया विततो वर्तते यद् वेदान्त इत्येतेन पदेन वस्तुतः अद्वैतवेदान्तस्य एव बोधो भवति। अस्त्यपि अद्वैतवादः सर्वेष्वपि वादेषु श्रेष्ठः गुरुतमश्च । वेदान्तदर्शनस्य मर्म तत्रैव चरमसीमायां समुन्मीलितं भवति।तस्मात् अत्र अद्वैतवेदान्तरीत्या वेदान्तदर्शनस्य प्रमुखसिद्धान्ताःसंक्षिप्ततया प्रतिपाद्यन्ते।

अद्वैतमिति पदं प्रथमतया बृहदारण्यकोपनिषदि प्रतिपादितम्।द्वयोरभावः द्विता,द्वितैव द्वैतं,तन्न विद्यते यस्मिन् अद्वैतम् इति विग्रहः। अद्वैतवेदान्तदर्शनं ब्रह्मसंज्ञिकामेव सत्तामेकां सत्यां मन्यमानं सकलमपि जगत्प्रपञ्चं हि असत्यं - मिथ्येति प्रतिपादयति । जगतः सर्वेऽपि व्यवहाराः अनुभूतिमवलम्बमानाः प्रचलन्ति।सर्वेषांव्यवहाराणां प्राक् ब्रह्मात्मविज्ञानात् सत्यत्वोपपत्तेः स्वप्नव्यवहारस्य प्राक् प्रबोधात् इति श्रीशङ्करः सूत्रभाष्ये प्रतिपादयति।विषयानुभूत्यभ्यन्तरे तेनविषयिणः सत्ता स्वयमेव सिद्ध्यति। विषयस्य प्रतीतिस्तु तावदेव भवति यावत् ज्ञातृरूप आत्मोपलभ्यते। आत्मलाभाभावे विषयस्य ज्ञानन्तु न मनागपि भवति। तस्मादिदमेव ज्ञातं ज्ञायते यत् जगदसत्यमात्मैव सत्यः। सर्वेऽपि प्राणिनः स्वसत्तायां विश्वसन्ति सुदृढतया।आचार्यः स्वभाष्ये प्राह-सर्वो हि आत्मास्तित्वं प्रत्येति, न ,नाहमस्मीति। यदि हि नात्मत्वप्रसिद्धिः स्यात् सर्वो लोको नाहमस्मीति प्रतीयात्।आत्मा ज्ञानं ज्ञाता चास्ति। न वस्तुतः ज्ञाता ज्ञानात् पृथक्। ज्ञातृज्ञानयोः मध्ये न विद्यते भिन्नता। अद्वितीयस्य ब्रह्मण एव सत्यता।

जीवो जगच्चेत्येतौ द्वौ पदार्थौ स्थूलदृष्ट्यैव दृश्येते। सूक्ष्मदृष्ट्या चेत् विमृश्यते तदा आत्मा इत्येष एक एव पदार्थः। तस्यैव सत्तास्ति। न कस्यचन अन्यस्य ।जगत्सत्ता तु व्यावहारिकी। व्यवहारार्थं जगत्सत्ता स्वीक्रियते। मृदादिवत् सदेकम् अद्वितीयं सत्यम्। नामरूपाभ्यां विक्रियमाणाःपदार्थाः स्वाभ्यन्तर-भागविनिविष्टकारणशक्त्या सह परिवर्तन्ते। न कदापि विकृतयः आत्मस्वरूपं भवन्ति। चैतन्यं ब्रह्म एव। पदार्थाः,अतः स्वजीवनकाले ब्रह्मानुस्यूता एव भूत्वा स्थातुं शक्नुवन्ति। न त्रिकालेऽपि किमपि वस्तु हि आत्मनः पृथक् भूत्वा सन्तिष्ठते। तस्मात् एका अद्वैतसत्तैव सर्वत्र संलक्ष्यते। अत एव कठोपनिषदाह-

यदेवेह तदमुत्र यदमुत्र तदन्विह ।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।।

एषैव निर्विकल्पा निरुपाधिका निर्विकारा च सत्ता वेदान्तदर्शने ब्रह्म इत्युच्यते। तच्च ब्रह्म निर्गुणसगुणभेदेन द्विविधम्। निर्गुणब्रह्मणः एव पारमार्थिकत्वात् किञ्च तद्व्याख्यायामेव श्रुतेः पर्वावसानत्वात्, आचार्यशङ्करमतेन उपनिषदां प्रतिपाद्यो विषयो निर्गुणं ब्रह्म एव।विषयो जीवब्रह्मैक्यं शुद्धं प्रमेयं, तत्रैव वेदान्तानां तात्पर्यात् इति च वेदान्तसारः। सगुणं ब्रह्म तु जगदिव मायाविशिष्टम्। ब्रह्मणः परमार्थतां निर्णेतुं द्विविधं लक्षणं स्वीक्रियते। स्वरूपलक्षणं तटस्थलक्षणं च। स्वरूपे सति व्यावर्तकं स्वरूपलक्षणम्। स्वरूपलक्षणं पदार्थस्य सत्यं पारमार्थिकं रूपं वोधयति। यावद्लक्ष्यकालमनवस्थिततत्वे सति व्यावर्तकं तटस्थलक्षणम्। तटस्थलक्षणं कतिपयकालावस्थायिनः आगन्तुकान् गुणान् एव निर्दिशति। निर्विकल्प-निरुपाधिक-निर्विकारं ब्रह्म स्वरूपलक्षणेन लक्ष्यते। सविकल्पकं सोपाधिकं सविकारं च तत् तटस्थलक्षणेन विषयीक्रियते। सत्यं ज्ञानमनन्तं ब्रह्म इति ब्रह्मणः लक्षणं तैत्तिरीयोपनिषदि उक्तम् अस्ति। ब्रह्म कदापि स्वकीयान्निश्चितात् रूपात् न व्यभिचरितं भवति तस्मात् तत् सत्यमिति,चिद्रूपत्वात् तद् ज्ञानमिति, कस्मादपि प्रविभक्तं न भवति तदतः अनन्तं इत्युक्तम्।

### 5.3.3 प्रस्थानत्रयम्

उपनिषद् शब्दस्तु उप- नि- इति उपसर्गपूर्वकात् सद्धातोः क्विप् प्रत्यये कृते निष्पद्यते।अतः शब्दस्यास्य अर्थः भवति- तत्त्वज्ञानाय गुरोः पार्श्वे निषीद्य तत्त्वज्ञानस्य प्राप्तेः प्रवृत्तिः - अत्र सद् धातोः त्रयः अर्थाः सन्ति। विशरणम्- नाशः , गतिः- ज्ञानम्, अवसादनम् -शैथिल्यम्। उपनिषदाम् अध्ययनेन संसारस्य बीजस्वरूपायाः अविद्यायाः नाशं भवति,तेन ब्रह्मणः प्राप्तिर्भवति ब्रह्मणः समीपगमनं वा भवति,ब्रह्मणः ज्ञानं वा भवति ,एवञ्च संसारावगमनमूलं बन्धनम् अविद्यारूपं शिथिलयति दुःखानि च विनश्यन्ति। अत एव शङ्कराचार्यः अविद्यानाशं दुःखनिरोधं ब्रह्मप्राप्तिञ्च अर्थत्रयं गृहीत्वा उपनिषदः ब्रह्मविद्याः द्योतकरूपः ग्रन्थाः मन्यते। वस्तुतः उपनिषदः एव निखिले विश्वे स्वकीयैः ज्ञानालोकैः अध्यात्मज्ञानस्य प्रचारं प्रसारञ्च अकार्षुः। उपनिषदां संख्या अष्टोत्तरशततः द्विशतं यावत् मन्यते। एतासु एकादश उपनिषदः मुख्याः सन्ति।एतासु प्रामाणिकासु उपनिषत्सु शङ्करेण स्वकीयं भाष्यं लिखितम्।ऐतरेयम् छान्दोग्यम्,बृहदारण्यकम्, मुण्डकम्, माण्डूक्यम्, कठम्, प्रश्नम्,तैत्तिरीयम्, केनम्, ईशम् च दशोपनिषदः। अत्र ब्रह्मविद्याप्राप्तये साधनानि, ब्रह्मविद्याजिज्ञासूनाम् अवश्यकगुणविशेषाः,

कर्ममार्गस्य जटिलत्वम्, ज्ञानमार्गस्य सुगमत्वम्, अनासक्तकर्मपरत्वम्, वैराग्यम्, च इत्यादयः आत्मज्ञानप्राप्तये साधनविषयाः प्रतिपादिताः। उपनिषत्सु तत्त्वानुशीलपराः नैकविधाः कथाः श्रूयन्ते। औपनिषदः मननशीलः मुनयः जगतो मूलतत्त्वानुसन्धाने बुद्धिपरिकराः आसन्निति परिलक्ष्यते। प्रपञ्चिकानां नैकविधानां वस्तूनां विभिन्नतायामेकत्वसम्पादकं तत्त्वं किं स्यात् ? तादृशतत्त्वज्ञानस्य उपयः कः ?इति शंकायां पञ्चभूतानुशीलनमार्गेणात्मतत्त्वविचारं कृत्वा मुनयः तादृशं आत्मतत्वं प्रत्यक्षीकृतवन्तः। तेषां दृष्ट्या आन्तरबाह्यजगतः न कोऽपि भेदोऽस्तीति सिद्ध्यति। कठोपनिषदि नचिकेतसः कथा, छान्दोग्योपनिषदि आरुणिश्वेतकेतुसंवादरूपायाः न्यग्रोधकथया तत्त्वमसि, माण्डूक्ये अयमात्म ब्रह्म, बृहदारण्यके अहं ब्रह्मास्मि इत्यादिषु एषः एव सिद्धान्तः प्रतिपादितः। एवं सप्रपञ्च-निष्प्रपञ्च-ब्रह्मस्वरूपवर्णनम्, मनस्तत्त्वविवेचनम्, कर्मसन्यासमोक्षसिद्धान्ताः तथा भारतीयविविधदर्शनानां मूलभूताः सर्वेऽपि सिद्धान्तास्तत्र विशदीकृताः। एवं च भारतीयाध्यात्मिकविचारधारायाः उपजीव्यत्वादुपनिषदः एव प्रथमस्थानत्वेन अभिधीयन्ते।

### 5.3.4 श्रीमद्भगवद्गीता

प्रस्थानत्रय्यां द्वितीयं प्रस्थानं भवति श्रीमद्भगवद्गीता। भगवता श्रीकृष्णेन महाभारतयुद्धस्य काले मोहग्रस्तं पार्थं प्रति तं धर्मकार्यं संलग्नं कर्तुं तस्य च सांसारिकमोहबन्धनं कर्तितुं दूरीकर्तुं गीतायाः उपदेशः दत्तः। गीतायां अष्टादशाध्यायाः सप्तशताधिकश्लोकाः (700)च सन्ति। गीतायां प्रतिपादितम् -

> सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
> पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ।।

भगवान् वेदव्यासः पञ्चमतुल्यं महाभारतं पुराणानि उपपुराणानि च रचितवान्। महाभारते आध्यात्मिकविज्ञानप्रतिपादिका निखिलवेदान्तसारभूता गीता समुपलभ्यते। गीतायाः सर्वश्रेष्ठता सर्वजनग्रहणीयता च सर्वेषु प्रस्थानेषु तथा विभिन्नेषु वेदान्तशास्त्रेषु परिलक्ष्यते।गीतायां ज्ञानयोगः, कर्मयोगः, भक्तियोगः, राजयोगः,देवासुराणां निरूपणम्, आत्मस्वरूपं विस्तरेण प्रतिपादयति।आत्मस्वरूपविषये गीतायाः द्वितीये अध्याये प्रतिपादितं यद् आत्मा अयम् न कदाचिज्जायते नैव च म्रियते, न भूतकाले कदाचिद् उत्पन्नः आसीत् नैव न भविष्यत्काले उत्पत्स्यति, अयम् अजः, नित्यः, शाश्वतः .पुराणः अस्ति। एवञ्च देहे हन्यमाने अपि अयम्

केनचिन्न हन्यते -

न जायते म्रियते वा कदाचित् नायं भूत्वाऽभविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।

ज्ञानस्य माहात्म्यमपि गीतायां उक्तम् । ज्ञानमेव सर्वश्रेष्ठं मोक्षसाधनं वर्तते।-

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।

एवं एतादृशैः अनेकैः वैशिष्ट्यैः गीतायाः विषये केनचित् उक्तम् -

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता।।

### 5.3.5 ब्रह्मसूत्रम्

बादरायणविरचितं ब्रह्मसूत्रम् तृतीयप्रस्थानं भवति। ग्रन्थेऽस्मिन् वेदान्तदर्शनस्य मूलभूतसिद्धान्तानां प्रतिपादनं व्यवस्थितरूपे सरलया च समुपलभ्यते। अस्य ग्रन्थस्य सूत्रोपरि अनेके धीमन्तः विद्वांसः व्याख्यारूपेण भाष्यग्रन्थानां रचनां कृतवन्तः। शङ्कराचार्यः ब्रह्मसूत्रभाष्यं नामकं भाष्यग्रन्थं विरच्य वेदान्तदर्शनस्य बहूपकारकं कृतः। श्रीसुरेश्वराचार्यस्य शिष्यः सर्वज्ञात्ममुनिः ब्रह्मसूत्रोपरि संक्षेपशारीरकं नामकं प्रख्यातमेकं भाष्यं विरचितवान्।

त्रिषु प्रस्थानेषु न्यायप्रस्थानस्य महत्त्वं अत्यन्तं महत्त्वपूर्णं वर्तते। चतुर्भिरध्यायैः वेदान्तशास्त्रस्यास्य यानि सूत्राणि रचयामास, तत्र 'अथातो ब्रह्मजिज्ञासा' इत्यारभ्य वैदिकज्ञानकाण्डविचारः प्रवर्तितः।व्यासविरचितानि ब्रह्मसूत्राणि वेदान्तसूत्राणि शारीरकसूत्राणि उत्तरमीमांसासूत्राणीति नाम्ना प्रसिद्धानि। ब्रह्मसूत्रे समन्वय- विरोधपरिहार-साधन-फलश्चेति चत्वारः अध्यायाः सन्ति। प्रत्येकाध्याये चत्वारः पादाः सन्ति। प्रत्येके पादे भिन्नभिन्नविषयोपेतानि बहूनि अधिकरणानि सन्ति। शङ्करमतेन 555सूत्राणि, 191अधिकरणानि च सन्ति।

### 5.3.6 ब्रह्म

'बृहि वृद्धौ' इति वृद्ध्यर्थकाद् 'बृह्' धातोः 'बृंहेर्नोऽच्च' इति सूत्रेण कर्तरि मनिन् प्रत्यये ब्रह्मशब्दो निष्पद्यते। बृंहते वर्धते इति ब्रह्म, बृंहति वर्धयति प्रजाः इति वा ब्रह्म। निरतिशयमहत्वलक्षणवृद्धिमत्वात् सर्वव्यापकत्वात् ब्रह्मेति अन्वर्थं अभिधानम्। उद्धृतं च तस्मात् भामतीकृता - बृहत्वाद् बृंहणत्वादात्मैव ब्रह्मेति गीयते इति । सर्वत्र विद्यमानत्वात्

कालत्रयेऽपि सत्वात् सर्ववस्तुषु अनुस्यूतत्वात् ब्रह्मणः देशतः कालतः वस्तुतश्च परिच्छेदो न संभवति । अद्वैतवेदान्ते ब्रह्मैव प्रतिपाद्यविषयः। त्रिकालाबाध्यत्वरूपं सत्यत्वं ब्रह्मण्येव वर्तते इत्यतः ब्रह्मैव केवलं सत्यम्। जगतः अधिष्ठानभूतं सच्चिदानन्दस्वरूपं एकमद्वितीयं परमात्मतत्वं ब्रह्म।

एकत्वेऽपि तस्य सगुणनिर्गुणभेदेन द्वैविध्यम्। ब्रह्मव्यतिरिक्तं यत् किञ्चित् इह दृश्यते तत्सर्वं मिथ्यारूपम्। ब्रह्म तु स्वयंसिद्धमपि अविद्यया न उपलभ्यते।

## 5.3.7 अविद्या

वेदान्तदर्शने अविद्यासंज्ञकमेकं तत्त्वं वर्णितमस्ति।अविद्याएव अज्ञानं ,माया इति रूपेण वेदान्तदर्शने ज्ञायते। निर्विशेषनिर्विलक्षण-ब्रह्मणः सविशेषसलक्षणं जगत् कथमुत्पद्यत, कथञ्चतस्मादेकस्माद् ब्रह्मणः नानाविधं जगदिदं सृष्टमभूदित्येतादृशप्रश्नाः मायातत्त्वावबोधम् अन्तरा न समाहिताः भवितुमर्हन्ति। अतः तदवबोधमपेक्ष्यते। आचार्यशङ्करः ब्रूते यन् माया भगवतो ब्रह्मणः अव्यक्तशक्तिरस्ति। सैव जगदिदमुत्पादयति।

अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्यात्रिगुणात्मिका परा।
कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते।(110.विवेक) ।

अज्ञानस्य आवरणविक्षेपसंज्ञिके द्वे शक्ती स्तः। अज्ञानस्य आवरणशक्त्या वस्तुनः यथार्थस्वरूपं आवृणोति। विक्षेपशक्त्या लिङ्गादि ब्रह्माण्डान्तं जगत् सृजति। वेदान्तदर्शनं केवलमेकं ब्रह्म इत्येतन्नामकं तत्त्वं सत्यं नित्यञ्च मन्यते। तत् तस्यैव सत्तां पारमार्थिकीमवगच्छति। तद्दृष्ट्या अन्यत् सर्वमप्यवभासमानं जगत् तदीयं विकृतं रूपमेव। तच्च विकृतं रूपं न सत्। तद् भङ्गुरं विनश्वरञ्च वर्तते। अज्ञानात् किं वा अविद्याहेतोः यद् वा मायावशात् विकृतं तत् सर्वं प्रकृतमिव सत्यमिव परमार्थमिव संलक्ष्यते। अविद्या सत्यमावृणोति असत्यञ्च वितनोति। यदैव ज्ञानज्योतिः प्रादुर्भवति तदैव तद् अज्ञानं तिरोहितं जायते।ज्ञानाविर्भावात् यथार्थस्थितिः पुरोऽवतिष्ठते। इदं ज्ञानमेव वेदान्तदर्शनस्य भाषायां ब्रह्म इत्युक्तम् किञ्च इदमज्ञानमेव तद्भाषायां मायाअथवा अविद्या इति निगदितमस्ति।श्रुतिस्मृतिर्वचोभिः उदीर्यमाणा परमेश्वरस्य एषा मायाशक्तिः अज्ञानमेव भविष्यतीति संक्षेपशारीरकायां उक्तम्।वेदान्तसारे अज्ञानं प्रतिपादितं- "अज्ञानं तु सदसद्भ्यां त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात्" ।

वेदानांसारभूतत्वेन विराजते वेदान्तदर्शनम्। तदेव मोक्षोपायसाधनं लक्षीकृत्य निर्मिते अस्मिन् खण्डे वेदान्तदर्शनमादाय विचारः कृतः।भारतीयदर्शनेषु वेदान्तदर्शनस्य मूर्धन्यं स्थानं

वर्तते। अत्र वेदान्तदर्शनस्य सामान्यपरिचयः प्रतिपादितः। तदनु वेदान्तदर्शनस्य आधारभूतस्य प्रस्थानत्रयस्य विचिन्तनं कृतः। अनेन वेदान्तदर्शनस्य सामान्यपरिचयः जायते।

## पुनरावृत्तिः(Recap)

- वेदान्तो नाम उपनिषद्प्रमाणम् ।
- उपनिषदः वेदान्तरूपेण ज्ञायन्ते।
- उपनिषत् भगवद्गीता ब्रह्मसूत्रं च प्रस्थानत्रयरूपेण ज्ञायन्ते।
- वेदानां अन्तिमः भागः भवति उपनिषत्।
- वेदान्तसारे प्रथमं अधिकारीविषयसंबन्धप्रयोजनरूपेण अनुबन्धचतुष्टयं प्रतिपादयति।
- नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसंपत्तिः, मुमुक्षुत्वं च साधनचतुष्टयम्।
- आचार्यः शंकरः दशोपनिषदः भाष्यं अलिखत्।
- अयमात्मा ब्रह्म, प्रज्ञानं ब्रह्म, तत्त्वमसि, अहं ब्रह्मास्मि चत्वारि महावाक्यानि।
- स्मृतिग्रन्थः भवति भगवद्गीता।
- ब्रह्मसूत्रं युक्तिप्रस्थानं भवति।
- ब्रह्मसत्यं जगत्मिथ्या भवति।
- अविद्या एव माया अज्ञानं इति रूपेण ज्ञायते।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. वेदान्तो नाम किम् ?
2. किम् परिहाराय ब्रह्मसूत्रं रचितम्?
3. के वेदान्तदर्शनस्य आधारग्रन्थाः भवन्ति?
4. के प्रस्थानत्रयस्य भाष्यं रचितवन्तः?
5. अद्वैतपदस्य अर्थः कः?
6. वेदान्तदर्शने जगत् किम् भवति?
7. वेदान्तदर्शनानुसारं ब्रह्मणः भेदः कति विधम्?
8. प्रस्थानत्रय्यां द्वितीयं प्रस्थानं किम्?
9. गीतायां कति अध्यायाः सन्ति?
10. ब्रह्मसूत्रस्य कर्ता कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

1. के ग्रन्थाः प्रस्थानत्रयरूपेण ज्ञायन्ते?
2. ब्रह्मसूत्रे कति सूत्राणि ,कति पादाः च सन्ति?
3. चत्वारिमहावाक्यानि नामानि कानि ?
4. साधनचतुष्टयसम्पन्नः के?

## एकैकया खण्डिकयाउत्तराणि लिखत ।

**(Answer the following questions in a paragraph)**

1. प्रस्थानत्रयं लिखत ।
2. ब्रह्मसूत्रं लिखत ।
3. भगवद्गीता लिखत ।
4. अविद्यायाः लक्षणं प्रतिपादयत ।
5. ब्रह्मणः स्वरूपं लिखत ।

## निर्दिष्टाभ्यासाः**(Assignments)**

1. प्रस्थानत्रयं विशदयत।
2. वेदान्तदर्शने अविद्या प्रतिपादयत ।
3. ब्रह्मस्वरूपं विशदयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि **(Answer to Objective type questions)**

1. उपनिषत्
2. सिद्धान्तानां विरोधपरिहाराय
3. उपनिषत्,भगवद्गीता, ब्रह्मसूत्रम्
4. शंकरः,माध्वः, रामानुजः, निम्बार्कः
5. द्वयोरभावः
6. मिथ्या
7. द्विविधम्

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६, पुटानि ८५-१४७
2. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८ पुटानि १९३-२११


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.

# Unit - 4
# दर्शनकाराः

## उद्देश्यानि(Learning Outcomes)

- वेदान्तदर्शनं प्रति ज्ञानं लभते।
- दार्शनिककारान् प्रति परिचयः प्राप्नोति।
- नवीनाशयान् गृह्णाति।
- जीवनमूल्यानि प्राप्नोति।

## प्राग्व्यपेक्षाः(Pre requisites)

मानवजीवनस्य उद्देश्यं किम् मरणानन्तरंजीवः अस्ति वा नास्ति वा? अहं कः अस्मि? इत्यादयः प्रश्नाः मानवजीवने निरन्तरं उद्भवन्ति।एतेषां प्रश्नानां समाधानमन्वेषणमाणाः मानवाः दार्शनिकरूपेण ज्ञायन्ते।तेषां उन्नतविचाराणां संग्रहं भवति दर्शनम्। अर्थात् येनोपायेन सांसारिकाणां पदार्थानां वास्तविकं स्वरूपं ज्ञायते तदेव दर्शनम्। आस्तिकनास्तिकभेदेन भारते मुख्यतया नवदर्शनानि सन्ति। यानि दर्शनानि वेदान् प्रमाणरूपेण स्वीकुर्वन्ते तानि आस्तिकानि यानि च वेदानां प्रामाण्यं न स्वीकुर्वन्ते तानि नास्तिकदर्शनानि भवन्ति। साख्ययोगन्यायवैशेषिकमीमांसावेदान्तदर्शनानि आस्तिकदर्शनानि सन्ति। चार्वाक जैन बौद्धदर्शनानि नास्तिकदर्शनानि सन्ति। आस्तिकदर्शनेषु वेदान्तः अन्यतमः अस्ति। वेदानां अन्तिमाः भागाः भवन्ति उपनिषदः। अतः उपनिषदः वेदान्तरूपेण ज्ञायन्ते। बादरायणादारभ्य अनेके आचार्याः वेदान्तदर्शनस्य तत्त्वानि संगृह्य अमूल्यान् ग्रन्थान् लिखित्वा प्रचरणं कृतवन्तः। तेषां आचार्याणां परिचयः,जीवनकालः,ग्रन्थाः च वयं अस्मिन् खण्डे पठामः।

## मुख्यपदानि(Key words)

श्रीशङ्कराचार्यः, बादरायणः, भाष्यम्, प्रकरणग्रन्थाः, सुरेश्वराचार्यः, पद्मपादाचार्यः,सर्वज्ञात्ममुनिः, वार्तिकम्, अधिकरणम् ।

## Discussion

### 5.4.1 श्रीमद्शङ्कराचार्यः

अद्वैतवेदान्तप्रचारकः श्रीशङ्करः केरलराज्ये कालटीदेशे अष्टशताब्दे लब्धजन्म अभवत्। श्रीशङ्करः पारम्परिकं ब्रह्माद्वैतसिद्धान्तं मायावादसिद्धान्तं चापि व्यवस्तापितवान्। औपनिषद्दर्शनस्य सिद्धान्तान् क्रमबद्धरूपेण प्रतिपादयितुं व्यासेन यानि सूत्राणि रचितानि तानि च वेदान्तसूत्राणि शङ्कराचार्येण प्रसन्नगम्भीरतया भाषया व्याख्यातानि। तत् व्याख्यानं शाङ्करभाष्यरूपेण प्रसिद्धम्। आचार्यः शङ्करः द्विर्त्रिंशत् वर्षाणि एव जीवितवान्। स्वल्पकालाभ्यन्तरेऽपि अद्वैतवेदान्तदर्शनप्रतिपादकानां ग्रन्थानां स्तोत्रग्रन्थानां च रचनां कृतवान्। अद्वैतपञ्चरत्नम्, अद्वैतानुभूतिः, अपरोक्षानुभूतिः ,आत्मबोधः, उपदेशपञ्चकं,उपदेशसाहस्री, विवेकचूडामणिः, वाक्यवृत्तिः, इत्यादयः शङ्करविरचितप्रकरणग्रन्थाः सन्ति। एतदतिरिक्तं ब्रह्मसूत्रभाष्यं, गीताभाष्यं, दशोपनिषदां भाष्यं च रचितवान्। एताभिः रचनाभिः शङ्कराचार्यस्य अद्वैतवेदान्तं प्रति महत्त्वपूर्णमवदामस्ति स्पष्टतया अनुमीयते।

### 5.4.2 सुरेश्वराचार्यः

अद्वैतवेदान्तस्य विकासे आचार्यसुरेश्वराचार्यस्य योगदानं महत्त्वपूर्णं वर्तते। अयम् आचार्यः शंकरस्य साक्षात् शिष्यः आसीत्। तस्य समयः अष्टमशताब्दी स्वीक्रियते।आचार्यशंकरानन्तरं अद्वैतवेदान्तस्य विकासे आचार्यसुरेश्वराचार्यस्य अवदानं महत्त्वपूर्णं विद्यते। सःप्रथमतः माया अविद्ययोः भेदः स्पष्टः कृतः। एतेषां मते ईश्वरस्योपाधिः माया जीवस्योपाधिः अविद्या वर्तते। अयमाचार्यः बृहदारण्यकभाष्यवार्तिकेन यत् पृथक् वार्तिकप्रस्थानं प्रावर्तयत् तत्तु अत्यन्तमेव पाण्डित्यपूर्णं विद्वत्सदसि मुकुटवत् शोभते।

### 5.4.3 पद्मपादाचार्यः

आदिशङ्करस्य प्रथमः शिष्यः पदमपादः आसीत्।आचार्यपद्मपादः ब्रह्मसूत्रशांकरभाष्योपरि पञ्चपादिकानामकः एकः व्याख्याग्रन्थः रचितः।विदुषां मतमस्ति यत् शांकरभाष्यस्य प्रथमपञ्चपादानां व्याख्यानं वर्तते पञ्चपादिका। केचन अन्य वदन्ति यत् पञ्चपादिका संज्ञा अद्वैतवेदान्तस्य मुख्यप्रतिपाद्यपादपंचकज्जाता। तच्च पादपञ्चकम् अध्यासः, ब्रह्मविचारः, ब्रह्मलक्षणम् ब्रह्मणि प्रमाणम्,वेदान्तवाक्यानां ब्रह्मणिसमन्वयात्मकं वर्तते।

### 5.4.4 वाचस्पतिमिश्रः

वाचस्पतिमिश्रः ब्रह्मसूत्रभाष्योपरि भामतीनामकं टीकाग्रन्थम् रचितवान्। अयं ग्रन्थः शांकरभाष्यस्य रहस्य ज्ञातुं अतीव सहायकः भवति। वाचस्पतिमिश्रः अद्वैतवेदान्तपरम्परायां

स्वतन्त्रप्रस्थानस्य भामतीप्रस्थानस्य प्रवर्तकः आसीत्।भामत्यां वाचस्पतिमिश्रः जगत्स्वरूपः, अविद्या ,ईश्वरः, मोक्षसाधनानि विषये स्वमौलिकं चिन्तनं प्रस्तौति। यथा हि श्रवणादौ विधित्वनिषेधः, अविद्यायाः आश्रयः जीवः, अविद्याःविषयः ब्रह्म स एव जगतः कारणं वर्तते। श्रवणादिविधिना सुसंस्कृतेन मनसा आत्मनः साक्षात्कारः भवतीति।वाचस्पतिमिश्रः जीवनकालः नवमे शतके आसीत्।

### 5.4.5 सर्वज्ञात्ममुनिः

नवमे शतके आचार्यसर्वज्ञात्ममुनिः शांकरभाष्यमाश्रित्य एकः स्वतन्त्रः महत्त्वपूर्णः च संक्षेपशारीरकनामकः ग्रन्थः रचितवान् अस्मिन् ग्रन्थे शांकरभाष्यप्रतिपादिताः सिद्धान्ताः संक्षिप्तरूपेण स्पष्टतया निरूपिताः सन्ति। सर्वज्ञात्ममुनीनां मतम् वाचस्पतिमिश्राद्भिन्नं वर्तते। अत्र इदमपि वक्तुं शक्यते यत् विवरणप्रस्थानस्य बीजम् अस्मिन्ग्रन्थे उपलभ्यते।

### 5.4.6 प्रकाशात्मयतिः

प्रकाशात्मयतिः पद्मपादाचार्यस्य पञ्चपादिकोपरि विवरणनामकम् उत्कृष्टं टीकाग्रन्थं प्रणीतवान्। प्रकाशात्मयतेः जीवितकालः एकादशशतके आसीत्। यस्य नाम्ना अद्वैतवेदान्तपरम्परायां स्वतन्त्रविवरणप्रस्थानस्य प्रवर्तनं जातम्। विवरणे पद्मपादाचार्येण अद्वैतदर्शनस्य प्रमुखेषु सिद्धान्तेषु वाचस्पतिमिश्रमताद् किञ्चिद्भिन्नं मतम् उपस्थापितम्। तथाहि विवरणकारः श्रवणे नियमविधित्वम् स्वीकरोति। अस्मिन्मते जगतः कारणम् ईश्वरः अविद्यायाः आश्रयः विषयश्च ब्रह्म एव । प्रकाशात्मयतिः विवरणे स्वीकरोति यत् व्यवहारभेदेन माया - अविद्ययोः भेदः वर्तते। विक्षेपप्राधान्येन माया उच्यते,आवरणप्राधान्येन अविद्या इति। एकस्मिन्नपि वस्तुनि विक्षेपप्राधान्येन माया आच्छादनप्राधान्येन अविद्या इति व्यवहारभेदः।

### 5.4.7 श्रीहर्षः

एकादशशतके जीवमानः अद्वैतवेदान्ती तथा महान् साहित्यकारः च आसीत् श्रीहर्षः।श्रीहर्षस्य साहित्यक्षेत्रे नैषधीयचरितम् दर्शनक्षेत्रे च खण्डनखण्डखाद्यम् अत्यन्तमेव श्रेष्ठं स्थानं धारयति ।पदलालित्ये नैषधमहाकाव्यं काव्येषु श्रेष्ठतमं वर्तते। श्रीहर्षस्य खण्डनखण्डखाद्यस्य नामकरणमपि अत्यन्तमेव रुचिकरं वर्तते। तथाहि खण्डनस्य आकाशादिपदार्थखण्डनरूपस्य , खण्डस्य खण्डशर्कराद्याः खाद्यं भक्ष्यं स्वाद्यं भवति यस्य ग्रन्थस्य अध्ययनाध्यापनेन तत् खण्डनखण्डखाद्यम्। अथवा खण्डनरूपं तत् खण्डनखण्डखाद्यम् नाम ग्रन्थः। अर्थात् यत्र वादीनां मतम् अक्षरशः निरस्य अद्वैतब्रह्मज्ञानं प्रति श्रद्धामुत्पादयेत्।

### 5.4.8 चित्सुखाचार्यः

त्रयोदशशतके प्रतिभासम्पन्नः दार्शनिकः चित्सुखाचार्यः अभूत्। अनेन आचार्येण अनेके व्याख्याग्रन्थाः स्वतन्त्रग्रन्थाः च लिखिताः। तेषु तत्त्वप्रदीपिका अत्यन्तमेव महत्त्वपूर्णः ग्रन्थः वर्तते। वेदान्तस्य प्रमुखाः सिद्धान्ताः अस्मिन्ग्रन्थे विवेचिताः सन्ति। अस्य ग्रन्थस्य इदं वैशिष्ट्यं वर्तते यत् सर्वेषां सम्भाव्यपूर्वपक्षीणामुपस्थानं विधाय सिद्धान्तपक्षमुपस्थापितं वर्तते।

### 5.4.9 विद्यारण्यः

वेदान्ताचार्येषु उत्कृष्टः उल्लेखनीयः आचार्यः वर्तते विद्यारण्यमुनिः।तस्य जीवितकालः चतुर्दशशतकं अस्ति। अनेन अनेकेषां ग्रन्थानां रचनां विधाय वेदान्तसाहित्यस्य विकासे स्तुत्यः प्रयासः कृतः। अथ च सरलपद्धत्या विषयप्रतिपादनेन अद्वैतसिद्धान्तस्य प्रचारे अपूर्वं योगदानं प्रदत्तम्। विवरणप्रमेयसंग्रहः, पञ्चदशी .सर्वदर्शनसंग्रहः इत्यादयः आचार्यस्य प्रमुखाः ग्रन्थाः सन्ति।

### 5.4.10 मधुसूदनसरस्वती

षोडशशतके जीवितमानः प्रमुखवेदान्ताचार्यः आसीत् मधुसूदनसरस्वती। आचार्यः नैके टीकाग्रन्थाः मौलिकग्रन्थाश्च प्रणीतवान्। संक्षेपशारीरकः, सिद्धान्तबिन्दुः, भगवद्गीता उपरि टीकाग्रन्थाः अस्य प्रमुखाः ग्रन्थाः वर्तते।

### 5.4.11 सदानन्दः

वेदान्तसारस्य रचयिता आचार्यः सदानन्दः षोडशशतके अजीवत्। अस्य सर्वोत्कृष्टः कृतिः भवति वेदान्तसारः। वेदान्तसारे न केवलं शंकराचार्यस्य सिद्धान्तं प्रतिपादयति अपितु बहुषु अर्थेषु अद्वैतवेदान्तस्य परवर्तिविकासोऽपि दृश्यते। तथा हि ईश्वरजीवयोः समानरूपेण विकासः , अज्ञानस्य समष्टिव्यष्टि - अभिप्रायेण विवेचनम् , अध्यारोपापवादः इत्यादि।

वेदानां सारभूतत्वेन विराजते वेदान्तदर्शनम्। भारते उपनिषद्कालादारभ्य इदानीपर्यन्तं वेदान्तदर्शनस्य स्वाधीनः अत्यधिकः अस्ति। बादरायणः, शङ्कराचार्यः, सुरेश्वराचार्यः, पद्मपादाचार्यः इत्यादि अनेके दार्शनिकाः काले काले तेषां योगदानं कृत्वा इदम् दर्शनम् लोकोत्तरं अकरोत्।

## पुनरावृत्तिः(Recap)

1. श्रीशङ्करः महान्  वेदान्तप्रचारकः आसीत्।
2. श्रीशङ्करेण प्रस्थानत्रयस्य भाष्यं रचितम्।
3. श्रीशङ्करेण आत्मबोधादि प्रकरणग्रन्थान् रचितवान्।
4. सुरेश्वरः वार्तिकप्रस्थानम् आरब्धवान्।
5. पद्मपादः पञ्चपादिकाम् रचितवान्।
6. वाचस्पतिमिश्रः भामतीप्रस्थानस्य प्रवर्तकः ।
7. सर्वज्ञात्ममुनिः विवरणप्रस्थानस्य प्रवर्तकः
8. श्रीहर्षस्य खण्डनखण्डखाद्यम्।
9. चित्सुखाचार्यः तत्त्वप्रदीपिकायाः कर्ता।
10. सदानन्दस्य वेदान्तसारः वेदान्तदर्शनस्य परिचयग्रन्थरूपेण प्रसिद्धः।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. आत्मबोधस्य कर्ता कः ?
2. कः प्रस्थानत्रयस्य भाष्यं रचितवान् ?
3. वाचस्पतिमिश्रः कस्य प्रवर्तकः आसीत् ?
4. श्रीहर्षस्य ग्रन्थस्य नाम किम्?
5. कः ग्रन्थः वेदान्तस्य परिचयरूपेण प्रसिद्धः ?
6. सुरेश्वराचार्यस्य जीवनकालः कः ?
7. प्रस्थानत्रये के ग्रन्थाः सन्ति ?
8. पञ्चपादिकायाः कर्ता कः ?
9. श्रीशंकरः कस्य प्रचारकः आसीत् ?
10. वाचस्पतिमिश्रस्य प्रकरणग्रन्थः कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
**(Answer the following questions in one or two sentences)**

1. श्रीशङ्करस्य जीवितकालः कः ?
2. सुरेश्वराचार्यस्य योगदानं किम् ?

## एकैकया खण्डिकयाउत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

1. प्रस्थानत्रयं प्रतिपादयत ।
2. ब्रह्मसूत्रं प्रतिपादयत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. पञ्चदर्शनकाराणां जीवनकालः अवदानं च विशदयत।
2. बादरायणः, सुरेश्वराचार्यः, पद्मपादाचार्यः इत्यादि दार्शनिकाः योगदानंप्रतिपादयत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. श्रीशङ्करः
2. श्रीशङ्करः
3. भामतीप्रस्थानस्य
4. खण्डनखण्डखाद्यम्
5. वेदान्तसारः
6. अष्टमेशतके
7. उपनिषत्, भगवद्गीता, ब्रह्मसूत्रम्
8. पद्मपादः
9. वेदान्तदर्शनस्य
10. भामती

SGOU

## सूचनाग्रन्थाः(References)


1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणि दाहलाः, चौखम्बा कृष्णदास् अकादमि वारणासि,1998
2. सर्वदर्शनसंग्रहः,श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, चौखम्बा विद्याभवन्, वारणासि ।


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. History of Indian Philosophy ,Vol-III Surendranath Das Guptha , MLBD, Varanasi
2. Indian Philosophy - Dr.S.Radhakrishnan, Vol- I & II, Varanasi, Delhi
3. Outlines of Indian Philosophy - Jadunath Sinha ,New Central Book agency, Culcutta, 1992
4. A Critical Survey of Indian Philosophy -Chapter XI Chandradhar Sharma, Motilal Banarsidass Publishers PrivateLimited, Delhi, 2000


SGOU

BLOCK -6

# नास्तिकदर्शनानि

SGOU

# Unit 1
# चार्वाकदर्शनम्।

## उद्देश्यानि(Learning Outcomes)

- चार्वाकर्शनं प्रति ज्ञानं लभते।
- भौतिकजीवनं प्रति ज्ञानं लभते।
- नवीनाशयान् गृह्णाति ।
- जीवनमूल्यानि प्राप्नोति।

## प्राग्व्यपेक्षाः(Pre requisites)

चार्वाक-बौद्ध-जैनदर्शनानि नास्तिकदर्शनरूपेणज्ञायन्ते। बृहस्पति- बुद्ध-महावीरा एतेषां दर्शनानाम्आचार्यपुरुषाः। प्रत्यक्षैकप्रमाणवादिनः चार्वाकाः वेदप्रामाण्यवादिनः पुण्यपापादिकंवा स्वर्गनरकादिकं वा धर्माधर्मादिकम् अदृष्टमीश्वरं देहातिरिक्तम् आत्मानश्च न मन्यन्त इति तेषांनास्तिकत्वं सर्वसम्मतं तत्सम्मतश्च ।बृहस्पत्याचार्यप्रणीतमिदं दर्शनं नास्तिकेषु अग्रगण्यम् वर्तते। महाभारते (शान्तिपर्वणि) रामायणे (२-१००-३८) मनुस्मृतौ (३,१५०,१६१) चोल्लिखितमिदं दर्शनम् 'चारुरमणीया वाक् उक्तिः' यस्य सः चार्वाकः। तेन प्रसारितमिदं दर्शनमितिचार्वाकदर्शनम्।चार्वाकः इत्यस्मिन् कार्ये पण्डिताः भिन्नाभिप्रायान् प्रकटयन्ति। केचित् बृहस्पतिः मन्यन्ते। अन्ये केचन बृहस्पतेः शिष्यः चार्वाकः इति मन्यन्ते। लोकायतमतमित्यस्य नामान्तरम्। पृथिव्यप्तेजोवायुरूपाणि चत्वार्येव भूतानि तत्त्वानि। आकाशस्यप्रत्यक्षाभावेनप्रत्यक्षैकप्रमाणवादिभिः चार्वाकैराकाशं ना अङ्गीक्रियते। चतुर्णाञ्च तेषां शरीररूपेणपरिणामेपरिणामविशेषस्वाभाव्यात् अत्र चैतन्यम् उत्पद्यते। शरीरविनाशे चैतन्यमपि नश्यत्येव।

## मुख्यपदानि(Key words)

बृहस्पतिः, चार्वाकदर्शनं, लोकायतम् , प्रत्यक्षम्, आत्मनिषेधः, अपवर्गः ,

शुद्धबुद्धिवादः,भूतचैतन्यवादः,सुखवादः ,भौतिकवादः ,शरीरेन्द्रियविषयाणि,अपवर्गः।

## Discussion

चार्वाक नाम्नाप्रसिद्धं प्रथमं नास्तिकदर्शनम्। चार्वाकस्तु क आसीदिति विषया पण्डिता बेभिद्यन्ते।केचित्तं बृहस्पतेः शिष्यं मन्यन्ते। केचित्तु चार्वाकनाम्नो मतं बृहस्पतिना प्रचारितमिति। अपरे तु 'चर्व भक्षणे' धातोर्निष्पन्नं चार्वाकशब्दं खादतपिबतमोदतमतं सङ्‌तयतीत्यपि सम्भावयन्ति केचित्। नयते चर्वी लोकायते चर्वी बुद्धिः। तत्सम्बन्ध्यत्वाचार्योऽपि चार्वाकः स लोकायते शास्त्रे पदार्थान् नयते इति। अन्ये चारु वाचो यस्येति चार्वाक इत्यपि मन्यन्ते। वयं तु चार्वाकशब्दं चारु वाक् इत्येतस्यैवापभ्रंशं मन्यामहे। यतेऽत्र यदेव कथितमस्ति तदिहलोकसम्बन्धं लोकायतमेव। कथ्यते हि मतमिदं बृहस्पतिनाऽसुरन्व्यामोहयितुं प्रवर्तितमिति। तेनेदं बृहस्पतिमतमिति मन्यते च। कौटिल्यस्य वार्ता दण्डनीतिश्चेति गार्हस्पत्याः इति कथनेनापि एतत्सिध्यति यत् राजनीतिप्रवक्ता बृहस्पतिः नास्तिक आसीदिति। मतमिदं पुरातनयुगे लोकायतनाम्नाप्रसिद्धमासीत्। इदं शुद्धबुद्धिवादः, भूतचैतन्यवादः, भौतिकवादः, सुखवादः, इत्यपि शब्द्यन्ते। चार्वाक खलु भूतचैतन्यवाचिनो यतस्ते बुद्धिगम्यमात्रमेव विषयं स्वीकुर्वन्ति। ते हि खलु भूतचैतन्यवादिनो यतस्ते जडमयङ्गीतसंयोगेन चैतन्यस्योत्पत्तिं मन्यन्ते। यथा कोद्रवे मादकशक्तिर्नैव विद्यते किन्तु तस्मिन्नेव मदिरात्वंगते मादकशक्तिरुत्पद्यते यथा वा ताम्बुलखदिरसुधानां व्यष्टिदशायां नैवैकस्यापि रक्तत्वं किंतु समष्टौ तदुत्पद्यते यथा वा बाइड्रोजनाक्षिजनसंज्ञकौ पदार्थौ व्यष्टिदशायां वायुतत्वे स्तः समष्टिदशायां तु जलत्वं भवतः यथा वा व्यष्टिदशायां वायुतत्वानि समष्टिदशीयां अग्निं जनयन्ति तथैव भूतचतुष्टयमपि स्वकीयपार्थक्यावस्थायां जडमपि परिणामविशिष्टसमष्टौ तु तस्मादेव चैतन्यं समुत्पद्यते इति ते चैतन्यविशिष्टकायम् एव पुरुषं मन्यन्ते।

चार्वाकदर्शनं यद्यपि सर्वेभ्यो दर्शनेभ्यः प्राचीनतमं तथापि तस्य कश्चिदपि प्रामाणिको ग्रन्थो न लभते इदानीम्। सम्भवति नीस्तिकमतप्रवर्तक इति आस्तिकवादिभिरुपेक्षितत्वात्स प्रणष्टो भवेत्।

**चार्वाकदर्शनस्य विषयवस्तु**

अथ लोकायतम्। पृथिव्यप्तेजोवायुरिति तत्त्वानि"। "तत्समुदाये शरीरेन्द्रियविषय संज्ञा"। "तेभ्यश्चैतन्यं किण्वादिभ्योमदशक्तिवद् विज्ञानम्"। चैतन्यविशिष्टः कायः पुरुषः। "काम एवैकः पुरुषार्थः"। "मरणमेवापवर्ग" इति। प्रत्यक्षमेव प्रमाणम्। तच्च इद्रियार्थसन्निकर्षोत्पन्नं ज्ञानम्। इति।

**अत्रचत्वारि भूतानिभूमिवार्युनलानिलाः।**
**चतुर्भ्य खलुभूतेभ्यश्चैतन्यमुपजायते॥**
**किण्वादिभ्य:समेतेभ्योद्भ्भ्योमदशक्तिवत्।**

अहंस्थूल:कृशोऽस्मीतिसामानाधिकरण्यतः॥

चार्वाकमते चत्वार्येव तत्वानि पृथिव्यप्तेजरूपाणि। नत्वाकाशः। प्रत्यक्षमेव केवलं प्रमाणं नास्त्यदृष्टं तच्च इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमेव। सुखदुःखौ स्वभावेनैव भवतो न तत्र धर्माधर्म कारणम्। स्थूलोऽहं कृशोऽहं इत्यादिविशेषणविशिष्टौ देह एवात्मा न मतो विलक्षणः कश्चिदन्यः। इहलोकान्नास्तिपरः कश्चिदपि लोकः। मिष्टान्नभोजनम् अनुकूलनिवेषणमेव स्वर्गः व्याध्याद्युपद्रव एव नरकस्तेन इहैव नरकः स्वर्गश्च। मरणमेव मोक्षः। अतस्तदर्थमायासो व्यर्थं एव। व्रतादिकं दरिद्राणां पातिव्रत्यादिकं दुर्बलानामग्निहोत्रादिकं पौरुषहीनानां जीविकामात्रम्। विद्वांसस्तु कृषिगोरक्षवाणिज्य कुसीदण्डनीत्यादिभिः दृष्टैरेवोपायैःअनुकूलान् भोगान् भुङ्क्ते ।

चार्वाकाः खलु प्रत्यक्षमेव प्रमाणं मन्यन्त। तेषां मते हि इन्द्रिजनितज्ञानमेव यथार्थज्ञानं भवति तच्च रासनिकं श्रावणं घ्राणिकं त्वाचश्च तत्तदिन्द्रियग्राह्यत्वात्। तदतिरिक्तम् अदृष्टमनास्वादितमश्रुतमघ्रातमस्पृष्टञ्च न किमपि प्रमाणम्। अनुमानं हि लिङ्गलिङ्गि- पूर्वकमेव भवति तच्च व्याप्तिमाश्रयते। व्याप्तिर्हि साहचर्यनियमः। न च सार्वत्रिकः। नैव स सार्वभौमिकत्वेन प्रत्यक्षविषयी भवति। यत्र यत्र धूमस्तत्र तत्र वह्निनरित्यपि वर्तमानकालिकमेव न सार्वकालिकम्। शब्दोऽपि न प्रमाणं यदि स तर्केण नाभिसन्धत्ते। यद्यदुक्तं तत्तदविचार्यैव करणं कापुरुषाणामेन धर्मः। चार्वाका हि सृष्टिं स्वभावसम्पन्नां मन्यन्ते। चार्वाका हि ईश्वरस्यास्तित्व नैव मन्यन्ते। तस्य प्रत्यक्षविषयाभावात्तेषां शब्दानुमानादीनां प्रामाण्याभावात्। वेदान्तिनो हि शब्दप्रमाणेन ईश्वरसत्तां मन्यन्ते नैयायिकास्त्वनुमानप्रमाणेन। चार्वाकानां एव प्रमाणे असम्मते। तेषां नये तु स्वभावादेव जनः कर्मणि प्रवर्तते। मतमिदं न केवलं चार्वाकेषु अपि तु अन्यत्रापि दृश्यते।

चार्वाकानां मते जीवो न देहाद्भिन्नः तत्र केचित्मनः केचिदिन्द्रियाणि, केचित्प्राणानामात्मां मन्यन्ते। चैतन्यादयो हि शरीरधर्मः, सति शरीरे तेषां सद्भावोऽसति असद्भाव एव। पृथिव्यादिषु व्यष्टिदशायां चैतन्याभावेऽपि तेषांसङ्घाते तेभ्य एव चैतन्योत्पत्तिः, तेषां विघटने च तद्विरहः। तस्माद्शरीराश्रयस्य चैतन्यस्य न तद्भिन्नं किञ्चिदन्याश्रयत्वम्। अत आत्मा नैव शरीरव्यतिरिक्ताश्रयः। चार्वाकानां हि सुखवादिनः। तेषां मते नियमितजीवनमेव सुखस्य हेतुः। सर्वैः स्वभावसिद्धं कर्म कर्तव्यमिति तेषामुपदेशः। चार्वाका नास्तिकाएव किन्तु नानार्गलः। ते हि समाजव्यवस्थार्थं राज्यव्यवस्थां राजपरम्पराञ्च समर्थयति। ते हि नितान्तमदृष्टफलदातृत्वेन कल्पिते कर्मणि प्रवृत्तिं निषेधयनति। तादृशे कर्मणि प्रवृत्तिमादाय शरीरशोषणं तेषां नये व्यर्थमेव। मरणमेव मोक्षस्तन्निमित्तमायासो वृथैव। धर्मश्च सुखायैव न तु दुःखाय। जीवनसुखहेतवे सिद्धो धर्मस्तेषामपि सम्मतः। ते हि खलु अर्थं भोगायैव वाञ्छन्ति। काम एवैकः पुरुषार्थस्तेषां मते किन्तु कामोऽत्र न केवलं व्यवायमात्रमपितु इष्टभोग एव। येन भोगेनान्तरात्मा प्रसीदति परश्च न

प्रपीड्यते स एवेष्टभोगः।

चार्वाकमते लोकव्यवहारः सम्भावनया सञ्चालितो भवति न निश्चयेन न चानुमानेन। स्वस्थसम्भावनैव सर्वं साधयति। तेषां मते यस्य पार्श्वे यदस्ति परासम्मतत्वेन तदेव तस्य धनम्। ममेदं शरीरमिति व्यवहारस्तु राहोः शिर इतिवद् औपचारिक एव। चार्वाकाः खलु नास्तिका यतस्ते वेदवाक्येषु, पुनर्जन्मनि, स्वर्गादिप्राप्तौ च नैव विश्वसन्ति। तेषां कृते इहलोकादन्यो न कश्चिल्लोकः। प्रत्यक्षवस्त्वेव तेषां प्रमेयम्। आकाशस्यावरणाभावात्तस्य शून्यत्वमेव। तेन पृथिव्यादिभूतचतुष्टयमेव स्वाणुदशायां जगतो मूलम्।

अर्थकामावेव पुरुषार्थ: न धर्म; नवा मोक्ष:। नीतिकामशाखयोस्साहाय्येन धनमार्जयेत्। यथेष्टमुपभोगः कर्तव्य:। अङ्गनाद्यालिङ्गनादिजन्यं सुखमेव पुरुषार्थ:।

**अङ्गनालिङ्गनाज्जन्यसुखमेवपुमर्थता।**
**कण्टकादिव्यथाजन्यं दुःखं निरय उच्यत ॥**

न चास्य दुःखसम्भिन्नतयापूरुषार्थत्वमेव नास्तीति वाच्यम्। अवर्जनीयतया प्राप्तस्य दुःखस्य परिहारेण सुखमात्रस्यैव भोक्तव्यत्वात्। यथा मत्स्यार्थी जालेन गृहीतान्मत्स्यान् सशल्कान्सकण्टकान् दृष्ट्वा न पुनस्सागरे परित्यजति। किन्तु कण्टकादीन् अपवार्यस्वादुभागमेवोपादत्ते। यथा वा धान्यार्थी सपलालानि धान्यान्याहरति चेदपि स यावदादेयंतावदेवादत्ते तस्माद्दुःखभयान्नानुकूलवेदनीयं सुखं त्यक्तुम् उचितम् न हि मृगास्सन्तीति शालयो नोप्यन्ते। अग्रे मृगा: सस्यविनाशं करिष्यन्तीति भिया कृषिक: क्षेत्रे कदापि शालीनामावाप एवं न करणीय इति न कदापि चिन्तयति। तथा न हि भिक्षुकास्सन्तीतिस्थाल्यो नाधिश्रीयन्ते। अग्रे याचका आगमिष्यन्तीति भिया चुल्यां पाकभाण्डान्येवप्रस्थापनीयनीति न कोपि चिन्तयति। यदि कश्चिद्भीरुः दृष्टं सुखं परित्यजेत् स पशुवन्मूर्ख एव। तदुक्तम्-

**त्याज्यं सुखं विषयसङ्गमजन्म पुंसां**
**दुःखोपसृष्टमिति मूर्खविचारणैषा।**
**व्रीहीञ्जिहासति सितोत्तमतण्डुलाढ्यान्**
**को नाम भो: तुषकणोपहितान्हितार्थी ॥**

विषयसम्बन्धजन्यं यत्सुखं तददुःखयुक्तत्वात्याज्यमिति यो विचार: स मूखखणामेव। नह्यन्तःस्वच्छतण्ड्लपूर्णव्रीहीन्केवलं बहिस्तुषेण कणेन चोपहिता इति धिया कोऽपित्यक्तुमिच्छति। किन्तु वित्षीकरणद्वारान्त:स्थान्तण्ड्लानुपादत्ते। ननु पारलौकिकस्खाभावे बहुवित्तव्ययशरीरायाससाध्येअग्रिहोत्रादौ विद्यावृद्धाः कथं प्रवर्तिष्यन्त इति चेत्तदपि न प्रमाणकोटिं प्रवेष्टमीष्टे।अग्रिहोत्रादि धर्मंप्रतिपादकवेदानाम् अनृतव्याघातपुनरुक्तादि

दोषैर्दूषितत्त्वाद् प्रामाण्यमेव। तथाहि बुद्धिमन्तो हिपुरुषा:स्वकीयबुद्धिवैभवेन सामाद्युपायै:द्रव्यं सङ्गृह्य स्वजीविकां परिकल्परयन्ति। पौरुषसम्पन्नास्तुस्वपराक्रमेण जीविकां सम्पादयन्ति। बुद्धिपराक्रमहीनास्तु नयेन पौरुषेणवाजीविकां कल्पयित्समर्थाः अज्ञलोक प्रसार्यजनान्कर्म वश्वनातिरिक्तम्पायान्तरम् अपश्यन्तोग्रिहोत्राद्यनेक कर्मजालंलोकतरङ्गतरङगितमानसान्विधाय पशतोहराश्चेते वैदिकम्मन्या धूर्तबकाः; लोकेभ्यो विपुलंद्रव्यम्पलभ्यजीवन्ति। चार्वाकानां मतेऽपि वास्तविकचिन्तनं पुष्पित दृश्यते। तत्सम्मतः स्वभाववादः सुखवादः भूतचैतन्यवादश्च कः खलु त्याज्य इति प्रमाणयितुं पारयति। सर्वेऽपि सुखं वाञ्छति। एतावदेवानन्तरं यच्चार्वाकाः प्रत्यक्षविचारकत्वादैहिकमेव सुखं सुखत्वेन गृह्णन्ति, आस्तिकस्तद्विपरीतं पारलैकिकसुखाय कष्टायन्ते। तेऽपि सुखायैव भोगायैव कर्म कुर्वन्ति कामं तदैहिकं वा पारलैकिकं स्यात्। यावज्जीवेदुःखं जीवेदिति को मन्यते। सर्वो लोकः सुखार्थ्येव। तेन सुखं भूतानां प्रवृत्तिरेव। सुखायैव वा सुखसम्भावनयैव लोकः प्रवर्त्तते कर्मणि। तुल्यस्यापिरघुनाथगाथां स्वान्तःसुखायातनोति। कालिदासोऽपि कवियशःप्राप्तिसम्भावना- प्रचोदितःकाव्यं करोति। तर्हि चार्वाकैः किमपराद्धं सुखवादपक्षग्रहणेन। यदि कश्चिच्छरीरशोषणे एव सुखमनुभवति तदा चार्वाकाणां न काऽपि हानिः। तेषां सुखवादस्यायमेवाशयो यददृष्चफलहेतोः शरीरं नैव पीडनीयमिति . तेषां स्वभाववादस्तु न केनाऽपि प्रत्याख्यातः। विजित्य हि गुणान्  सर्वान् स्वभावो मूर्ध्नि वर्तते। ते हि स्वभावादेव सृष्चेः प्रवर्तनं मन्यन्ते। नैयायिका अपि पदार्थानां स्वस्वभावं मन्यन्ते एव। अग्नेरुष्णत्वं जलस्य शैत्यं वायोः शातस्पर्शवत्वं स्वभावादेव भवति। तथैव स्वभावादेव पदार्थसङ्घटनायां चैतन्यमुत्पद्यते स्वभावादेव समानात्समानायां समानमेवोत्पद्यत इति किमत्युक्तं तैः। तथैव चैतन्यस्य शरीरसम्बद्धता न केवलं तैरपितु नैयायिकैरायुर्ज्ञैरन्यैश्च निःशङ्कं समर्थ्यते। अन्नं वै प्राणः इति कस्य न सम्मतम्। अन्नपानादिना यदि चैतन्यता प्रभाविता न ङवेत्तदाऽऽहारशुद्धौ सत्वशुद्धिरिति किमर्थम्क्तं भवति। किं तैः चैतन्यस्य शरीरसम्बन्धतानैवोररीकृता। शरीरावसाने चैतन्यावसानं सर्वदृष्टमेव। तेन चैतन्यस्य शरीरेण सहान्वयव्यतिरेकसम्बन्धः स्पष्ट एव। तेन चैतन्यस्य शरीरीश्रयत्वं यथार्थं निर्वादञ्च। तथा सति आश्रयभूतशरीरे दग्धे सति आश्रयि चैतन्यं पुनर्जायत इति यदि तैनं स्वीकृतं चेदपि नाश्चर्यम्। चार्वाकाः पुनर्जन्म नामनन्ति किन्तु न केवलं त एवापि तु बृहदारण्यकादावपि तदनुमतमेव। यथा-

"न प्रेत्य संज्ञाऽस्ति" । (बृह. 4.5.13) इति ।

पारलौकिकं सर्वमेव कार्यजातं शब्दप्रमाणवेद्यमेव। यदा ते शब्दप्रमाणमेवनामनन्ति तदा तेषां पारलौकिककृत्यास्वीकारः स्वाभाविक एव। शब्दप्रमाणासहमतानां श्रुतिष्वविश्वासो

नाश्चर्यावहः। चार्वाकाणां सम्मतं सुखमपि न तथाशारीरिकमात्रमपितु मानसिकबाहुल्यमेव। ते हि उत्कृष्टतरं सुखमधिब्रुवन्ति । परापीडनेन यत्सुखं तदेव सुखं तेषामभिमतमन्यथा तैः राजशासनं नैवाप्युक्तं भवेत्। निग्रहानुग्रहकर्ता राजा एवेश्वर इति तेषां मतमिदमेव सूचयति यत्ते हि परापीडनेनैव जीवितुं वाञ्छन्तीति ।

## पुनरावृत्तिः(Recap)

- नास्तिकदर्शने प्रमुखम् भवति चार्वाकदर्शनम्।
- लोकायतमतमित्यस्य नामान्तरम्।
- इदं शुद्धबुद्धिवादः, भूतचैतन्यवादः, भौतिकवादः, सुखवादः, इत्यपि शब्द्यन्ते।
- वेदप्रामाण्यं न अङ्गीकरोति।
- चार्वाकमते चत्वार्येव तत्वानि पृथिव्यप्तेजोवायुरूपाणि । नत्वाकाशः ।
- चैतन्यविशिष्टः कायः पुरुषः।
- काम एवैकः पुरुषार्थः।
- चार्वाकः केवलं प्रत्यक्षमेव प्रमाणरूपेण स्वीकरोति।
- चार्वाका हि सुखवादिनः ।
- चार्वाकानां मते जीवो न देहाद्भिन्नः तत्र केचित्मनः केचिदिन्द्रियाणि, केचित्प्राणानामात्मां मन्यन्ते ।
- चार्वाकानां मतेऽपि वास्तविकचिन्तनं पुष्पित दृश्यते ।
- चैतन्यादयो हि शरीरधर्मः, सति शरीरे तेषां सद्भावोऽसति असद्भाव एव ।
- देहोच्छेदो मोक्षः।
- यावज्जीवेत् सुखं जीवेत् इति चार्वाकाणां जीवनपद्धतिः।
- सर्वे लोकः सुखार्थ्येव । तेन सुखं भूतानां प्रवृत्तिरेव ।
- शरीरावसाने चैतन्यावसानं सर्वदृष्टमेव। तेन चैतन्यस्य शरीरेण सहान्वयव्यतिरेकसम्बन्धः स्पष्ट एव ।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. चार्वाकमते प्रमाणसंख्या कति ?
2. चार्वाकदर्शनस्य प्रचारकः कः ?
3. चार्वाकशब्दस्य अर्थः?
4. चार्वाकदर्शनस्य अपरं नाम किम्?
5. चार्वाकमते मोक्षः कः ?
6. चार्वाकमतेपुरुषार्थः कः?
7. चार्वाकमते स्वर्गः कः ?
8. चार्वाकमते नरकः कः ?
9. चार्वाकमते प्रमाणं नाम किम् ?
10. चार्वाकमते कति तत्वानि सन्ति ?कानि च तानि?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. चार्वाकमते कति भूतानि स्वीकुर्वन्ति ? कानि च तानि ?
2. चार्वाकपदस्य अर्थं किम्?
3. चार्वाकमते अनुमानादिप्रमाणानि किमर्थं निराकुर्वन्ति ?

## एकैकया खण्डिकया उत्तराणि लिखत ।

**(Answer the following questions in a paragraph)**

1. चार्वाकसिद्धान्तः लिखत ।
2. "काम एवैकः पुरुषार्थः"।"मरणमेवापवर्गः"। विशदयत ।
3. चार्वाकदर्शने प्रपञ्चः प्रतिपादयत ।
4. चार्वाकदर्शने जीवः अथवा आत्मा निरूपयत ।
5. चार्वाकदर्शने मोक्षः प्रतिपादयत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. चार्वाकदर्शनस्य समकालीनप्रसक्तिः ।
2. चार्वाकदर्शनं प्रतिपादयत ।
3. नास्तिकदर्शने चार्वाकदर्शनस्य स्थानं निराकुरुत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. एकम् ।
2. चार्वाकः,बृहस्पति ।
3. चारु वाचो यस्येति ।
4. लोकायतम् ।
5. मरणमेव ।
6. कामं ।
7. अनुकूलनिषेवणम् ।
8. प्रतिकूलनिषेवणम् ।
9. प्रत्यक्षम्
10. वेदस्य
11. चत्वारि,पृथिवी,आपः, तेजः, वायुः ।
12. इदम् जगत्

## सूचनाग्रन्थाः(References)


1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणिदाहलाः, चौखम्बा कृष्णदास अकादमि वारणासि, 1998
2. सर्वदर्शनसंग्रहः, श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमम् संस्कृतग्रन्थावलिः, चौखम्बा विद्याभवन्, वारणासि

## अधिकवाचनग्रन्थाः (Suggested Readings)


1. History of Indian Philosophy ,Vol-III Surendranath Das Guptha , MLBD, Varanasi
2. Indian Philosophy - Dr.S.Radhakrishnan, Vol- I & II, Varanasi, Delhi
3. Outlines of Indian Philosophy - Jadunath Sinha ,New Central Book agency, Culcutta, 1992
4. A Critical Survey of Indian Philosophy -Chapter XI Chandradhar Sharma, Motilal Banarsidass Publishers PrivateLimited, Delhi, 2000

# Unit-2
# जैनदर्शनम्

## उद्देश्यानि(Learning Outcomes)

- जैनदर्शनस्य सामान्यज्ञानं अवगाहते ।
- जैनस्य भेदद्वयं ज्ञायते ।
- जैनदर्शनस्यसप्तभङ्गीनयंअनैकान्त,वादं च ज्ञाप्यते ।

## प्राग्व्यपेक्षाः(Pre requisites)

आर्हतमतं जैनदर्शनमित्यप्युच्यते। अर्हतासम्बद्धत्वादार्हतं जिनसम्बद्धत्वाज्जैन मित्यस्य नाम।दर्शनमिदं वेदानां प्रामाण्यं नैव स्वीकरोतितथापि दर्शनस्यास्य बीजं वेदेष्वेव लभ्यते। अयं हि रत्नत्रयसाधनेनात्मोन्नतिःसमर्थ्यते। तच्च सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चरित्रञ्च। जैनानां मते प्रत्यक्षानुमानागामाः प्रमाणानि। आगमाददृष्टमपिसिध्यतीति तेषां विश्वासः ।जैनास्तु द्विविधाः श्वेताम्बरा दिगम्बराश्च। जैनदर्शनानुसारं जीवो हि प्रकृतेर्भिन्न एव ।ज्ञानं द्विविधं प्रत्यक्षं परोक्षञ्च ।जैनानां स्याद्वादः प्रधानो वादः।ज्ञानसामान्यं त्रिविधं दुर्णय-नय-प्रमाणभेदात्। जैनानां परामर्शश्च सप्तप्रकारकः सप्तभङ्गीनयपदव्यपदेश्यः। दर्शनमिदं बहुत्ववादप्रतिपादकम्।अनैकान्तवादोऽपि जैनानां परमसम्मतः। ऋषभदेवः जैनदर्शनस्य प्रथमः प्रवक्ता ।तदित्थम् ऋषभदेवप्रवर्तितं मतमिदं जीवप्रकृत्योः पार्थक्यसमर्थकम्। पार्श्वनाथो हि त्रयोविंशतितमस्तीर्थङ्करः। अन्तिमस्तीर्थङ्करो वर्धमान महावीरः। अन्तिमस्तीर्थङ्करो वर्धमान महावीरः। स हि विष्णुपुराणादावुपवर्णितस्य नन्दीवर्धनस्य भ्राता वर्धमानमहावीरः कथ्यते। तस्य हि पिता सिद्धार्थो माता त्रिशला पत्नी च यशोदा। तस्य जन्म केचिद्वैशालीग्रामे केचित्क्षत्रियकुण्डग्रामे वदन्ति। तस्य हि स्थितिकालस्तु विक्रम-पूर्वषष्ठशतकमामन्यते।

## मुख्यपदानि (Key words)

जैनदर्शनम्, आर्हतमतम्, वर्धमानमहावीरः, सम्यग्दर्शनं, सम्यग्ज्ञानं, सम्यक्चरित्रं,श्वेताम्बरः, दिगम्बरः, सप्तभङ्गीनयं, अनैकान्तवादं,ऋषभदेवः,द्रव्यं,वर्धमानमहावीरः,पार्श्वनाथः, त्रयोविंशतितमस्तीर्थङ्करः,मोक्षमार्गः।

## Discussion

आर्हतमतञ्च नास्तिकाभिधदर्शनेष्वेकम् । इदं हि जैनदर्शनमित्यप्युच्यते ।अर्हता-सम्बद्धत्वादार्हतं जिनसम्बद्धत्वाज्जैनमित्यस्य नाम । यद्यपि जिनशब्दोबुद्धपर्यायवाचि- शब्देषु पठितस्तथाऽप्यत्र स महावीरसम्बद्धः । वर्धमानमहावीरेणसर्वेऽपि षडेव रिपवो जिता इति स जिनसंज्ञामवाप, तेन व्याख्याता दर्शनमिदंजैनदर्शनम् । रत्नत्रयस्याधिवाचकमिदं दर्शनं सम्भवतश्चार्वाकादपि प्राचीनतमम् अथवा तत्समकालिकमेव । यद्यपि दर्शनमिदं वेदानां प्रामाण्यं नैव स्वीकरोतितथापि दर्शनस्यास्य बीजं वेदेष्वेव लभ्यते। अयं हि रत्नत्रयसाधनेनात्मोन्नतिःसमर्थ्यते। तच्च सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चरित्रञ्च। तथैव ऋषभदेव-पार्श्वनाथ-वर्धमानाश्चास्य त्रय आचार्यास्त्रिरत्नव्यपदेश्या येषामुपदेशानुसरणं सम्यग्ज्ञानं तत्र विश्वासो हि सम्यग्दर्शनं तदनुसाराचरणमेव सम्यक्चरित्रमितियत आत्मा बन्धनान्मुक्तो भवति। तेषाञ्च अहिंसा-सुनृत-अस्तेय- ब्रह्मचर्य- अपरिग्रह-आत्मसंयम-वैराग्यादीनि व्रतानि, यत आत्मा आनन्दमयस्वरूपं प्राप्नोति ।आनन्दमयावस्थाप्राप्तो जीव एव अर्हदभिधः। स हि सर्वज्ञो भवति। यथोक्तं--

गुरूपदिष्टमार्गेणज्ञानकर्मसमुच्चयात् ।
मोक्षो बन्धाद्विरक्तस्य जायते भुवि कस्यचित् ॥'

तथैव-- कर्मार्जितकलेवरैरावृतिर्बन्धनमात्मनो निरावरणता मुक्तिः। जैनानां प्रत्यक्षानुमानागामाः प्रमाणानि यत्रागमस्तीर्थङ्करशासनमेव । आगमाददृष्टमपिसिध्यतीति तेषां विश्वासः ।

भरतस्य पिता ऋषभदेवोऽस्य जैनदर्शनस्य प्रथमः प्रवक्ता। स हि भगवतश्चतुर्विंशत्य-वतारेष्वन्यतमत्वेन स्मर्यते । यथोक्तं श्रीमद्भागवतेऽपि ।

तदित्थम् ऋषभदेवप्रवर्तितं मतमिदं जीवप्रकृत्योः पार्थक्यसमर्थकम्। ऋषभ प्रवर्तितं मतमिदं तीर्थङ्करैरन्यैः काले काले समुद्धृतम्। तेषु पार्श्वनाथः श्वेताम्बरसम्प्रदायप्रवर्तकः । स हि पौराणिकस्य अश्वसेनाभिधस्य काशीराजस्य सुतो वामादेव्यां जातः। स त्रिशद्वर्षपर्यन्तं गार्हस्थ्यजीवनं व्यतीत्य जातवैराग्यो भगवत्प्रेरणया गृहीतभिक्षुजीवनः जैनधर्मं प्रचारयन् सप्ततितमे वर्षे समेतशिखरे निर्वाणमाप। स हि अहिंसासत्यास्तेयापरिग्रहब्रह्मचर्याख्येषु पञ्चसु व्रतेषु पूर्वेषु चतुर्ष्वेव बलमदधात्। स हि भिक्षन् श्वेताम्बरपरिधानायादिदेश। अस्य स्थितिकालो विक्रमपूर्व नवमशतकमित्यनुमीयते। वस्तुतस्त्वश्वसेनः सुदर्शनादपि प्राचीनतम इति महाभारतादावुक्तत्वाद् द्वापरयुगे एवाऽस्य स्थितिः। स हि धृतराष्ट्रसमकालीनः।

पार्श्वनाथो हि त्रयोविंशतितमस्तीर्थङ्करः। तत्पूर्वं षोडशतमस्तीथंङ्करः शान्तिनाथो

द्वितीयश्चारिष्टनेमिः। असौ हि अरिष्टनेमिः ऋग्वेदेऽपि गीयते। जैनतीर्थङ्कराणां गणना - ऋषभदेवः, अजितनाथः, पार्श्वनाथः, बर्धमानश्च श्रूयते। एषु हि अजितः षष्ठे मन्वन्तरे भगवत्-कलयाऽवतीर्णो यो हि समुद्रं मन्थयामासेति पौराणिको कथा। अन्तिमस्तीर्थङ्करो वर्धमान महावीरः। स हि विष्णुपुराणादावुपवर्णितस्य नन्दीवर्धनस्य भ्राता वर्धमानमहावीरः कथ्यते । तस्य हि पिता सिद्धार्थो माता त्रिशला पत्नी च यशोदा। तस्य जन्म केचिद्वैशालीग्रामे केचित्क्षत्रियकुण्डग्रामे वदन्ति । तस्य हि स्थितिकालस्तु विक्रम- पूर्वषष्ठशतकमामन्यते ।

प्रवर्तनकालानन्तरं जैनदर्शनस्य प्रणयनकाल: प्रारभते विक्रमावस्थितेरारभ्य तदनन्तरषष्ठशतकपर्यन्तम्। कालेऽस्मिन् उमास्वाति-कुन्दकुन्दाचार्य-समन्त-महाख्ये रत्नत्रयमजायत। व्याख्याकालश्चास्य विक्रमानन्तरषष्ठशताब्दीत आरभ्य नवमशतकपर्यन्तं प्रचलति। अयमेवास्य स्वर्णकालो मन्यते । कालेऽस्मिन् सिद्धसेन - दिवाकरहरिभद-अकलङ्कभट्ट-विद्यानन्दप्रभूतयोग्रन्थकारा:भाष्यकाराश्चाभूवन्। तदनन्तरमस्य प्रचारकाल उदेति। कालेऽस्मिन्नपि वादिराजसुरिः, देवसूरिः, हेमचन्द्रः, मल्लिषेणः, गुरुरत्नः, यशोविजयः, पुरुषोत्तमश्च प्रसिद्धा विद्वानो रामचन्द्रगुणचन्द्रौ च ।

जैनास्तु द्विविधाः श्वेताम्बरा दिगम्बराश्च। कथ्यते यद् दिगम्बरमतं वैक्रमे १३९ तमे वर्षे शिवभूतिना दत्तबलं, श्वेताम्बरमतञ्च वैक्रमे १३६ तमवर्ष भद्रबाहुना निर्धारित- स्वरूपमिति । श्वेताम्बराः प्राय: उत्तरभारते सन्ति दिगम्बराश्च दक्षिणभारते इति कर्णपरम्परा। दिगम्बरमते ब्रह्मचर्यं विवसनं कठिनतपश्चर्या च मोक्षनाघनानि, स्त्रीणां नैव मोक्षेऽधिकारः। श्वेताम्बरास्तन्न तथा पालयन्ति । ते हि अहिंसा-सत्या- स्तेया-परिग्रहेषु बलं दधति ।

जैनदर्शनानुसारं जीवो हि प्रकृतेर्भिन्न एव। स हि चैतन्यवान् स्वभावत एवानन्तज्ञानविशिष्टश्च। प्राक्तनक्रमे विरणविहितो हि स समादृतशुद्धरूपो भवति। सम्यग्दर्शन-ज्ञान-चरित्रावलम्बनेन स पुनः स्वशुद्धज्ञानस्वरूपतां प्राप्नोति यतः कैवल्यं सर्वज्ञत्वञ्च भूयो लभते।

ज्ञानं द्विविधं प्रत्यक्षं परोक्षञ्च। तत्रात्मसापेक्ष प्रत्यक्षं तदितरेन्द्रियसापेक्षं परोक्षम्। अर्थात् इन्द्रियनिरपेक्षकेवल आत्मा यदनुभवति तदेव प्रत्यक्षं इन्द्रियसापेक्षो हि स यदनुभवति तत्परोक्षम्। परोक्ष हि ज्ञानं द्विविधं मतिः श्रुतिश्च। आत्ममनःसम्पर्कादुद्भूतं मतिः। सैव संज्ञा, स्मृतिः, चिन्ता, अभिनिबोध इत्यपि। तञ्च विद्यमाने वस्तुनि प्रवर्तते। श्रुतिज्ञानन्तु त्रैकालिके वस्तुनि भवति। परोक्षं हि त्रिप्रकारकं पुनः अवधिः मनःपर्यायः केवलञ्चेति। तत्र

व्यवहितपदार्थानां ज्ञानमवधिज्ञानं, जीवस्य आवरणरूपकर्मक्षयेण समुद्भूतं ज्ञानमवधिसंज्ञकं भवति। जीवस्य ईर्ष्याद्विषादिक्षयेण या परमनोगतज्ञानयोग्यता भवति तन्मनः- पर्यायज्ञानं, समस्तकर्मबन्धनक्षयानन्तरं जीवस्य शुद्धज्ञानं केवलज्ञानम् । तदा जीवः सर्वज्ञत्वं भजते। प्रत्यक्षं द्विविधं सांव्यावहारिकं पारमार्थिकञ्च । तत्र सांव्यावहारिकमंशत इन्द्रियमनः साचिव्यापेक्षि, जीवस्य स्वरूपाविर्भावत्वेन केवलं ज्ञानं पारमार्थिकम् । इत्थं परोक्षज्ञानं स्मृति-प्रत्यभिज्ञान-तर्क-अनुमान- आगमभेदात्पञ्चविधस् ।

जैनानां मते प्रत्यक्षानुमानागमाः प्रमाणानि ।

जैनानां स्याद्वादः प्रधानो वादः। अनेकधर्माणां पदार्थानां नरिपूर्ण ज्ञानं तु सर्वज्ञस्यैव भवति। साधारणस्तु तेषामांशिकमेव ज्ञानं लब्धुं पारयति'तच्चांशिक ज्ञानं'नयः' इत्युच्यते। उक्तमेव न्यायावतारे 'एकदेशविशिष्टो यो नयस्य विषयो सतः' इति। ज्ञानसामान्यं त्रिविधं दुर्णय-नय-प्रमाणभेदात्। यत्र सद्वस्तु सत्स्वरूपेणैव सर्वकाळावच्छेदेन ज्ञायते तदाऽन्येषां निषिध्यमान-दोषभावात् तद् दुर्णयज्ञानं भवति। धर्मान्तरनिषेधमन्तरा सस्तुमात्रांशिकज्ञानसद्भावाद् यज्ज्ञानं तन्नयज्ञानं, स्यात्कोटिज्ञानं प्रमाणज्ञानम्, सद्धस्तुविषये स्यात्सदिति, असद्वस्तुविषये स्यादसदिति। यथोक्तं स्याद्वादमञ्जर्याम् -

'सदेव सत्स्यात्सदिति त्रिधार्थो मीयेत दुर्नीतिनयप्रमाणैः।
यथार्थदर्शी तु नयप्रमाणपथेन दुर्नीतिपथं त्वमास्याः॥ ( २८ )

स्यात्पदमत्र संशयितार्थसचिवसम्भवार्थकम् ।

स्याद्वादवन्नयवादोऽपि जैतानां विशिष्ट एव। अनन्तधर्माणामपि पदार्थाता- मानन्त्येऽपि तेषां वस्तुगत्या द्वौ भेदौ द्रव्यार्थिकनयपर्यायार्थिकनयभेदात् । तत्राद्यस्त्रि- विधोऽपरश्चतुर्विध इति सम्भूय सप्तप्रकारा भवन्ति नैगम-सङ्ग्रह- व्यवहार-ऋजु-शब्द-समाधिरूढ- एवम्भूतनयभेदात्।

जैनानां परामर्शश्च सप्तप्रकारकः सप्तभङ्गीनयपदव्यपदेश्यः। स च पदार्थ-याथार्थ्यविबोधाय कल्पते। स च यथा--

स्यादस्ति नास्त्युभयवक्तव्यं पुनश्च तत्त्रितयम् ।
द्रव्यं खलु सप्तभङ्गमादेशवशेन सम्भवति ॥' इति ।

अर्थात्-स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यं, स्यादस्ति चावक्तव्य , स्यान्नास्ति चावक्तव्यञ्च. स्यादस्ति च नास्ति चावक्तव्यञ्चेति ।

जैनदृष्टौ तत्त्वं ह्यनन्तधर्मात्मकम्। कस्यापि स्वरूपज्ञानाय सत्तात्मकधर्मैः सह

निषेधात्मकधर्माणामपि ज्ञानमावश्यकं भवति। तत्र देश-काल-वर्ण-जाति- रूपादयः सत्तात्मकधर्माः स्वपर्यायास्तनिषेधात्मकाः परपर्यायवाच्याः। यथा कमलनयनं ज्ञातुं कमलनयनः कश्चिद्ब्राह्मणः गौरः नेपालाभिजनः पाड्वास्तव्यः इत्याद्या धर्मा एव न पर्याप्ता अपितु तन्निषेधात्मकधर्माः यथा स न क्षत्रियः न कृष्णः इत्याद्याः परपर्यायाश्चापेक्ष्याः कमलनयनं सम्यग् ज्ञातुम् । तेन तत्त्वज्ञानं स्वपर्यायपरपर्यायेत्युभयसमुच्चयेनैव भवितुं शक्नोति नान्यथेति ।

सतः किं स्वरूपमिति विषयेऽपि जैना विशिष्टतां भजन्ते। बौद्धनये सन्निरन्वयं क्षणिक मुत्पादविनाशशालि च। कापिलनये सत् चैतन्यमयं नित्यं कूटस्थं पुरुषाभिधम्। अचेतनाया अपि सत्स्वरूपायाः प्रकृतेश्च परिणामिनित्यत्वम्। जैननये तु पदार्थाः शाश्वताशाश्वतरूपेण द्वेधा भवन्ति। तत्र शाश्वतमालम्ब्य तेषां नित्यत्वमशाश्वतमुपजीव्यं चानित्यत्वम्। तदित्थं प्रत्येकस्योभयात्मकतापदार्थस्य। तेन उत्पादव्ययध्रौव्यमुक्तं सत्। प्रपञ्चस्य नानात्वेऽपि-तदन्तर्गतैकत्वं जैनाः समर्थयन्ति। यथा कटककुण्डलादिषु सुवर्णम्। परिणामिनित्यतासिद्धान्तोऽयं वेदान्तिनां कूटस्थनित्यतावादेन बौद्धानां परिणामवादेन सहापि संवदति। तेन एकस्मिन्नेव पदार्थे नित्यत्वानित्यत्वसत्ता नैव विरुध्यते।

जैननये गुणविशिष्टं पर्यायविशिष्टञ्चवस्त्वेव द्रव्यम्। गुणपर्यायवद् द्रव्यमित्युक्तेः। तत्र नित्यविद्यमानत्वे सति वस्तुनो नितान्तावश्यको यो धर्मः स गुणः। देशकालजन्यः परिणामशाली धर्मः पर्यायः, तदुभयविशिष्टतत्वस्यैव द्रव्यत्वं सिध्यति। द्रव्यश्च द्विविधं एकदेशव्यापि बहुदेशव्यापि। तत्रापि कालस्यैव एकदेशव्यापिद्रव्यत्वं पदार्थान्तराणान्तु बहुदेशव्यापिद्रव्यत्वमेव। तदेवास्तिकायमाख्यायते। तस्य हि सद्भाववत्वादस्तित्वं कायवद्विस्तारसमन्वितत्वात्कायत्वञ्चेति अस्तिकायत्वम्। अस्तिकायद्रव्यञ्च जीवास्तिकाय- पुद्गलास्तिकाय- आकाशास्तिकाय-धर्मास्तिकाय-अधर्मास्तिकायभेदात्पञ्चविधम्। तत्रापि जीवास्तिकायस्य द्वौ भेदौ जीवोऽजीवश्च। जीवश्च बद्धमुक्तभेदाद् द्विविधः। बद्धश्च तारक- मनुष्य- तिर्यक्-देवभेदाच्चतुर्विधः। पुनश्च स स्थावरजङ्गमभेदाद् द्विविधः। स्थावरा एकेन्द्रिया निकृष्टा जङ्गमास्तु द्विरिन्द्रियनिरिन्द्रियचतुरिन्द्रियपञ्चेन्द्रियभेदयुताः। तेषु पञ्चेन्द्रियो मनुष्यः श्रेष्ठः। अजीवास्तु पुद्गलाकाशधर्माधर्मभेदाच्चतुर्विधाः। जीवश्चैतन्यलक्षणः। सर्वप्रकारकेषु जीवेषु चैतन्यं विद्यते। चेतन्यविशिष्टो जीवः इत्युक्तेः ।

जीवो हि अनन्तज्ञानशक्तिगुणसम्पन्नः। जीवश्चात्रात्मवचनः। स हि मध्यम-परिणामविशिष्टः। शरीरावच्छिन्नो जीवः स्वप्रकाशेन तद् द्योतयति। स च शरीरानुसारं विकाससङ्कोचशालित्वमपि भजते यथा हस्तिनि कीटे च। स च स्वयममूर्तः। तेन स नेन्द्रियगोचरः। तथापि स्वसंवेदन प्रत्यक्षद्वाराऽनुमानबलेन वा तत्प्रत्ययगोचरत्वम् ।पुद्गलो

भूतसामान्यवचनः। स एव प्रकृति-प्रधान-परमाणुप्रभृतिशब्दबोध्यः। अर्थात् यद् साङ्ख्याः प्रधानशब्देन नैयायिका परमाण शब्देन मीमांसकाः प्रकृतिशब्देन जिजनयिषन्ति तज्जैनाः पुद्गलशब्देन जनयन्ति। पूरयन्ति गलन्ति चेति पुद्गलाः। स च अणु-सङ्घातरूपेण द्विविधःचतुर्गुणवाँश्च। यथोक्तम्--

'स्पर्श-रस- गन्ध-वर्णवन्तः पुद्गलाः' इति ।

जैननये शब्दो न भूतगुणविशेषः प्रत्युतान्धकारच्छायादिवदुत्पन्नोऽवान्तरपरिणामभेदरूप एव। यथोक्तम्--

'शब्दबन्धाः सौक्ष्म्यस्थौल्य संस्थानभेदात्तमश्छायातापोद्योतवन्तश्च ।'

अवकाशप्रदो द्रव्यविशेष आकाशः। तस्य सत्ता त्वनुमानगम्यैव। जीवादीनांविस्तार-सिद्धये तस्यावश्यकता। स च लोकाऽलोकभेदाद् द्विविधः। यत्र लोकस्थितिः सलोकाकाशो लोकोपरितनश्चालोकाभिधः।

जैननये कालोऽप्यनुमानगम्यः। जगतः परिणामशीलत्वे तस्यैव हेतुता ।प्रर्वतना- परिणाम-क्रिया-परत्वापरत्वेऽपि कालादेव सम्भवन्ति। स च व्यावहारिकः पारमार्थिकश्चेति द्विविधः। तत्रानुमितघटिकादिघटितो व्यावहारिकोभूतभविष्यद्वर्तमानलक्षणः सादिः सान्तश्च। पारमार्थिकस्तु नित्यः सातत्येनविद्यमानः ।

एवमेव जैननये जीवपुद्गलयोः सहकारिकारणलक्षणो द्रव्यविशेषो धर्मः ।
स एव जीवगतिप्रेरकः। यथा मत्स्यसन्तरणं प्रति जलं सहकारिकारणतां धत्तेतथैव धर्मो जीवपुद्गलयोर्गतिं प्रति।

धर्मविरुद्धस्त्वधर्मः। स च जीवपुद्गलयोः स्थिति प्रतिहेतुत्वं भजते।
मोक्षस्तु जीवस्य आवरणरहितत्वम्। स च सम्यग्दर्शन-ज्ञान-चारित्र्येतिरत्नत्रयात्सम्भवति। यथोक्तम् --

'सम्यग्दर्शनज्ञानचारित्र्याणि मोक्षमार्गः' इति ।

तत्र दर्शनं श्रद्धा, ज्ञानमवबोधश्चारित्र्यं व्यवहृतिरिति। स्वभावतो मुक्तोऽपिजीवोऽविद्या - वासनाजन्यकर्मावरणेन बद्धो भवति, सम्यग्दर्शनादिना तस्यच्छेदस्ततोमुक्तिरिति ।

कर्मापि पृथिव्यादिवद्भौतिकमेव जननये। तच्चाष्टविधं ज्ञानावरणीय-दर्शनावरणीय-मोहनीय- वेदनीय – आयुष्यनाम- गोत्र - अन्तरायभेदेन। एषाञ्चानेकेभेदाः इति संगृह्य कर्मणां चतुश्चत्वारिंशदधिकशतमितभेदाः।

एवञ्च जैननये आश्रय-बन्ध-संवर- निर्जरा- मोक्ष-जीवाजीवभेदात्पदार्थाः सप्त ।

तत्र मनोवाक्कायानां जीवम्प्रति क्रियायोग आस्रवः, स च भावद्रव्यभेदाद्विविधः। जीवस्य पुद्गलादानं बन्धः। यथोक्तं - कषायत्वाज्जीवः कर्मणोयोग्यान् पुद्गलानादत्ते स बन्धः। करिष्यमाणानां कर्मणामवरोधः संवरः। सच भावद्रव्यभेदाद् द्विविधः। तत्र कर्ममार्गनिरोधकमानसिक प्रयत्नप्रयोगविशेषोभावसंवरः, अभिनवपुद्गलकर्मणां वास्तविको निरोधो द्रव्यसंवरः। निर्जरा हिकृतकर्मणां जीर्णीकरणं फलप्रसवाय निर्वीर्यीकरणम्। एतेषां फलमेव मोक्षः। तेन कर्मणामात्यन्तिकक्षय एव मोक्षः। बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मक्षयोमोक्षः। मुक्तश्च जीवो नैसर्गिकशुद्धस्वरूपतां याति। जीवाऽजीवौ व्याख्यातौ ।

आध्यात्मिकविकासक्रमो गुणस्थानम्। तच्चतुर्दशविधं - मिथ्यात्वग्रन्थिभेद-मिश्रविरति-देशविरति-प्रमत्तापूर्वकरणानिवृत्तिकरण-सूक्ष्म- सम्पराय-उपशान्तमोह-संयोग-केवलायोग-कवलेतिभेदात्। एभिरुपर्युपरि गच्छन् साधकः सिद्धिमाप्नोति। सैवसिद्धशिला। सिद्धशिलाप्राप्तो हि जीवः परमशान्तिमनुभवन्मुक्तः सञ्जायते ।

अहिंसा-सत्या- स्तेया-परिग्रह-ब्रह्मचर्याणां साधनैव सम्यक् चारित्र्यम्। इदमेव मुक्तेर्योनिः। तत्र ब्रह्मचर्यं यतीनां परमावश्यकं गृहमेधिनां स्वयोषिति रतिरनुमतासप्रतिबन्धा।

दर्शनमिदं बहुत्ववादप्रतिपादकम्। तेनाऽस्य परमार्थो वास्तववाद एव ।इदं हि बाह्यान्तरेन्द्रियैरनुभूयमानं जगद् वास्तविकत्वेन गृह्णाति। इदं हि कणेकणे जीवसत्तामङ्गीकरोति। एवमेव अनैकान्तवादोऽपि जैनानां परमसम्मतः। पदार्थानां मिथः सम्बन्धज्ञानादृते तत्त्वज्ञानमसम्भवि। भावस्यैकस्य ज्ञानं शेषभावज्ञानस्याधारः। सर्वभावानाञ्च ज्ञानं भावैकज्ञानस्याधार इति। जैनदर्शनस्य हि सुविपुलं साहित्यमस्ति। तत्र च आचारग्रन्थापेक्षया प्रमाणग्रन्थानां बाहुल्यमस्ति। तेषां हि सिद्धान्तग्रन्थाः पञ्चचत्वारिंशत्सङ्ख्याकाःयेषु एकादश अङ्गानि, द्वादश उपाङ्गानि दश प्रकीर्णकानि, षट् छेदसूत्राणि,चत्वारि मूलसूत्राणि, एकमनुयोगद्वारसूत्रम्, एकं नन्दीसूत्रञ्च ।

### जैनदर्शनस्यविषयवस्तु

अनाद्यनन्तोऽयं प्रपञ्चः द्विविधः जीवोऽजीवश्चेति। अनन्ताः जीवाः शाश्वताश्च। चैतन्यस्वरूपाःसर्वेशपि जीवा अनन्तज्ञान-दर्शन-वीर्य-सुखसम्पन्नाः। जीवोऽयं कथञ्चिदजीव पुद्गलसम्बद्धः अत एवानभिव्यक्तानन्तज्ञानादिधर्मः संसारसागरे निमग्नस्तपतिमहता दुःखेन। स्वकृताशुभाशुभकर्मभिर्बद्धस्सन् मनुष्य-देव-तिर्यडनारकिजन्मसु संसरति। कदाचिदस्य पुण्यकर्मफलेन संसारचक्रादपक्रान्तुमिच्छा जायते। काले परिपक्वे सतिसम्यग्ज्ञान-दर्शन-

चरित्रात्मकरत्वत्रयसम्पन्न: केवलज्ञानमेवाप्नोति। ततः संवरनिर्जराभ्यां कर्मनाशे सति निजे स्वरूपे च प्राप्ते सति मुक्तो भवति जीवः। स्वीयानन्तज्ञानादिभि: प्रकाशमानस्य लोकाग्रस्थसिद्ध शिलायां शाश्वतं निवसति। इयमेव स्थितिमोक्ष:। जीवाजीवास्त्रव- संवर- निर्जरा-बन्ध-मोक्षा: सप्ततत्त्वानि (स.द.७३ त.सू १/४)। सप्तपदार्थाइत्यपि व्यवह्रीयन्ते।(तत्त्वार्थराजवार्तिकम् १-४) पुण्यपापयोरपि गणने नवपदार्था: इत्यपिवदन्ति।

**स्याद्वादस्यप्रमाणे द्वे प्रत्यक्षमनुमापि च।**
**नित्यानित्यात्मकं सर्व नव तत्त्वानि सप्त वा ॥**
**जीवाजीवौ पुण्यपापे चास्रवः संवरोपि च।**
**बन्धो निर्जरणं मुक्तिरेषां व्याख्याधुनोच्यते ॥**

### 1.1 जीवः- (चेतनालक्षणो जीवः)

जीवा अनन्ताः । देव-मन्ष्य-पशु-पक्षि-कृमि-कीट-तरु-लतासु चैतन्यरूपेण भवन्तिजीवा:। सर्वे जीवा नित्याः परिशुद्धाश्च। द्विविधाः जीवास्सन्तिमुक्तजीवाः संसारिजीवाश्चेति। प्रकाशितानन्तज्ञानवीर्यदर्शनसुखा: मुक्ता: अप्रकाशितानन्तज्ञानवीर्यदर्शनसुखाः संसारिणः संसारिणामनन्तज्ञानवीर्यदर्शन सुखानामप्रकाशने जीवपुद्गलसम्बन्ध एव कारणम्। पुण्यपापकर्मानुसारं संसारिजीवाः देवमनुष्यादिशरीराणि प्राप्नुवन्ति।मोक्षप्राप्तिरिवैतेषां परम पुरुषार्थः। चैतन्यस्वरूपो जीव:। गुणगुणिनोरभेदात् ज्ञानादिकमपितत्स्वरूपमेव। बाह्यपदार्थग्रहणंज्ञानमितिआत्मस्वरूपग्रहणं दर्शनमिति चोच्यते। जीवः कर्ता भोक्ता च।देहपरिमाणवानयंयद्देहमाप्नोति तद्देहं व्याप्य तिष्ठति जीव इत्यस्य मध्यमपरिमाणवत्वं सिद्ध्यति। संसारिजीवाअपि द्विविधाः स्थावरजीवा:, त्रसजीवाश्चेति। वनस्पत्यादयः स्थावरजीवाः। जीवाःकदाचित्कर्मवशात् पृथिव्यादिकायानपि प्राप्नुवन्तितेस्थावराः:। मनुष्यादय: त्रसजीवाः।

**अजीवः: - (स्यादजीवस्तदन्यक: । सत्कर्मपुद्गलाः पुण्यं पापं तस्य विपर्ययः।)**

जीवभिन्नं यद्द्रव्यं तदजीव इत्युच्यते। पुद्गल-धर्माधर्माकाश-काला: इति पञ्चविधोऽजीवः १.पुद्गलः - पृथिव्याद्यात्मकोऽयं प्रपञ्चः पुद्गलपरिणाम एव। पुद्गलऽयं नित्य: अचेतन:, एकदेशवर्ती, मूर्तोऽविभागी च। अयमेक एव पुद्गलः मूर्तपदार्थ:। दर्शनान्तरसिद्धान्तपरमाणुकल्प: पुद्गलो ज्ञेयः। पुद्गलेऽस्मिन् रूप -रस-गन्ध-स्पर्शाःचत्वारिगुणाः सन्ति। शब्दः न गुण: किन्तु सः पुद्गलत्पन्नद्व्यमेव ।कर्मेन्द्रियमनांस्यपिपुद्लजनितद्रव्याण्येव।

२.धर्मः- धर्म इति स्वतन्त्रं किञ्चिद्द्रव्यम्। पारिभाषिकोऽयं धर्मशब्द:। यः

जीव- पुद्गलानां क्रियाकारणं भवति स धर्मः। यथा जले-चराणां मत्स्यानां चलनम्।

## पुनरावृत्तिः(Recap)

- जैनदर्शनम् (आर्हतदर्शनम्)।
- चतुर्विंशति तीर्थङ्कराः।प्रथमः- ऋषभदेवः, अन्तिमः महावीरश्च।
- अहिंसा-सुनृत-अस्तेय- ब्रह्मचर्य- अपरिग्रह-आत्मसंयम-वैराग्यादीनि व्रतानि, यत आत्मा आनन्दमयस्वरूपं प्राप्नोति।
- जैनास्तु द्विविधाः श्वेताम्बरा दिगम्बराश्च।
- दिगम्बरमते ब्रह्मचर्यं विवसनं कठिनतपश्चर्या च मोक्षनाघनानि, स्त्रीणां नैव मोक्षेऽधिकारः।
- आनन्दमयावस्थाप्राप्तो जीव एव अर्हदभिधः। स हि सर्वज्ञो भतति।
- संसारात् मुक्तः आत्मा जिनः।
- जैनदर्शनानुसारं जीवो हि प्रकृतेर्भिन्न एव।
- ज्ञानं द्विविधं प्रत्यक्षं परोक्षञ्च। तत्रात्मसापेक्ष प्रत्यक्षं तदितरेन्द्रियसापेक्षं परोक्षम्।
- जैनानां मते प्रत्यक्षानुमानागमाः प्रमाणानि।
- जैनानां स्याद्वादः प्रधानो वादः।
- ज्ञानसामान्यं त्रिविधं दुर्णय-नय-प्रमाणभेदात्।
- जैनानां परामर्शश्च सप्तप्रकारक◌ः सप्तभङ्गीनयपदव्यपदेश्यः।
- अनैकान्तवादोऽपि जैनानां परमसम्मतः।
- ऋषभदेवः जैनदर्शनस्य प्रथमः प्रवक्ता।तदित्थम् ऋषभदेवप्रवर्तितं मतमिदं जीवप्रकृत्योः पार्थक्यसमर्थकम्।
- जैनानां परामर्शश्च सप्तप्रकारक◌ः सप्तभङ्गीनयपदव्यपदेश्यः।स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यं, स्यादस्ति चावक्तव्यञ्च, स्यान्नास्ति चावक्तव्यञ्च. स्यादस्ति च नास्ति चावक्तव्यञ्चेति।
- जैननये गुणविशिष्टं पर्यायविशिष्टञ्चवस्त्वेव द्रव्यम्।गुणपर्यायवद् द्रव्यमित्युक्तेः।द्रव्यश्च द्विविधं एकदेशव्यापि बहुदेशव्यापि।
- रत्नत्रयसाधनेनात्मोन्नतिःसमर्थ्यते। तच्च सम्यग्दर्शनं- सम्यग्ज्ञानं- सम्यक्चरित्रञ्च सप्ततत्त्वार्थाः।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. जिनः कः ?
2. जैनदर्शनस्य प्रवक्ता कः ?
3. जैनदर्शनस्य नामान्तरम् किम् ?
4. तीर्थङ्करेषु आद्यः कः?
5. तीर्थङ्करेषु अन्तिमः कः?
6. श्वेताम्बर सम्प्रदायप्रवर्तकः कः ?
7. जैनदर्शनस्य सम्प्रदायद्वयं किम्?
8. जैनमतानां प्रमाणानि कानि?
9. चैतन्यलक्षणं किम् ?
10. रत्नत्रयं के?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. जैनमतानुसारं वृतानि कति, कानि?
2. 'नयः' नाम किम्?
3. अस्तिकायद्रव्यं कति, कानि?
4. अनेकान्तवादः कः ?

## एकैकया खण्डिकयाउत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. जैनमते मोक्षसाधनानि लिखत ।
2. रत्नत्रयं लिखत ।
3. जैनदर्शने द्रव्यं प्रतिपादयत ।
4. जैनदर्शनस्य विभागाः लिखत ।
5. जैनदर्शन् ज्ञानं प्रतिपादयत ।
6. सप्तभङ्गीनयः अथवा स्याद् वादः विशदयत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. जैनदर्शनं प्रतिपादयत।
2. जैनदर्शने स्याद्वादः लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. वर्धमानमहावीरः।
2. ऋषभदेवः।
3. आर्हतमतम्।
4. ऋषभदेवः।
5. वर्धमानमहावीरः।
6. पार्श्वनाथः।
7. दिगम्बरः, श्वेताम्बरः।
8. प्रत्यक्षं, अनुमानं, आगमः।
9. जीवः।
10. सम्यग्दर्शनं, सम्यग्ज्ञानं, सम्यग्चारित्र्यम्।

## सूचनाग्रन्थाः(References)


1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणि दाहलाः, चौखम्बा कृष्णदास अकादमि वारणासि,1998.
2. सर्वदर्शनसंग्रहः,श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, चौखम्बा विद्याभवन्, वारणासि।

## अधिकवाचनग्रन्थौ(Suggested Readings)


1. History of Indian Philosophy , Surendranath Das Guptha , Vol-III, MLBD, Varanasi
2. Indian Philosophy - Dr.S.Radhakrishnan, Vol- I & II, Varanasi, Delhi.
3. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal BanarsidassPublishers PrivateLimited, Delhi, 2000
4. Outlines of Indian Philosophy - Jadunath Sinha ,New Central Book agency, Culcutta, 1992.


SGOU

# Unit-3
# बौद्धदर्शनम्

## उद्देश्यानि(Learning Outcomes)

- बौद्धदर्शने आर्यसत्यानि ज्ञायते।
- बौद्धदर्शने त्रिपिटकज्ञानं अवगाहते।
- बौद्धदर्शने अष्टाङ्गमार्गं ज्ञायते।
- बौद्धदर्शने चतुर्थविभागस्य ज्ञानं अवगाहते ।

## प्राग्व्यपेक्षाः(Prerequisites)

आर्हतमतं जैनदर्शनमित्यप्युच्यते। अर्हतासम्बद्धत्वादार्हतं जिनसम्बद्धत्वाज्जैन मित्यस्य नाम। दर्शनमिदं वेदानां प्रामाण्यं नैव स्वीकरोतितथापि दर्शनस्यास्य बीजं वेदेष्वेव लभ्यते। अयं हि रत्नत्रयसाधनेनात्मोन्नतिःसमर्थ्यते। तच्च सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चरित्रञ्च। जैनानां मते प्रत्यक्षानुमानागामाः प्रमाणानि। आगमाददृष्टमपि सिध्यतीति तेषां विश्वासः। जैनास्तु द्विविधाः श्वेताम्बरा दिगम्बराश्च। जैनदर्शनानुसारं जीवो हि प्रकृतेर्भिन्न एव। ज्ञानं द्विविधं प्रत्यक्षं परोक्षञ्च। जैनानां स्याद्वादः प्रधानो वादः।ज्ञानसामान्यं त्रिविधं दुर्णय-नय-प्रमाणभेदात्। जैनानां परामर्शश्च सप्तप्रकारकः सप्तभङ्गीनयपदव्यपदेश्यः। दर्शनमिदं बहुत्ववादप्रतिपादकम्। अनैकान्तवादोऽपि जैनानां परमसम्मतः। ऋषभदेवः जैनदर्शनस्य प्रथमः प्रवक्ता। तदित्थम् ऋषभदेवप्रवर्तितं मतमिदं जीवप्रकृत्योः पार्थक्यसमर्थकम्। पार्श्वनाथो हि त्रयोविंशतितमस्तीर्थङ्करः। अन्तिमस्तीर्थङ्करो वर्धमान महावीरः। स हि विष्णुपुराणाद् उपवर्णितस्य नन्दीवर्धनस्य भ्राता वर्धमानमहावीरः कथ्यते। तस्य हि पिता सिद्धार्थो माता त्रिशला पत्नी च यशोदा। तस्य जन्म केचिद्वैशालीग्रामे केचित्क्षत्रियकुण्डग्रामे वदन्ति। तस्य हि स्थितिकालस्तु विक्रमपूर्वषष्ठशतकमामन्यते।

## मुख्यपदानि (Key words)

गौतमबुद्धः, बौद्धदर्शनम्, विनयपिटकः, सुत्तपिटकः, अभिधम्मपिटकः,आर्यसत्यं, अष्टाङ्गमार्गाः, निर्वाणं,वैभाषिकाः, सौत्रान्तिकाः, माध्यमिकाः, योगाचाराः, प्रत्यक्षम्, अनुमानम्।

## Discussion

गौतमश्च बुद्धौ विक्रमपूर्वे 505 तमे वर्षे वैशाखशुक्लपौर्णिमायां शतभिषानक्षत्रे कपिलवस्तुमण्डले शाक्यगणतन्त्रस्य प्रधानस्य शुद्धोधनस्य प्रसादे तन्महिष्या मायादेव्या जन्मावापेति। उत्तरकोसलराजवंशोऽयं वैवस्वतादुद्भूतः क्षेमधन्वपर्यन्तं चलतीति। ते हि काशीराजभयेनायोध्यां त्यक्त्वा कपिलवस्तुमण्डले स्वां राजधानीमनैषुः। तस्निन्नेव वंशे शाक्यो नाम कश्चिन्नृपतिर्बभूव येन गणतन्त्रपद्धतिरवलम्बिता। ततश्च तद्वंशजाः शाक्यसंज्ञयाऽपि प्रख्याता अभूवन्। तस्मिन्नेव शाक्यवंशे शुद्धोदनो बभूव यस्मात्सिद्धार्थः समजनि। महाभिनिष्क्रमणं चकार स च बाल्यात्प्रभृतिः विरक्तः सन् एकोनविंशतितमे वर्षे राजप्रसादात्पत्नीपुत्रादिकं त्यक्त्वा महाभिनिष्क्रमणञ्चकार शाश्वतसुखान्वेषणाय। स च प्रथमं आराट्कालामनाम्नः साङ्ख्याचार्यलब्धज्ञानाऽपि न तथा सन्तुष्टः स्वयमेव तत्वान्वेषणं कुर्वंश्चतुर्णामार्यसत्यानामाविष्कारञ्चकार।प्राप च बुद्धत्वमपि स्वानुभवेन। तानि च दुःखं दुःखसमुदायः दुःखनिरोधः दुःखनिरोधगामिनी प्रतिपच्चेति। ततश्च स सारनाथ गत्वा तत्र कौटिन्यान्यादि पञ्चवर्गीयपञ्चभिक्षुभ्यस्तेषामुपदेशं बुविधाय धर्मचक्रं प्रवर्तयामास। सिद्धार्थस्य वैशाखशुक्लपूर्णिमायामेव सम्भूतेति बौद्धेषु वैशाखपूर्णिमायाः समधिकं महत्वम्। स चाशीतितमे वर्षे मल्लगणराज्यवर्तिकुशीनगरे निर्वाणमाप। तस्य हि जन्मभूमित्वात्कपिलवस्तुमण्डलस्य , ज्ञानाप्तिस्थलत्वाद्बोधगयायाः, निर्वाणप्तिस्थलत्वात्कुश द्धत्वमपीनगरस्य च बौद्धसमुदाये महर्ध्यं महत्वम्। निर्वाणात्पूर्वं तेन हि गणराज्यप्रणालिमवलम्ब्य भिक्षुसङ्घोऽपि स्थापितः। अतो बौद्धेषु बुद्धधर्मसङ्घास्त्रिरत्नम्।

बुद्धस्य हि सदुपदेशा मौखिका एवासन्नतस्तेषां सङ्ग्रहार्थं तन्महानिर्वाणानन्तरं राजगृहे महाकाश्यपस्याध्यक्षत्वे बौद्धानां प्रथम महासम्मेलनं सञ्जातम्। तत्र हि बुद्धपट्टशिष्येणानन्दाख्येन सुत्तपिटकं उपालिना विनयपिटकञ्च सङ्गृहीतम्। एवञ्च अभिधम्मपिटकमपि सङ्गृहीतमिति त्रिपिटकं बौद्धदर्शनस्य सर्वस्वभूतो ग्रन्थः। तत्र सुत्तपिटके महात्मनो बुद्धस्य उपदेशाः सङ्गृहीताः, विनयपिटके आचारविशेषाः, अभिधम्मपिटके च दार्शनिक सिद्धान्ता। सुत्तपिटकेपञ्च निकायाः सन्ति दीग्घमज्झिम- संयुत्त- अङ्गुत्तर- खुद्दकनिकायभेदात्। तत्र हि बुद्धस्य द्वाविंशदुत्तरचतुःशतकगाथानां सङ्ग्रहो विद्यते। सेऽयं धम्मपादाख्ये ग्रन्थः। एवं बुद्धस्य पूर्वजन्मभिः सह सम्बन्धानां 550 मितगाथानां सङ्ग्रहश्च जातकाख्यः। एतदतिरिक्तश्च खुद्दकपाठः, उदानम्, इतिवित्तकं, सुत्तनिपातकः, विमानवत्थु, पेतवत्थु, थेरगाथा, थेरीगाथा, निद्देशः, पटिसम्मिथाभग्गा, उपादानं, बुद्धवंशं, चरियापिटकम्, इत्येवमादयश्च ग्रन्थाः।

विनयपिटकस्य सुत्तविभागः पत्तिमोक्खोवा, भिक्खुपात्तिमोक्खो, भिक्खुनीपातिमोक्खश्चेति त्रीण्यङ्गानि।

अभिधम्मपिटकस्य पुग्गलपञ्ञति- धातुकथा- धम्मसंगवि- विभंग- पट्ठानप्रकरण- कथावत्थयमकश्चेति ग्रन्थाः। तथैव नागसेनप्रणीतो मिलिन्दपञ्ञाऽपि महत्वपूर्णोग्रन्थाः।

क्लिष्टतराध्यात्ममार्गापेक्षया आचारेणैव क्लेशमुक्तिः सर्वसुलभेति कर्तव्यमार्गोपदेश एव बुद्धदर्शनस्य प्रयेजनम्।

दुःखं, दुःखसमुदायः, दुःखनिरोधः, दुःखनिरेधगामिनि प्रतिपच्चेति चत्वारि सत्यानि। आर्या एव सत्यचतुष्टयं प्रतिपत्तुं पारयन्ति इति तानि आर्यसत्यान्यपि कथितानि।तत्र दुःखं सार्वत्रिकः क्लेशः, तस्य नैकं कारणमपितु कारणशृङ्खलैव। सैव द्वादशनिदानानि इति कथ्यते। तानि च जरामरण- जाति- भव- उपादान- तृष्णा- वेदना- स्पर्श- षडायन- नामरूप- विज्ञान- संस्कार- अविद्याऽऽख्यानि। तत्र हि पूर्वं प्रति परस्य कारणता। तेन निखिलस्य दुःखपुञ्जस्य कारणमपिद्यैव। अविद्यावशङ्गतो हि जीवः संसारचक्रेऽहर्निशं बाभ्रमीति। एतान्येव द्वादशनिदानानि प्रतीत्यसमुत्पादसंज्ञयाऽप्यभिधीयन्ते। अयमेव सापेक्षकारणतावादोऽपि कथ्यते। अयं बौद्धानां मौलिको राद्धान्तः. हेतुप्रत्यय सापेक्षो भावानामुत्पादः प्रतीत्यसमुत्पादः। स च द्वादशाङ्गस्त्रिकाण्डश्च। तत्र अतीतसम्बन्धे द्वे अविद्यासंस्कारे भविष्यत्सम्बद्धे द्वे जातिजरामरणाख्यो, वर्तमानसम्बद्धान्यष्टौ विज्ञान नामरूपषडायतन स्पर्शवेदनातृष्णोपादान भावाख्यानि। यथोक्तम्-

पूर्वापरान्तयोर्द्वे द्वे परिपूर्णाः।

तेन हि अविद्यानिरोधे एव दुःखसमुच्छेदः सम्भवति नान्यथा ।

तन्निरोधश्च तत्प्रतिपत्यैव भवति प्रतिपत्तिश्च कर्तव्यमार्गानुमनेन सम्भवतीति कर्तव्यमार्गोपदेशोऽत्र क्रियते।

बौद्धानां मते रूप- वेदना- संज्ञा- संस्कार- विज्ञानेति पञ्चस्कन्धानां पुञ्ज एवात्मा न तद्भिन्नाः कश्चित्स्वतन्त्रसत्तावान् पदार्थः. अतो मानसप्रवृत्तिसङ्घात एवात्मा बौद्धनये। यथा अवयवसङ्घात अव रथपदवाच्यो न तु कश्चिदेकोऽवयवस्तथैव पञ्चस्कन्ध एवात्मपदव्यपदेश्यः। ते न बौद्धा नैरात्म्यवादिनः सङ्घातवादिनो वा।

बौद्धनये जीवो जगच्चेत्युभयमेवानित्यं प्रतिक्षणपरिणामशाली च। यथा दीपशिखाऽनुक्षणं परिणमन्त्यपि दीप्तिमन्तानवितानेन एकत्वावच्छिन्नेवोद्भासते तथैव जगज्जीवयोरपि गतिर्ज्ञेया। यथा वा विकृतिमापन्नं दुग्धं दधिप्रभृतिषु विपरिणम्यमानमपि वस्त्वेकत्वन्न जहाति परिपालयति चाभिन्नतां, तत्पयसः पयस्त्वं तु नैवालपितुं पार्यते। तथैव प्रतिक्षणं परिणामवतोः जगज्जीवयोरपि अनित्ययोरपि सतो नित्यता आपाततः समुद्भासते न तु वस्तुगत्या। बौद्धनामेष दृष्टिकोणः सनतानवादनाम्ना प्रसिद्धः सन्ततपरिणाम- शालितावादश्च। ते हि परिणाम एव विश्वप्रपञ्चेऽस्मिन् सत्यतां विभर्तीति विश्वसन्ति, वस्तुतः प्रतिक्षणं जीवकोशानां

मरणमुत्पादनञ्च, उत्पादनक्षमताह्नासे वार्द्धक्यं वा निरोधे मरणमिति जैववैज्ञानिका अपि आमनन्ति।

बौद्धा हि चतुर्धा विभक्ताः वैभाषिक- सौत्रान्तिक- योगाचार- माध्यमिकभेदात्। तेष्वपि वैभाषिकानां माध्यमिकयोगाचाराणाञ्च नितान्तमेव भिन्नः पन्था सौत्रान्तिकास्तु मध्यगाः यतस्तेंऽशतः सर्वास्तिवादमनुमोदन्ते सिद्धान्तान्तरेषु योगाचारमपि। तत्रापि वैभाषिका हीनयानसम्प्रदायिनोऽपरे महायानानुयायिनः ।

तत्रापि वैभाषिकाणां बाह्यार्थप्रत्यक्षवादः सौत्रान्तिकानां बाह्यार्थानुमेयवादः योगाचाराणां विज्ञानवादः माध्यमिकानां शून्यवादश्चसम्मतः। वैभाषिकाःखलुबाह्यार्थं प्रत्यक्षरूपेण सत्यं मन्यन्ते। सौत्रान्तिकास्तु बाह्यप्रत्यक्षसिद्धं नैवाङ्गीकुर्वन्ति। येगाचारास्तु बाह्यजगतो मिथ्यात्वमङ्गीकृत्य चित्तमेव सत्यपदार्थत्वेन स्वीकुर्वन्ति विज्ञानवादिनः। चित्तस्यापि मिथ्यात्वं मत्वा केवलं शल्यमेवोपलालयन्ति शून्यवादिनो माध्यमिकाः। एषां नये तु समस्तस्य जगतः सत्ता प्रातिभासिकी, केवलं शून्यमेव सत्यसत्ताकम्। निर्वाणविषयेऽपि ते बेभिद्यन्ते। संसारस्य निर्वाणस्य चोभयोरेव सत्यतामङ्गीकुर्वन्ति वैभाषिकाः। तयोरुभयोरेवासत्यतामामनन्ति माध्यमिकाः। संसारस्य सत्यतां निर्वाणस्यासत्यतां मन्यन्ते सौत्रान्तिकाः। संसारस्यासत्यतां निर्वाणस्यसत्यताञ्च समर्थयन्ति योगाचाराः।

तेषाञ्च साहित्यमपि पृथगेव किन्तु प्रत्येकं सुविपुलं विघते। तत्र वैभाषिकानाम् अभिधर्मज्ञानप्रस्थानशास्त्रं कात्यायनीयपुत्रेण बुद्धमहानिर्वाणाच्छतत्रयवर्षानन्तरं प्रणीतम्। अस्य केवलं हुएनशाङ्गकृतचीनभाषान्तरितरूपमेवलभ्यते। अस्योपरि अभिधर्मविभाषा- शास्त्राख्यं विस्तृतं भाष्यमुपलभ्यते यच्चीनतिब्बतभाषायामेव दृश्यते। एवञ्च वसुबन्धुमहाभागस्य अभिधर्मकोशसंज्ञको ग्रन्थः काश्मीरेषु प्रसिद्धः। अस्य प्रणयनकालो वैक्रमचतुर्थशतकदेशीयाः। अस्योपरि अनेकष्टीकाः सन्ति यासु स्थिरसतेस्तत्वार्थाख्या, दिङ्नागस्य मर्मप्रदीपाख्या यशोमित्रस्य स्फुटार्था प्रसिद्धाः। सङ्घभद्रस्य कोशकराख्यो ग्रन्थोऽभिधर्मकोशसम्मतमतखण्डनाय प्रवर्तितः। समयप्रदीपिका वैभाषिकमतस्यापरः सारभूतोग्रन्थः।

वैभाषिकाः खलु नानात्मकं जगदिदं वास्तविकं सत्यञ्च मन्यन्ते। सत्ता चास्य प्रत्यक्षज्ञानगम्या। द्विविधं हि भौतिकं मानसिकञ्चेति बाह्यमाभ्यन्तरञ्चजगत् मिथो निरपेक्ष्यं स्वतन्त्रसत्ताकञ्च। वस्तुविभागो द्विविधा विषयविषयिगतभेदात्। विषयिगतत्वेन पदार्थास्त्रिविधाः पंचस्कन्ध- द्वादशायतन- अष्टादशधातुभेदात्। तत्र रूप-वेदना- संस्कार- संज्ञा- विज्ञानानीति पंचस्कन्धाः। षडिन्द्रियाणि षड्विषयाश्चेति द्वादशायतनानि। आयतनं हि ज्ञानसाधनम्। सन्तानवितानं दधति इति धातवस्ते च द्वादशयतनानिषडिन्द्रियविज्ञानानि चेत्यष्टादश। विषयगतत्वेन जगदिदं द्विविधधर्मस्य समुच्चयमात्रम्। धर्मो हि

सत्तात्मकपदार्थः। स च सास्रावानास्रवभेदेन द्विविधः। तत्र रागद्वेषमलदूषिताः स्रवास्तद्रहिताश्चानास्रवाः। एतादृशधर्मा: पंचसप्ततिः। अनास्रवा द्विसप्ततिः सास्रावास्तु त्रय एव। भूतानि चत्वार्येव पृथिव्यप्तेजोवायवः। आकाशस्यानावृत्तत्वान्न भूतत्वम्। एतेषामन्तिमोपादानानि स्वस्वपरमाणुरूपाणि। परमाणुश्च षट्कोणात्मकः, षट्केन युगपद्योगात्तस्य षडंशता। ग्रहणमध्यवसायश्च द्विविधं ज्ञानसाधनम्। ग्रहणेनज्ञानसाधनलब्धिः. वस्तुनो नामजातिभ्यांसंयोजनमध्यवसायः। सोपाधिशेषनिरुपाधिशेषभेदान्निर्वाणो द्विविधः। तत्र क्षीणेष्वप्यास्रवेषु जीवितावस्थायामर्हत अवशेषानेकपञ्चस्कन्धआद्यः निरवशेषसम्मतोपधिकश्च द्वितीयः। प्रथमा जीवन्मुक्तिरपरा विदेहमुक्तिश्च।

**सौत्रान्तिका-** हीनयानपथानुगा अपि वैभाषिकेभ्योऽप्येतदर्थमेव भिद्यन्ते यत्ते वसुबन्धोरभिधर्मकोशस्य प्रामाणिकतां नैवामनन्ति तस्य तथागतप्रणीततवाभावात्। ते हि सूत्रपिटकमेव प्रामाणिकं मन्यन्ते सूत्रान्ते प्रवृत्ता इति सौत्रान्तिकाः।

कुमारलात- श्रीलात- बुद्धदेवाख्या अस्याचार्याः। मतस्यास्य प्रवर्त्तकः कुमारलातो नागार्जुनसमसामायिको वैक्रमतृतीयशतकभवः। कल्पनामण्डितकाख्यास्य रचना। श्रीलातस्तस्यान्तेवासी। तस्य ग्रन्थश्च विभाषाशास्त्रम्।

सौत्रान्तिका वर्तमानमेव सत्यं मन्यन्ते भूतं भविष्यच्चावास्तविकम्। तद्विपरीतं वैभाषिकास्त्रयाणामेव कालानां अस्तिस्त्वं स्वीकुर्वन्ति, यतस्ते सर्वास्तिवादिनः। सौत्रान्तिकनये ज्ञानस्य स्वतप्रामाण्यम्। तेषां मते प्रदीपवज्ज्ञानस्य स्वयम्प्रकाशकत्वम्। ज्ञानस्य स्वयंसंवित्तिसिद्धान्तोऽयं विज्ञानवादिनामपि सम्मतः। इमे हि वैभाषिकानामसदृशतया जगतः सत्तायां अनुमेयगम्यतां स्वीकुर्वन्ति न तु प्रत्यक्षगम्यानां पदार्थानां क्षणिकत्वात्तेषां प्रत्यक्षतयोपलब्धेरसम्भवात् केवलं तज्जन्यज्ञानस्यैवावशेषात्। ते हि बाह्यवस्तुनः सत्यत्वं मन्यन्तेकिन्तु तदाकारविशेषमादाय ते बेभिद्यन्ते मिथः। केचित्तदाकारं वस्त्वाश्रितं मन्यन्तेऽपेरे तु चित्तवृत्तिविनिर्मितम्, इतरे उभयात्मकश्च। ते हि परमाणूनां निरवयवत्वं मिथस्तेषां स्पर्शभावाश्च मन्यन्ते। तन्नये परमाणुसङ्धातस्य तत्परिणामं प्रति करणता भवति। पदार्थः स्वभावाद्व विनाशशीला न त्वनित्या। तादृशो विनाशश्चाभूत्वाभावः परिवृत्तिलक्षण: उत्पादविनाशरूपः क्षणिकश्च। तन्मते आत्माकाशौ अस्तित्वहीनौ। यत असत उत्पन्नं वस्तु क्षणं स्तित्वा विलयं याति। तन्नये क्लेशानुदयस्य एव दुःखानुत्पादं प्रति हेतुता। अतः क्लेशानुदय एव निर्वाण इति।

**योगाचारः** तृतीयः पन्था बौद्धानाम्। मैत्रेयनाथ- असङ्ग- स्थिरमति- दिङ्नाग- धर्मकीर्ति- धर्मपालाश्चास्याचार्यः। तत्र मैत्रेयनाथः मतस्यास्य प्रवर्तकः। अयश्च कुमारलाल- समसामायिको वा तत्कालपश्चाद्वर्त्ती। अस्य हि महापण्डितस्य मध्यान्त-विभाग-

अभिसमयालङ्कार-(प्रज्ञापरिमितोपदेशशास्त्रम्) सूत्रालङ्कार- महायानोत्तरतन्त्र-धर्मधर्मताविभागश्च प्रसिद्धा ग्रन्थाः। तत्र मध्यान्तविभागस्य गद्यभागस्तु असङ्गगुम्भितः। तदुपरि वसुबन्धोर्भाष्यं भाष्यस्य स्थिरमतिटीका च। असङ्गाचार्यस्तु वैक्रमशतकभवो वसुबन्धोरभ्राता राज्ञः समुद्रगुप्तस्याभिमतः। अतः हि महायानसम्परिग्रहः, महायानाभिधर्मसङ्गीतशास्त्रं, योगाचारभूमिशास्त्रम्, अभिसमयालङ्कारटीका, च प्रसिद्धा। असङ्गानुजस्य वसुबन्धोः "विज्ञापितमात्रतासिद्धिः" विज्ञानवादस्य सर्वप्रामाणिको ग्रन्थः। वसुबन्धोः शिष्यस्य स्थिरमतेः त्रिशिकाभाष्यं, माध्यान्तविभङ्ग- सूत्रभाष्यटीका, अभिधर्मकोशभाष्यवृत्तिः, सूत्रालङ्कारवृत्तिभाष्यं, मूलमाध्यमिककारिकावृत्तिश्च प्रसिद्धा ग्रन्थाः। वसुबन्धोरेव शिष्येष्वन्यतमो दिङ्नागो बौद्धन्यायशास्त्रप्रवक्तृत्वेन प्रसिद्धः। अस्य हि प्रमाणसमुच्चय- प्रमाणसमुच्चयवृत्ति- न्यायप्रवेश- हेतुचक्रडमरुप्रमाण- शास्त्र- आलम्बनपरीक्षा-तद्वृत्तिश्चेति ग्रन्थाः प्रसिद्धाः।

एवमेव धर्मकीर्तेः प्रमाणवार्त्तिक- न्यायबिन्दु- हेतुबिन्दु- प्रमाणनिश्चय- वादन्याय-सम्बन्धपरीक्षा- सन्तानान्तरसिद्धि- प्रभृतयः प्रसिद्धा ग्रन्थाः। एवञ्च धर्मपालस्य विज्ञप्तिमात्रतासिद्धिव्याख्याया शतशास्त्रैवैपुल्यभाष्यं प्रसिद्धम्।

योगाचारमते ज्ञानमात्रं सत्यं न तु बाह्यजगदपि। ज्ञानं हि आलयविज्ञानरूप प्रवृत्तिविज्ञानरूपभेदेन द्विविधम्। प्रथमं सुषुप्तिकालेऽपि तिष्ठति द्वितीयस्य तत्राभावः। निरुपल्लवज्ञानसाध्यो हि मोक्षः। विषयोपल्लवनिरुपल्लवज्ञानयोरुच्छेदावेव तत्प्राप्तिः। यत्किञ्चित्प्रकारकमपि ज्ञानं मोक्षवारकम्। मतमेवेदं विज्ञानवादसंज्ञायाऽभिहितम्। तेषां हि मतम्-

नान्योऽनुभाव्यो बुद्ध्याऽस्ति तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते। ।इति।

योगाचाराणां मते स्यंवेदनस्य न्तान्दमेवावश्यकताऽन्यथा जगदान्ध्यं प्रसज्येतेति ।शेषं सौत्रान्तकतुल्यमेवेति।

**माध्यमिका** हि शून्यवादिनः। मतस्यास्य प्रवर्त्तको नागार्जुनः। स हि दक्षिणात्यो ब्राह्मणो गृहीतबौद्धदीक्षः। महाविचक्षणोनालन्दविश्वविद्यालयस्य संस्थापकः। अस्य हि अष्टसाबस्रिका, प्रज्ञापारमिता, उपायकौशल्यं, व्ग्रहव्यावर्त्तिनि, माध्यमिकशास्त्रश्च प्रसिद्धा ग्रन्थाः। माध्यमिकशास्त्रं हि सप्तविंशतिप्रकरणेषु विभक्तम्। अस्योपरि अनेका वृत्तयः प्रणीताः सन्ति यासु श्रीभव्यप्रणीता प्रज्ञाप्रदीपा, चन्द्रकीर्तेः प्रसन्नपदा च मुख्या। प्रज्ञापारमितशास्त्रं हि महायानस्य विश्वकोष एव। तथैव आर्यदेव- स्थविरबुद्धिपालित- भावविव्क- चन्द्रकीर्ति- शान्तरक्षितप्रभृतयो

विद्वांसो मतस्यास्य प्रचारका आसन्। अनेके ग्रन्था मतमिदं पल्लवयन्ति।

शून्यवादोऽस्य प्रधानो राद्धान्तः। सामान्यतः शून्यशब्दः सर्वसत्तासद्भावबोधकः किन्तु माध्यमिकनयेऽसौ अनिर्वचनीयतावचनः। पदार्थस्वरूपनिर्णये तु चतस्रो वृत्तयो भवन्ति नास्ति तदुभयं तन्नोभयञ्च। परमतत्वं तु तदितरमेव भवति। तत्तु न सन्नासत्, न सदसत्, न चानुभयात्मकमेव। तेन शून्यशब्दोऽपि मध्यमप्रतिपद्वचनपरः। किञ्च वस्तु नैकान्तिकं सत् न चैकान्तिकमसत्। किन्तु तयेर्मध्यविन्दावेव तन्निर्णयः। अतः शून्यमस्तेर्नास्तेश्च मध्यबिन्दुः। न च शून्यमभावार्थकं यतः स सापेक्षत्वाद्भावं निर्दिशति। एतादृशमध्यमार्गोन्नायकत्वादेव प्रस्थानमिदं माध्यमिकसंज्ञितम्। सत्यं हि द्विविधं पारमार्थिकं सांवृतिकञ्च। तत्राद्यं वास्तविक-परमवास्तविकम्। प्रथमं हि शून्यपदवाच्यमनिर्वचनीयमपरं हि ज्ञानसंवलितम् अविद्यालक्षणम् अयो भावाभावान्तद्वयरहितत्वात्तत्स्वभावानुत्पत्तिलक्षणा शून्यता मध्यमा प्रतिपद् मध्यमो मार्ग इत्युच्यते इति प्रसन्नपदायां चम्द्रकीर्तिः ।

मतमिदमित्थं शून्यद्वैतसमर्थकम्। तदनुसारेणैतद्धि नानारूपं जगच्छून्यस्यैव विवर्तात्नकं रूपम्। ते हि तदनिर्वचनीयं मन्यनते तस्य इदमित्थन्तया वक्तुमशक्यत्वात्। शून्यताया एव केवलं सत्यत्वं वास्तविकत्वञ्च। उक्तमेव-

न स्वतो नाऽपि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाःक्वचन केचन ।।इति।

तदित्थं सङ्क्षेपेण निरूपितो बौद्धनयः. दुःखं दुःखसमुदायः दुःखनिरोधस्तन्निरोधप्रतिपदिति चतुरार्यसत्यधिष्ठातो बौद्धनयः दुःखनिरोधो एव समधिकं बलं दधाति। दुःखनिरोधोपायश्चाषटाङ्गमार्गानुसरणमेव। स च दृष्टि- सङ्कल्प- वचन- कर्मान्त- आजीव- व्यायाम- स्मृति- समाधिषु सम्यक्त्वमेव। बौद्धनयो व्यवहारपक्षपातो। स हि सिद्धान्तापेक्षयाऽऽचरणेऽधिकं बलं निदधाति। कर्मणा हि जन्तुर्मुक्तो भवति इति तस्य विस्रम्भः। प्रज्ञा, शीलं, समाधिश्चेति अष्टाङ्गमार्गस्य त्रीणि अङ्गानि। प्रतीत्यसमुत्पादः, कर्म, क्षणिकवादः, आत्मनोऽनस्तित्वञ्चास्य दार्शनिकपक्षः। एकस्मात्कारणादुत्पन्नं कार्यमन्यस्यकार्यस्य कारणं भवति। एवञ्चोत्तरोत्तरमेकैकं कार्यं कार्यान्तरम्प्रति कारणत्वं गच्छति, नाकस्मात्किनपि प्रादुर्भवतीति प्रतीत्यसमुत्पादस्य सारम्। भूतस्य परिणाम एव वर्तमानमिति कर्मवादसारम्। सर्वेषामेव वस्तूनामनित्यमेव। सर्वेऽपि संयोगा विप्रयोगान्ता एव । सर्वमेव परिणामि वस्तु किन्तु तथाविधपरिणामस्यापि सन्ततप्रवृत्तित्वाच्छृङ्खलित- मिव सर्वं दृश्यते। सन्तानवाद एव क्षणिकवादसारः। विभिन्नक्रमशीलव्यवहितावस्थानं प्रवाह एव जीवनम्। कस्याप्यवस्थाया उत्भवस्तत्प्राग्वर्त्यवस्थाया एव भवति। प्राक्तनावस्थाद्यतनावस्थां वर्तमानावस्था च भाविनीमवस्थां प्रसूते। तेन नास्ति किञ्चिदपि अवस्थानिर्धारकत्वम्। देहचित्तविज्ञानानां

सङ्घातो हि मनुष्यः। यावत्तत्समष्टेः अतः सद्भावस्तावदेव मनुष्योऽपि सत्तावान्। अतः संङ्घातं व्यतिरिच्य नास्ति किञ्चिदात्माख्यं वस्तु। रूपवेदनासंज्ञासंस्कारविज्ञानानां संयोग एव जीवनमित्यात्मानस्तित्ववादसारम्। सर्वासामेव शाखानां बुद्धधर्मसङ्घाःसेव्याः। तत्र हीनयानेऽस्य सम्प्रदायः प्राचीनं स्वरूपं स्मरति। बुद्धोपदेशानुसारी मार्गोऽयं स्वावलम्बने धर्मे च बलं निदधाति। महायानसम्प्रदायस्तु बोधिसत्वबुद्धोपास्यत्वात्ममद्भावनिष्ठविचारेषु विचरति।

## पुनरावृत्तिः(Recap)

- बौद्धदर्शनम् - श्रीबुद्धः ।
- त्रिपिटकं बौद्धदर्शनस्य सर्वस्वभूतो ग्रन्थः।
- तत्र सुत्तपिटके महात्मनो बुद्धस्य उपदेशाः सङ्गृहीताः, विनयपिटके आचारविशेषाः ,अभिधम्मपिटके च दार्शनिक सिद्धान्ता: ।
- दुःखं, दुःखसमुदायः, दुःखनिरोधः, दुःखनिरेधगामिनि प्रतिपच्चेति चत्वारि सत्यानि।
- अष्टाङ्गमार्गाः।
- प्रमाणद्वयम्।
- बौद्धानां मते रूप- वेदना- संज्ञा- संस्कार- विज्ञानेतिपञ्चस्कन्धा: सन्ति।
- बौद्धा हि चतुर्धा विभक्ताः वैभाषिक- सौत्रान्तिक- योगाचार- माध्यमिकभेदात्।
- तत्रापि वैभाषिकाणां बाह्यार्थप्रत्यक्षवादः सौत्रान्तिकानां बाह्यार्थानुमेयवादः योगाचाराणां विज्ञानवादः माध्यमिकानां शून्यवादश्च सम्मतः ।
- वैभाषिकाः खलु बाह्यार्थं प्रत्यक्षरूपेण सत्यं मन्यन्ते ।
- वैभाषिकाः विषयिगतत्वेन पदार्थास्त्रिविधाः पंचस्कन्ध- द्वादशायतन- अष्टादशधातुभेदात्।
- विषयगतत्वेन जगदिदं द्विविध धर्मस्य समुच्चयमात्रम्।
- सौत्रान्तिकनये ज्ञानस्य स्वतप्रामाण्यम्। तेषां मते प्रदीपवज्ज्ञानस्य स्वयम्प्रकाशकत्वम्।
- मैत्रेयनाथः योगाचारमतस्य प्रवर्तकः। योगाचारमते ज्ञानमात्रं सत्यं न तु बाह्यजगदपि।
- माध्यमिका हि शून्यवादिनः। माध्यमिकमतस्य प्रवर्त्तको नागार्जुनः।

- पदार्थस्वरूपनिर्णये तु चतस्रो वृत्तयो भवन्ति नास्ति तदुभयं तन्नोभयञ्च । सत्यं हि द्विविधं पारमार्थिकं सांवृतिकञ्च।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. बुद्धदर्शनस्य स्थापकः कः ?
2. श्रीबुद्धस्य उपदेशाः कीदृशेन संगृहीताः ?
3. बौद्धदर्शनमङ्गीकृतं प्रमाणद्वयं किम् ?
4. बौद्धदर्शनस्य विभागाः के?
5. सौत्रान्तिकसम्प्रदाय प्रवर्तकः कः ?
6. योगाचारसम्प्रदाय प्रवर्तकः कः ?
7. विज्ञानवादिनः कः ?
8. माध्यमिकसम्प्रदाय प्रवर्तकः कः ?
9. शून्यवादिनः कः ?
10. बौद्धमते मोक्षस्य अपरं नाम किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. विनयपिटके कः विषयः?
2. सुत्तपिटके विषयः कः ?
3. अभिधम्मपिटके विषयः कः ?
4. अष्टाङ्गमार्गाः के ?
5. चत्वारि आर्यसत्यानि कानि ?
6. को नाम प्रतीत्यसमुत्पादः ?
7. पञ्चस्कन्धाः के ?

## एकैकया खण्डिकया उत्तराणि लिखत ।

**(Answer the following questions in a paragraph)**

1. प्रतीत्यसमुत्पादः विशदयत।
2. पिटकत्रयं लिखत ।
3. अष्टाङ्गमार्गाः विशदयत।
4. द्वादशायतनानि लिखत ।
5. त्रिपिटकं लिखत ।
6. आर्यसत्यं लिखत ।

## निर्दिष्टाभ्यासाः (Assignments)

1. बौद्धदर्शनमधिकृत्य माध्यमिकाः सिद्धान्तं प्रतिपादयत।
2. बौद्धदर्शनमधिकृत्य योगाचारमतं प्रतिपादयत।
3. बौद्धदर्शनमधिकृत्य वैभाषिकाः सिद्धान्तं प्रतिपादयत।
4. बौद्धदर्शनमधिकृत्यसौत्रान्तिकदर्शनं लिखत ।
5. बौद्धदर्शनविभागाः लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. श्रीबुद्धः।
2. पिटकरूपेण।
3. सदाचारविषयकाः नियमाः।
4. प्रत्यक्षम्, अनुमानम्।
5. कुमारलातः।
6. मैत्रेयनाथः।
7. योगाचारः।
8. नागार्जुनः।
9. माध्यमिकाः।
10. निर्वाणम्।

SGOU

## सूचनाग्रन्थाः (References)

1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणि दाहलाः, चौखम्बा कृष्णदास अकादमि वारणासि,1998
2. सर्वदर्शनसंग्रहः,श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, चौखम्बा विद्याभवन्, वारणासि।

SGOU

**Set-1**

**Model question paper**

# SREENARAYANAGURU OPENUNIVERSITY

**QP CODE: .........**

**Reg. No : ………...............** **Name : ………………...**

**FOURTH SEMESTER B.A. SANSKRIT EXAMINATION**

**DECIPLINE SPECIFIC ELECTIVE COURSE**

**B21SN01DEभारतीयदर्शनपरिचयः**

**(CBCS - UG)**

**2022-23 - Admission Onwards**

Time: 3 Hours MaxMarks**: 70**

सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरी लिपिरुपयोक्तव्या ।

## SECTION-A

(प्रथमो भागः)

I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत। **(10x1=10)**
**(Answer any ten questions in a word or sentence)**

1. न्यायदर्शने पदार्थः कति विधम्?
2. ब्रह्मसूत्रस्य कर्ता कः?
3. चत्वारि आर्यसत्यानि कानि ?
4. समाधिः कति विधम्? तस्य लक्षणं किम्?
5. पञ्चभूतानि कानि
6. नव्यन्यायदर्शनस्य प्रवर्तकः कः?
7. प्रत्यक्षप्रमाणलक्षणं किम् ?
8. हेत्वाभासः कति विधाः सन्ति ?
9. सपक्षस्य लक्षणं किम्?

SGOU

10. परामर्शस्य स्वरूपं किम्

11. चार्वाकदर्शनस्य अपरं नाम किम् ? 1

12. जैनदर्शनस्य सम्प्रदायद्वयं किम्?

13. चैतन्यलक्षणं किम् ?

14. विज्ञानवादिनः कः ?

15. योगाचारसम्प्रदाय प्रवर्तकः कः ?

## SECTTION-B

## (द्वितीयो भागः)

**II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। (5x2=10)**

**(Answer any five questions in one or two sentences)**

16. पाश्चात्यदर्शने दर्शनशब्दः कथं व्यवह्रियते?

17. को नाम प्रतीत्यसमुत्पादः ?

18. वैशेषिकदर्शने पदार्थाः कति? कानि च तानि?

19. न्यायमते कति गुणाः सन्ति? कानि च तानि?

20. लक्षणे कति दोषाः सन्ति? कानि च तानि ?1

21. आकाङ्क्षा नाम किम् ?

22. प्रस्थानत्रयी इति नाम्ना प्रथितानि ग्रन्थानि कानि?

23. अनुबन्धमतुष्टयं किम्

24. असिद्धः कति विधः के च ते

25. अनेकान्तवादः कः?

## SECTION-C

## (तृतीयो भागः)

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत । (6x5=30)**

**(Answer any six questions)**

26. योगदर्शने ईश्वरःप्रतिपादयत।

27. वृत्तयः कति विधम् ?विशदयत ।

28. सांख्यदर्शनेपुरुषः प्रतिपादयत ।

29. योगदर्शने अष्टाङ्गानि विशदयत ।
30. प्रत्यक्षप्रमाणं विभागं च समर्थयत ।
31. अन्वयव्यतिरेकिलक्षणं लिखत ।
32. आश्रयासिद्धस्य भेदाः विशदयत ।
33. वाक्यार्थज्ञाने हेतवःके?
34. हेत्वाभासाः प्रतिपादयत ।
35. चार्वाकदर्शनं प्रतिपादयत ।
36. मीमांसादर्शनम् संक्षिप्य लिखत।
37. ब्रह्मणः स्वरूपं लिखत ।

## SECTION -D

**(चतुर्थो भागः)**

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत। (2x10=20)**

**(Write an essay on any two of the following)**

38. आस्तिकदर्शनम् अधिकृत्य निरूपयत ।
39. तर्कसंग्रहरीत्या पदार्थाः विशदयत।
40. बादरायणसुरेश्वराचार्यपद्मपादाचार्य◌ाणां योगदानंविशदयत।
41. नैयायिकमते सप्तभङ्गीनयः अथवा स्याद् वादः विशदयत।

**Set-2**
**Model question paper**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………
Reg. No : ……….............                                   Name: ………………...

**FOURTH SEMESTER B.A. SANSKRIT EXAMINATION**
**DISCIPLINE SPECIFIC ELECTIVE COURSE**

**B21SN01DEभारतीयदर्शनपरिचयः**
**(CBCS - UG)**
**2024-25 - Admission Onwards**

**Time: 3Hours**                                   **Max Marks: 70**

सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरी लिपिरुपयोक्तव्या ।

## SECTION –A
## (प्रथमो भागः)

**I.** एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत। **(10x1=10)**
**(Answer any ten questions in a word or sentence)**

1. कस्मात् धातोः दर्शनशब्दः निष्पन्नः?
2. योगदर्शनस्य अपरं नाम किम्?
3. दुःखत्रयं कानि?
4. जैनदर्शनस्य प्रथमतीर्थङ्करः कः?
5. दृष्टं इत्यस्य अर्थःकः?
6. पञ्चविंशतितत्वानि केन नाम्ना ज्ञायन्ते ?
7. विकल्पः नाम किम् ?
8. योगाङ्गानि कतिविधः?
9. लक्षणे कति दोषाः सन्ति? कानि च तानि ?
10. निर्विकल्पकस्य लक्षणम् किम् ?

11. पञ्चावयवाः के?

12. वाक्यार्थज्ञाने हेतवःके?

13. चोदना नाम का ?

14. कुमारिलभट्टस्य मतम् केन नाम्ना प्रसिद्धम् भवति?

15. गीतायां कति अध्यायाः सन्ति ?

## SECTTION – B

## (द्वितीयो भागः)

**II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। (5x2=10)**
**(Answer any five questions in one or two sentences)**

16. चतुर्महावाक्यानां नामानि कानि ?

17. चार्वाकमते अनुमानादिप्रमाणानि किमर्थं निराकुर्वन्ति?

18. अभावप्रत्यक्षे कः सन्निकर्षः ?

19. न्यायमते कति गुणाः सन्ति? कानि च तानि?

20. अनेकान्तवादः कः?

21. आत्मनः किं लक्षणम्, कतिविधः?

22. साधारणस्य लक्षणं उदाहरणं च लिखत ।

23. साधनचतुष्टयं किम् ?

24. को नाम प्रतीत्यसमुत्पादः ?

25. द्रव्यसामान्यलक्षणं किम् ?

## SECTION- C

## (तृतीयो भागः)

III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत । **(6x5=30)**
**(Answer any six questions)**

26. सांख्यदर्शनस्य पञ्चविंशतितत्वानि विशदयत।

27. जैनमते सप्तभङ्गीनयं अथवा स्याद्वादः विशदयत ।

28. दुखःत्रयं प्रतिपादयत।

29. सत्कार्यवादं विशदयत ।

30. पृथिव्याः किं लक्षणम्? कति च भेदाः।

31. सन्निकर्षः सोदाहरणं प्रतिपादयत ।

32. विरुद्धस्य लक्षणं उदाहरणं च लिखत ।

33. वाक्यार्थज्ञाने हेतवःके? लिखत ।

34. भाट्टमतमनुसृत्य कर्मसिद्धान्तं प्रतिपादयत ।

35. प्रस्थानत्रयं लिखत ।

36. "काम एवैकः पुरुषार्थः"।"मरणमेवापवर्ग"। विशदयत ।

37. बौद्धदर्शनमधिकृत्य वैभाषिकाः सिद्धान्तं प्रतिपादयत।

## SECTION - D

## (चतुर्थो भागः)

IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत। **(2x10=20)**

**(Write an essay on any two of the following)**

38. तर्कसंग्रहरीत्या अनुमानप्रमाणं विशदयत।

39. सांख्यकारिकानुसारं पुरुषास्तित्वं पुरुषबहुत्वं च प्रतिपादयत ।

40. बौद्धदर्शनविभागान् विशदयत।

41. वेदान्तदर्शनानुसारं अविद्यां विशदयत ।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

भारतीयदर्शनपरिचयः

COURSE CODE: B21SN01DE

SGOU

ISBN 978-81-970303-0-7

YouTube

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841